# Panchadashi

# પઞ્ચદશી

## Document Information

Text title : Panchadashi

File name : panchadashi.itx

Category : major_works, vidyAraNya, vedanta, panchadashI

Location : doc_z_misc_major_works

Author : Swami Vidyaranya [circa 1350 A.D.]

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, v.subrahmanian at gmail.com

Description-comments : A treatise on Advaita Vedanta of Shankara

Latest update : August 5, 2011, April 14, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 19, 2025

*sanskritdocuments.org*

# પઞ્ચદશી

પઞ્ચદશી    શ્લોક સઙ્ખ્યા  ૧૫૭૦


૧  તત્ત્વવિવેકઃ । ૬૫

૨  ભૂતવિવેકઃ । ૧૦૩

૩  પઞ્ચકોષવિવેકઃ । ૪૩

૪  દ્વૈતવિવેકઃ । ૬૭

૫  મહાવાક્યવિવેકઃ । ૮

૬  ચિત્રદીપઃ । ૨૯૦

૭  તૃપ્તિદીપઃ । ૨૯૭

૮  કૂટસ્થ દીપઃ । ૭૬

૯  ધ્યાનદીપઃ । ૧૫૮

૧૦  નાટક દીપઃ । ૨૬

૧૧  બ્રહ્માનન્દે યોગાનન્દઃ । ૧૩૪

૧૨  બ્રહ્માનન્દે આત્માનન્દઃ । ૯૦

૧૩  બ્રહ્માનન્દે અદ્વૈતાનન્દઃ । ૧૦૫

૧૪  બ્રહ્માનન્દે વિદ્યાનન્દઃ । ૬૫

૧૫  બ્રહ્માનન્દે વિષયાનન્દઃ । ૩૫


## ૧. તત્ત્વવિવેકોનામ - પ્રથમઃ પરિચ્છેદઃ ।

નમઃ શ્રીશઙ્કરાનન્દગુરુપાદામ્બુજન્મને ।
સવિલાસમહામોહગ્રાહગ્રાસૈકકર્મણે ॥ ૧॥

તત્પાદામ્બુરુહદ્વન્દ્વસેવાનિર્મલચેતસામ્ ।
સુખબોધાય તત્ત્વસ્ય વિવેકોઽયં વિધીયતે ॥ ૨॥

શબ્દસ્પર્શાદયો વેદ્યા વૈચિત્ર્યાજ્જાગરે પૃથક્ ।
તતોવિભક્તા તત્સંવિદૈક્યરૂપ્યાન્ન ભિદ્યતે ॥ ૩॥

તથા સ્વપ્નેઽત્ર વેદ્યન્તુ ન સ્થિરં જાગરે સ્થિરમ્ ।
તદ્ભેદોઽતસ્તયોઃ સંવિદેકરૂપા ન ભિદ્યતે ॥ ૪॥

સુપ્તોત્થિતસ્ય સૌષુપ્તતમોબોધો ભવેત્સ્મૃતિઃ ।
સા ચાવબુદ્ધવિષયાવબુદ્ધં તત્તદા તતઃ ॥ ૫॥

સબોધોવિષયાદ્ભિન્નો ન બોધાત્સ્વપ્નબોધવત્ ।
એવં સ્થાનત્રયેઽપ્યેકા સંવિત્તદ્વદ્દિનાન્તરે ॥ ૬॥

માસાબ્દાયુગકલ્પેષુ ગતાગમ્યેષ્વનેકધા ।
નોદેતિ નાસ્તમેત્યેકા સંવિદેષા સ્વયંપ્રભા ॥ ૭॥

ઇયમાત્મા પરાનન્દઃ પરપ્રેમાસ્પદં યતઃ ।
મા ન ભુવં હિ ભૂયાસમિતિ પ્રેમાત્મનીક્ષ્યતે ॥ ૮॥

તત્પ્રેમાત્માર્થમન્યત્ર નૈવમન્યાર્થમાત્મનિ ।
અતસ્તત્પરમન્તેન પરમાનન્દતાત્મનઃ ॥ ૯॥

ઇત્થં સચ્ચિત્પરાનન્દ આત્મા યુક્ત્યા તથાવિધમ્ ।
પરં બ્રહ્મ તયોશ્ચૈક્યં શ્રુત્યન્તેષૂપદિશ્યતે ॥ ૧૦॥

અભાને ન પરં પ્રેમ ભાને ન વિષયસ્પૃહા ।
અતોભાનેઽપ્યભાતાઽસૌ પરમાનન્દતાત્મનઃ ॥ ૧૧॥

અધ્યેતૃવર્ગમધ્યસ્થ પુત્રાધ્યયન શબ્દવત્ ।
ભાનેઽપ્યભાનં ભાનસ્ય પ્રતિબન્ધેન યુજ્યતે ॥ ૧૨॥

પ્રતિબન્ધોઽસ્તિ ભાતીતિ વ્યવહારાર્હવસ્તુનિ ।
તં નિરસ્ય વિરુદ્ધસ્ય તસ્યોત્પાદનમુચ્યતે ॥ ૧૩॥

તસ્ય હેતુઃ સમાનાભિહારઃ પુત્રધ્વનિશ્રુતૌ ।
ઇહાનાદિરવિદ્યૈવ વ્યામોહૈકનિબન્ધનમ્ ॥ ૧૪॥

ચિદાનન્દમયબ્રહ્મપ્રતિબિમ્બસમન્વિતા ।
તમોરજઃસત્ત્વગુણા પ્રકૃતિર્દ્વિવિધા ચ સા ॥ ૧૫॥

સત્ત્વશુદ્ધાવિશુદ્ધિભ્યાં માયાઽવિદ્યે ચ તે મતે ।
માયાબિમ્બોવશીકૃત્ય તાં સ્યાત્સર્વજ્ઞ ઈશ્વરઃ ॥ ૧૬॥

અવિદ્યાવશગસ્ત્વન્યસ્તદ્વૈચિત્ર્યાદનેકધા ।

સા કારણશરીરં સ્યાત્પ્રાજ્ઞસ્તત્રાભિમાનવાન્ ॥ ૧૭॥

તમઃ પ્રધાનપ્રકૃતેસ્તદ્ભોગાયેશ્વરાજ્ઞયા ।
વિયત્પવનતેજોઽમ્બુ ભુવોભૂતાનિ જજ્ઞિરે ॥ ૧૮॥

સત્ત્વાંશૈઃ પઞ્ચભિસ્તેષાં ક્રમાદ્ધીન્દ્રિયપઞ્ચકમ્ ।
શ્રોત્રત્વગક્ષિરસનઘ્રાણાખ્યામુપજાયતે ॥ ૧૯॥

તૈરન્તઃકરણં સર્વૈર્વૃત્તિભેદેન તદ્વિધા ।
મનોવિમર્શરૂપં સ્યાદ્બુદ્ધિઃ સ્યાન્નિશ્ચયાત્મિકા ॥ ૨૦॥

રજોંઽશૈઃ પઞ્ચભિસ્તેષાં ક્રમાત્કર્મેન્દ્રિયાણિ તુ ।
વાક્પાણિપાદપાયૂપસ્થાભિધાનાનિ જજ્ઞિરે ॥ ૨૧॥

તૈઃ સર્વૈઃ સહિતૈઃ પ્રાણોવૃત્તિભેદાત્સ પઞ્ચધા ।
પ્રાણોઽપાનઃ સમાનશ્ચોદાનવ્યાનૌ ચ તે પુનઃ ॥ ૨૨॥

બુદ્ધિકર્મેન્દ્રિયપ્રાણપઞ્ચકૈર્મનસા ધિયા ।
શરીરં સપ્તદશભિઃ સૂક્ષ્મં તલ્લિઙ્ગમુચ્યતે ॥ ૨૩॥

પ્રાજ્ઞસ્તત્રાભિમાનેન તૈજસત્વં પ્રપદ્યતે ।
હિરણ્યગર્ભતામીશસ્તયોર્વ્યષ્ટિસમષ્ટિતા ॥ ૨૪॥

સમષ્ટિરીશઃ સર્વેષાં સ્વાત્મતાદાત્મ્યવેદનાત્ ।
તદભાવાત્તતોઽન્યે તુ કથ્યન્તે વ્યષ્ટિસંજ્ઞયા ॥ ૨૫॥

તદ્ભોગાય પુનર્ભોગ્યભોગાયતનજન્મને ।
પઞ્ચીકરોતિ ભગવાન્પ્રત્યેકં વિયદાદિકમ્ ॥ ૨૬॥

દ્વિધા વિધાય ચૈકૈકં ચતુર્ધા પ્રથમં પુનઃ ।
સ્વસ્વેતરદ્વિતીયાંશૈર્યોજનાત્પઞ્ચ પઞ્ચ તે ॥ ૨૭॥

તૈરણ્ડસ્તત્ર ભુવનભોગ્યભોગાશ્રયોદ્ભવઃ ।
હિરણ્યગર્ભઃ સ્થૂલેઽસ્મિન્દેહે વૈશ્વાનરો ભવેત્ ।
તૈજસા વિશ્વતાં યાતા દેવ તિર્યઙ્નરાદયઃ ॥ ૨૮॥

તે પરાગ્દર્શિનઃ પ્રત્યક્તત્ત્વબોધવિવર્જિતાઃ ॥ ૨૯॥

કુર્વતે કર્મ ભોગાય કર્મ કર્તું ચ ભુઞ્જતે ।
નદ્યાં કીટા ઇવાવર્તાદાવર્તાન્તરમાશુ તે ।
વ્રજન્તો જન્મનો જન્મ લભન્તે નૈવ નિર્વૃતિમ્ ॥ ૩૦॥

સત્કર્મપરિપાકાત્તે કરુણાનિધિનોદ્ધૃતાઃ ।
પ્રાપ્ય તીરતરુચ્છાયાં વિશ્રામ્યન્તિ યથાસુખમ્ ॥ ૩૧॥

ઉપદેશમવાપ્યૈવમાચાર્યાત્તત્ત્વદર્શિનઃ ।
પઞ્ચકોષવિવેકેન લભન્તે નિર્વૃતિં પરામ્ ॥ ૩૨॥

અન્નં પ્રાણો મનો બુદ્ધિરાનન્દશ્ચેતિ પઞ્ચ તે ।
કોષાસ્તૈરાવૃતઃ સ્વાત્મા વિસ્મૃત્યા સંસૃતિં વ્રજેત્ ॥ ૩૩॥

સ્યાત્પઞ્ચીકૃતભૂતોત્થો દેહઃ સ્થૂલોઽન્ન સંજ્ઞકઃ ।
લિઙ્ગે તુ રાજસૈઃ પ્રાણૈઃ પ્રાણઃ કર્મેન્દ્રિયૈઃ સહ ॥ ૩૪॥

સાત્ત્વિકૈર્ધીન્દ્રિયૈઃ સાકં વિમર્ષાત્મા મનોમયઃ ।
તૈરેવ સાકં વિજ્ઞાનમયોધીર્નિશ્ચયાત્મિકા ॥ ૩૫॥

કારણે સત્ત્વમાનન્દમયોમોદાદિવૃત્તિભિઃ ।
તત્તત્કોષૈસ્તુ તાદાત્મ્યાદાત્મા તત્તન્મયો ભવેત્ ॥ ૩૬॥

અન્વયવ્યતિરેકાભ્યાં પઞ્ચકોષ વિવેકતઃ ।
સ્વાત્માનં તત ઉદ્ધૃત્ય પરં બ્રહ્મ પ્રપદ્યતે ॥ ૩૭॥

અભાને સ્થૂલદેહસ્ય સ્વપ્ને યદ્ભાનમાત્મનઃ ।
સોઽન્વયો વ્યતિરેકસ્તદ્ભાનેઽન્યાનવભાસનમ્ ॥ ૩૮॥

લિઙ્ગભાને સુષુપ્તૌ સ્યાદાત્મનો ભાનમન્વયઃ ।
વ્યતિરેકસ્તુ તદ્ભાને લિઙ્ગસ્યાભાનમુચ્યતે ॥ ૩૯॥

તદ્વિવેકાદ્વિવિક્તાઃ સ્યુઃ કોષાઃ પ્રાણમનોધિયઃ ।
તે હિ તત્ર ગુણાવસ્થાભેદમાત્રાત્પૃથક્કૃતાઃ ॥ ૪૦॥

સુષુપ્ત્યભાને ભાનન્તુ સમાધાવાત્મનોઽન્વયઃ ।
વ્યતિરેકસ્ત્વાત્મભાને સુષુપ્ત્યનવભાસનમ્ ॥ ૪૧॥

યથામુઞ્જાદિષીકૈવમાત્મા યુક્ત્યા સમુદ્ધૃતઃ ।
શરીરત્રિતયાદ્ધીરૈઃ પરં બ્રહ્મૈવ જાયતે ॥ ૪૨॥

પરાપરાત્મનોરેવં યુક્ત્યા સમ્ભાવિતૈકતા ।
તત્ત્વમસ્યાદિવાક્યૈઃ સા ભાગત્યાગેન લક્ષ્યતે ॥ ૪૩॥

જગતો યદુપાદાનં માયામાદાય તામસીમ્ ।

નિમિત્તં શુદ્ધસત્ત્વાં તામુચ્યતે બ્રહ્મ તદ્ગિરા ॥ ૪૪॥

યદા મલિનસત્ત્વાં તાં કામકર્માદિદૂષિતમ્ ।
આદત્તે તત્પરં બ્રહ્મ ત્વં પદેન તદોચ્યતે ॥ ૪૫॥

ત્રિતયીમપિ તાં મુક્ત્વા પરસ્પરવિરોધિનીમ્ ।
અખણ્ડં સચ્ચિદાનન્દં મહાવાક્યેન લક્ષ્યતે ॥ ૪૬॥

સોઽયમિત્યાદિવાક્યેષુ વિરોધાત્તદિદન્ત્વયોઃ ।
ત્યાગેન ભાગયોરેક આશ્રયો લક્ષ્યતે યથા ॥ ૪૭॥

માયાવિદ્યે વિહાયૈવમુપાધી પરજીવયોઃ ।
અખણ્ડં સચ્ચિદાનન્દં પરં બ્રહ્મૈવ લક્ષ્યતે ॥ ૪૮॥

સવિકલ્પસ્ય લક્ષ્યત્વે લક્ષ્યસ્ય સ્યાદવસ્તુતા ।
નિર્વિકલ્પસ્ય લક્ષ્યત્વં ન દૃષ્ટં ન ચ સમ્ભવિ ॥ ૪૯॥

વિકલ્પો નિર્વિકલ્પસ્ય સવિકલ્પસ્ય વા ભવેત્ ।
આદ્યે વ્યાહતિરન્યત્રાનવસ્થાત્માશ્રયાદયઃ ॥ ૫૦॥

ઇદં ગુણક્રિયાજાતિદ્રવ્યસમ્બન્ધવસ્તુષુ ।
સમન્તેન સ્વરૂપસ્ય સર્વમેતદિતીષ્યતામ્ ॥ ૫૧॥

વિકલ્પતદભાવાભ્યામસંસ્પૃષ્ટાત્મવસ્તુનિ ।
વિકલ્પિતત્વલક્ષ્યત્વસમ્બન્ધાદ્યાસ્તુ કલ્પિતાઃ ॥ ૫૨॥

ઇત્થં વાક્યૈસ્તદર્થાનુસન્ધાનં શ્રવણં ભવેત્ ।
યુક્ત્યા સમ્ભાવિતત્વાનુસન્ધાનં મનનન્તુ તત્ ॥ ૫૩॥

તાભ્યાં નિર્વિચિકિત્સેઽર્થે ચેતસઃસ્થાપિતસ્ય યત્ ।
એકતાનત્વમેતદ્ધિ નિદિધ્યાસનમુચ્યતે ॥ ૫૪॥

ધ્યાતૃધ્યાને પરિત્યજ્ય ક્રમાદ્ધ્યેયૈકગોચરમ્ ।
નિર્વાતદીપવચ્ચિત્તં સમાધિરભિધીયતે ॥ ૫૫॥

વૃત્તયસ્તુ તદાનીમજ્ઞાતા અપ્યાત્મગોચરાઃ ।
સ્મરણાદનુમીયન્તે વ્યુત્થિતસ્ય સમુત્થિતાત્ ॥ ૫૬॥

વૃત્તીનામનુવૃત્તિસ્તુ પ્રયત્નાત્પ્રથમાદપિ ।
અદૃષ્ટાસકૃદભ્યાસસંસ્કારઃ સચિરાદ્ભવેત્ ॥ ૫૭॥

યથા દીપો નિવાતસ્થ ઇત્યાદિભિરનેકધા ।
ભગવાનિમમેવાર્થમર્જુનાય ન્યરૂપયત્ ॥ ૫૮॥

અનાદાવિહ સંસારે સઞ્ચિતાઃ કર્મકોટયઃ ।
અનેન વિલયં યાન્તિ શુદ્ધો ધર્મો વિવર્ધતે ॥ ૫૯॥

ધર્મમેઘમિમં પ્રાહુઃ સમાધિં યોગવિત્તમાઃ ।
વર્ષત્યેષ યતો ધર્મામૃતધારાઃ સહસ્રશઃ ॥ ૬૦॥

અમુના વાસનાજાલે નિઃશેષં પ્રવિલાપિતે ।
સમૂલોન્મૂલિતે પુણ્યપાપાખ્યે કર્મ સઞ્ચયે ॥ ૬૧॥

વાક્યમપ્રતિબદ્ધં સત્પ્રાક્પરોક્ષાવભાસિતે ।
કરામલકવદ્બોધમપરોક્ષં પ્રસૂયતે ॥ ૬૨॥

પરોક્ષં બ્રહ્મવિજ્ઞાનં શાબ્દં દેશિકપૂર્વકમ્ ।
બુદ્ધિપૂર્વકૃતં પાપં કૃત્સ્નં દહતિ વહ્નિવત્ ॥ ૬૩॥

અપરોક્ષાત્મવિજ્ઞાનં શાબ્દં દેશિકપૂર્વકમ્ ।
સંસારકારણાજ્ઞાનતમસશ્ચણ્ડભાસ્કરઃ ॥ ૬૪॥

ઇત્થં તત્ત્વવિવેકં વિધાય વિધિવન્મનઃ સમાધાય ।
વિગલિતસંસૃતિબન્ધઃ પ્રાપ્નોતિ પારં પદં નરો ન હિરાત્ ॥ ૬૫॥

ઇતિ તત્ત્વવિવેકઃ સમાપ્તઃ ॥ ૧॥

## ૨. ભૂતવિવેકોનામ- દ્વિતીયઃ પરિચ્છેદઃ ।

સદદ્વૈતં શ્રુતં યત્તત્પઞ્ચભૂતવિવેકતઃ ।
બોદ્ધું શક્યં તતો ભૂતપઞ્ચકં પ્રવિવિચ્યતે ॥ ૧॥

શબ્દસ્પર્શૌ રૂપરસૌ ગન્ધો ભૂતગુણા ઇમે ।
એકદ્વિત્રિચતુઃ પઞ્ચગુણા વ્યોમાદિષુ ક્રમાત્ ॥ ૨॥

પ્રતિધ્વનિર્વિયચ્છબ્દો વાયૌ વીસીતિ શબ્દનમ્ ।
અનુષ્ણાશીતસંસ્પર્શો વહ્નૌ ભુગુભુગુધ્વનિઃ ।
ઉષ્ણઃ સ્પર્શઃ પ્રભા રૂપં જલે બુલુ બુલુ ધ્વનિઃ ।
શીતાસ્પર્શઃ શુક્લરૂપં રસો માધુર્યમીરિતમ્ ।
ભૂમૌ કડકડાશબ્દઃ કાઠિન્યં સ્પર્શ ઇષ્યતે ।

નીલાદિકં ચિત્રરૂપં મધુરામ્લાદિકો રસઃ ।
સુરભીતરગન્ધૌ દ્વૌ ગુણાઃ સમ્યગ્વિવેચિતાઃ ॥ ૩॥

શ્રોત્રં ત્વક્ચક્ષુષિ જિહ્વા ઘ્રાણં ચેન્દ્રિયપઞ્ચકમ્ ।
કર્ણાદિગોલકસ્થં તચ્છબ્દાદિગ્રાહકં ક્રમાત્ ।
સૌક્ષ્મ્યાત્કાર્યાનુમેયં તત્પ્રાયો ધાવેદ્બહિર્મુખમ્ ॥ ૪॥

કદાચિત્પિહિતે કર્ણે શ્રૂયતે શબ્દ આન્તરઃ ।
પ્રાણવાયૌ જાઠરાગ્નૌ જલપાનેઽન્નભક્ષણે ।
વ્યાજ્યાન્તે હ્યાન્તરાઃ સ્પર્શામીલને ચાન્તરં તમઃ ।
ઉદ્ગારે રસગન્ધૌ ચેત્યક્ષાણામાન્તરગ્રહઃ ॥ ૫॥

પઞ્ચોક્ત્યાદાનગમનવિસર્ગાનન્દકાઃ ક્રિયાઃ ।
કૃષિવાણિજ્યસેવાદ્યાઃ પઞ્ચસ્વન્તર્ભવન્તિ હિ ॥ ૬॥

વાક્પાણિપાદપાયૂપસ્થૈરક્ષૈસ્તત્ક્રિયાજનિઃ ।
મુખાદિગોલકેષ્વાસ્તે તત્કર્મેન્દ્રિયપઞ્ચકમ્ ॥ ૭॥

મનો દશેન્દ્રિયાધ્યક્ષં હૃત્પદ્મગોલકે સ્થિતમ્ ।
તચ્ચાન્તઃકરણં બાહ્યેષ્વસ્વાતન્ત્ર્યાદ્વિનેન્દ્રિયૈઃ ॥ ૮॥

અક્ષેષ્વર્થાર્પિતેષ્વેતદ્ગુણદોષવિચારકમ્ ।
સત્ત્વં રજસ્તમશ્ચાસ્ય ગુણા વિક્રિયતે હિ તૈઃ ॥ ૯॥

વૈરાગ્યં ક્ષાન્તિરૌદાર્યમિત્યાદ્યાઃ સત્ત્વસમ્ભવાઃ ।
કામક્રોધૌ લોભયત્નાવિત્યાદ્યા રજસોત્થિતાઃ ।
આલસ્યભ્રાન્તિતન્દ્રાદ્યા વિકારાસ્તમસોત્થિતાઃ ॥ ૧૦॥

સાત્ત્વિકૈઃ પુણ્યનિષ્પત્તિઃ પાપૌત્પત્તિશ્ચ રાજસૈઃ ।
તામસૈર્નોભયં કિન્તુ વૃથાયુઃક્ષપણં ભવેત્ ।
અત્રાહમ્પ્રત્યયી કર્તેત્યેવં લોકવ્યવસ્થિતિઃ ॥ ૧૧॥

સ્પષ્ટશબ્દાદિયુક્તેષુ ભૌતિકત્વમતિસ્ફુટમ્ ।
અક્ષાદાવપિ તચ્છાસ્ત્રયુક્તિભ્યામવધાર્યતામ્ ॥ ૧૨॥

એકાદશેન્દ્રિયૈર્યુક્ત્યા શાસ્ત્રેણાપ્યવગમ્યતે ।
યાવત્કિંચિદ્ભવેદેતદિદં શબ્દોદિતં જગત્ ॥ ૧૩॥

ઇદં સર્વં પુરા સૃષ્ટેરેકમેવાદ્વિતીયકમ્ ।

સદેવાસીન્નામરૂપે નાસ્તામિત્યારુણેર્વચઃ ॥ ૧૪॥

વૃક્ષસ્ય સ્વગતો ભેદઃ પત્રપુષ્પફલાદિભિઃ ।
વૃક્ષાન્તરાત્સજાતીયો વિજાતીયઃ શિલાદિતઃ ॥ ૧૫॥

તથા સદ્વસ્તુનો ભેદત્રયં પ્રાપ્તં નિવાર્યતે ।
ઐક્યાવધારણદ્વૈતપ્રતિષેધૈસ્ત્રિભિઃ ક્રમાત્ ॥ ૧૬॥

સતો નાવયવાઃ શંક્યાસ્તદંશસ્યાનિરૂપણાત્ ।
નામરૂપે ન તસ્ય અંશૌ તયોરદ્યાપ્યનુદ્ભવાત્ ॥ ૧૭॥

નામરૂપોદ્ભવસ્યૈવ સૃષ્ટિત્વાત્સૃષ્ટિતઃ પુરા ।
ન તયોરુદ્ભવસ્તસ્માત્સન્નિરંશં યથા વિયત્ ॥ ૧૮॥

સદન્તરં સજાતીયં ન વૈલક્ષણ્યવર્જનાત્ ।
નામરૂપોપાધિભેદં વિના નૈવ સતો ભિદા ॥ ૧૯॥

વિજાતીયમસત્તત્તુ ન ખલ્વસ્તીતિ ગમ્યતે ।
નાસ્યાતઃ પ્રતિયોગિત્વં વિજાતીયાદ્ભિદા કુતઃ ॥ ૨૦॥

એકમેવાદ્વિતીયં સત્સિદ્ધમત્ર તુ કેચન ।
વિહ્વલા અસદેવેદં પુરાસીદિત્યવર્ણયન્ ॥ ૨૧॥

મગ્નસ્યાબ્ધૌ યથાઽક્ષાણિ વિહ્વલાનિ તથાઽસ્ય ધીઃ ।
અખણ્ડૈકરસં શ્રુત્વા નિઃપ્રચારા બિભેત્યતઃ ॥ ૨૨॥

ગૌડાચાર્યા નિર્વિકલ્પે સમાધાવન્યયોગિનામ્ ।
સાકારધ્યાનનિષ્ઠાનામત્યન્તં ભયમૂચિરે ॥ ૨૩॥

અસ્પર્શયોગો નામૈષ દુર્દર્શઃ સર્વયોગિભિઃ ।
યોગિનો બિભ્યતિ હ્યસ્માદભયે ભયદર્શિનઃ ॥ ૨૪॥

ભગવત્પૂજ્યપાદાશ્ચ શુષ્કતર્કપટૂનમૂન્ ।
આહુર્માધ્યમિકાન્ભ્રાન્તાનચિન્ત્યેઽસ્મિન્સદાત્મનિ ॥ ૨૫॥

અનાદૃત્ય શ્રુતિં મૌર્ખ્યાદિમે બૌદ્ધસ્તપસ્વિનઃ ।
આપેદિરે નિરામત્વમનુમાનૈકચક્ષુશઃ ॥ ૨૬॥

શૂન્યમાસીદિતિ બ્રૂષે સદ્યોગં વા સદાત્મતામ્ ।
શૂન્યસ્ય ન તુ તદ્યુક્તમુભયં વ્યાહ તત્ત્વતઃ ॥ ૨૭॥

ન યુક્તસ્તમસા સૂર્યો નાપિ ચાસૌ તમોમયઃ ।
સચ્છૂન્યયોર્વિરોધિત્વાચ્છૂન્યમાસીત્કથં વદ ॥ ૨૮॥

વિયદાદેર્નામરૂપે માયયા સતિ કલ્પિતે ।
શૂન્યસ્ય નામરૂપે ચ તથા ચેજ્જીવ્યતાં ચિરમ્ ॥ ૨૯॥

સતોઽપિ નામરૂપે દ્વે કલ્પિતે ચેત્તદા વદ ।
કુત્રેતિ નિરધિષ્ઠાનો ન ભ્રમઃ ક્વચિદીક્ષ્યતે ॥ ૩૦॥

સદાસીદિતિ શબ્દાર્થભેદે દ્વૈગુણ્યમાપતેત્ ।
અભેદે પુનરુક્તિઃ સ્યાન્નૈવં લોકે તથેક્ષણાત્ ॥ ૩૧॥

કર્તવ્યં કુરુતે વાક્યં બ્રૂતે ધાર્યસ્ય ધારણમ્ ।
ઇત્યાદિવાસનાવિષ્ટં પ્રત્યાસીત્સદિતીરણમ્ ॥ ૩૨॥

કાલાભાવે પુરેત્યુક્તિઃ કાલવાસનયાયુતમ્ ।
શિષ્યં પ્રત્યેવ તેનાત્ર દ્વિતીયં ન હિ શંક્યતે ॥ ૩૩॥

ચોદ્યં વા પરિહારો વા ક્રિયતાં દ્વૈતભાષયા ।
અદ્વૈતભાષયા ચોદ્યં નાસ્તિ નાપિ તદુત્તરમ્ ॥ ૩૪॥

અતસ્તિમિતગમ્ભીરં ન તેજો ન તમસ્તતમ્ ।
અનાખ્યમનભિવ્યક્તં સત્કિંચિદવશિષ્યતે ॥ ૩૫॥

નનુ ભૂમ્યાદિકં મા ભૂત્પરમાણ્વન્ત નાશતઃ ।
કથં તે વિયતોઽસત્ત્વં બુદ્ધિમારોહતીતિ ચેત્ ॥ ૩૬॥

અત્યન્તં નિર્જગદ્વ્યોમ યથા તે બુદ્ધિમાશ્રિતમ્ ।
તથૈવ સન્નિરાકાશં કુતો નાશ્રયતે મતિમ્ ॥ ૩૭॥

નિર્જગદ્વ્યોમ દૃષ્ટં ચેત્પ્રકાશતમસી વિના ।
ક્વ દૃષ્ટં કિંચ તે પક્ષે ન પ્રત્યક્ષં વિયત્ખલુ ॥ ૩૮॥

સદ્વસ્તુ સિદ્ધન્ત્વસ્માભિર્નિશ્ચિતૈરનુભૂયતે ।
તૂષ્ણીં સ્થિતૌ ન શૂન્યત્વં શૂન્યબુદ્ધેસ્તુ વર્જનાત્ ॥ ૩૯॥

સદ્બુદ્ધિરપિ ચેન્નાસ્તિ માસ્ત્વસ્ય સ્વપ્રભત્વતઃ ।
નિર્મનસ્કત્વસાક્ષિત્વાત્સન્માત્રં સુગમં નૃણામ્ ॥ ૪૦॥

મનોજૃમ્ભનરાહિત્યે યથા સાક્ષી નિરાકુલઃ ।
માયાજૃમ્ભણતઃ પૂર્વં સત્તથૈવ નિરાકુલમ્ ॥ ૪૧॥

નિસ્તત્ત્વા કાર્યગમ્યાસ્ય શક્તિર્માયાગ્નિશક્તિવત્ ।
ન હિ શક્તિ ક્વચિત્કૈશ્ચિદ્બુદ્ધ્યતે કારયતઃ પુરા ॥ ૪૨॥

ન સદ્વસ્તુ સતઃ શક્તિર્ન હિ વહ્નેઃ સ્વશક્તિતા ।
સદ્વિલક્ષણતાયાન્તુ શક્તેઃ કિં તત્ત્વમુચ્યતામ્ ॥ ૪૩॥

શૂન્યત્વમિતિ ચેચ્છૂન્યં માયાકાર્યમિતીરિતમ્ ।
નશૂન્યં નાપિ સદ્યાદૃક્તાદૃક્તત્ત્વમિહેષ્યતામ્ ॥ ૪૪॥

નાસદાસીન્નો સદાસીત્તદાનીં કિન્ત્વભૂત્તમઃ ।
સદ્યોગાત્તમસઃ સત્ત્વં ન સ્વતસ્તન્નિષેધનાત્ ॥ ૪૫॥

અતએવ દ્વિતીયત્વં શૂન્યવન્નહિ ગણ્યતે ।
ન લોકે ચૈત્રતચ્છક્ત્યોર્જીવિતં ગણ્યતે પૃથક્ ॥ ૪૬॥

શક્ત્યાધિક્યે જીવિતં ચેદ્વર્ધતે તત્ર વૃદ્ધિકૃત્ ।
ન શક્તિઃ કિન્તુ તત્કાર્યં યુદ્ધકૃષ્યાદિકં તથા ।
સર્વથા શક્તિમાત્રસ્ય ન પૃથગ્ગણના ક્વચિત્ ।
શક્તિકાર્યં તુ નૈવાસ્તિ દ્વિતીયં શંક્યતે કથમ્ ॥ ૪૭॥

ન કૃત્સ્નબ્રહ્મવૃત્તિઃ સા શક્તિઃ કિન્ત્વેકદેશભાક્ ।
ઘટશક્તિર્યથા ભૂમૌ સ્નિગ્ધમૃદ્યેવ વર્તતે ॥ ૪૮॥

પાદોઽસ્ય વિશ્વા ભૂતાનિ ત્રિપાદસ્તિ સ્વયં પ્રભઃ ।
ઇત્યેકદેશવૃત્તિત્વં માયાયા વદતિ શ્રુતિઃ ॥ ૪૯॥

વિષ્ટભ્યાહમિદં કૃત્સ્નમેકાંશેન સ્થિતો જગત્ ।
ઇતિ કૃષ્ણોર્જુનાયાહ જગતસ્ત્વેકદેશતામ્ ॥ ૫૦॥

સભૂમિં સર્વતો વૃત્વા અત્યતિષ્ઠદ્દશાઙ્ગુલમ્ ।
વિકારાવર્તિ ચાત્રાસ્તિ શ્રુતિસૂત્રકૃતોર્વચઃ ॥ ૫૧॥

નિરંશેઽપ્યંશમારોપ્ય કૃત્સ્નેંઽશે વેતિ પૃચ્છતઃ ।
તદ્ભાષયોત્તરં બ્રૂતે શ્રુતિઃ શ્રોતુર્હિતૈષિણી ॥ ૫૨॥

સત્તત્ત્વમાશ્રિતા શક્તિઃ કલ્પયેત્સતિ વિક્રિયાઃ ।
વર્ણાભિત્તિગતાભિત્તૌ ચિત્રં નાનાવિધં યથા ॥ ૫૩॥

આદ્યો વિકાર આકાશઃ સોઽવકાશસ્વભાવાન્ ।

આકાશોઽસ્તીતિ સત્તત્ત્વમાકાશેઽપ્યનુગચ્છતિ ॥ ૫૪॥

એકસ્વભાવં સત્તત્ત્વમાકાશો દ્વિસ્વભાવકઃ ।
નાવકાશઃ સતિ વ્યોમ્નિ સ ચૈષોઽપિ દ્વયં સ્થિતમ્ ॥ ૫૫॥

યદ્વા પ્રતિધ્વનિર્વ્યોમ્નો ગુણો નાસૌ સતીક્ષ્યતે ।
વ્યોમ્નિ દ્વૌ સદ્ધ્વની તેન સદેકં દ્વિગુણં વિયત્ ॥ ૫૬॥

યા શક્તિઃ કલ્પયેદ્વ્યોમ સા સદ્વ્યોમ્નોરભિન્નતામ્ ।
આપાદ્ય ધર્મધર્મિત્વં વ્યત્યયેનાવકલ્પયેત્ ॥ ૫૭॥

સતો વ્યોમત્વમાપન્નં વ્યોમ્નઃ સત્તાન્તુ લૌકિકાઃ ।
તાર્કિકાશ્ચાવગચ્છન્તિ માયાયા ઉચિતં હિ તત્ ॥ ૫૮॥

યદ્યથા વર્તતે તસ્ય તથાત્વં ભાતિ માનતઃ ।
અન્યથાત્વં ભ્રમેણેતિ ન્યાયોઽયં સર્વલૌકિકઃ ॥ ૫૯॥

એવં શ્રુતિવિચારાત્પ્રાક્યદ્યથા વસ્તુ ભાસતે ।
વિચારેણ વિપર્યેતિ તતસ્તચ્ચિન્ત્યતાં વિયત્ ॥ ૬૦॥

ભિન્ને વિયત્સતી શબ્દભેદાદ્બુદ્ધેશ્ચ ભેદતઃ ।
વાય્વાદિષ્વનુવૃત્તં સન્ન તુ વ્યોમેતિ ભેદધીઃ ॥ ૬૧॥

સદ્વસ્ત્વધિકવૃત્તિત્વાદ્ધર્મિ વ્યોમ્નસ્તુ ધર્મતા ।
ધિયા સતઃ પૃથક્કારે બ્રૂહિ વ્યોમ કિમાત્મકમ્ ॥ ૬૨॥

અવકાશાત્મકં તચ્ચેદસત્તદિતિ ચિન્ત્યતામ્ ।
ભિન્નં સતોઽસચ્ચ નેતિ વક્ષિ ચેદ્વ્યાહતિસ્તવ ॥ ૬૩॥

ભાતીતિ ચેદ્ભાતુ નામ ભૂષણં માયિકસ્ય તત્ ।
યદસદ્ભાસમાનન્તન્મિથ્યા સ્વપ્નગજાદિવત્ ॥ ૬૪॥

જાતિવ્યક્તો દેહિદેહૌ ગુણદ્રવ્યે યથા પૃથક્ ।
વિયત્સતોસ્તથૈવાસ્તુ પાર્થક્યં કોઽત્ર વિસ્મયઃ ॥ ૬૫॥

બુદ્ધ્વોઽપિ ભેદો નો ચિત્તે નિરુઢિં યાતિ ચેત્તદા ।
અનૈકાગ્ર્યાત્સંશયાદ્વા રૂઢ્યભાવોઽસ્ય તે વદ ॥ ૬૬॥

અપ્રમત્તો ભવ ધ્યાનાદાદ્યેઽન્યસ્મિન્વિવેચનમ્ ।
કુરુ પ્રમાણયુક્તિભ્યાં તતો રૂઢતમો ભવેત્ ॥ ૬૭॥

ધ્યાનાન્માનાદ્યુક્તિતોઽપિ રૂઢે ભેદ વિયત્સતોઃ ।
ન કદાચિદ્વિયત્સત્યં સદ્વસ્તુ છિદ્રવન્ન ચ ॥ ૬૮॥

જ્ઞસ્ય ભાતિ સદા વ્યોમ નિસ્તત્ત્વોલ્લેખપૂર્વકમ્ ।
સદ્વસ્ત્વપિ વિભાત્યસ્ય નિશ્છિદ્રત્વપુરઃસરમ્ ॥ ૬૯॥

વાસનાયાં વિવૃદ્ધાયાં વિયત્સત્યત્વવાદિનમ્ ।
સન્માત્રાબોધયુક્તં ચ દૃષ્ટ્વા વિસ્મયતે બુધઃ ॥ ૭૦॥

એવમાકાશમિથ્યાત્વે સત્સત્યત્વે ચ વાસિતે ।
ન્યાયેનાનેન વાય્વાદેઃ સદ્વસ્તુ પ્રવિવિચ્યતામ્ ॥ ૭૧॥

સદ્વસ્તુન્યેકદેશસ્થા માયા તત્રૈકદેશગમ્ ।
વિયત્તત્રાપ્યેકદેશગતો વાયુ પ્રકલ્પિતઃ ॥ ૭૨॥

શોષસ્પર્શૌ ગતિર્વેગો વાયુધર્મા ઇમે મતાઃ ।
ત્રયઃ સ્વભાવાઃ સન્માયાવ્યોમ્નાં યે તેઽપિ વાયુગાઃ ॥ ૭૩॥

વાયુરસ્તીતિ સદ્ભાવઃ સતો વાયૌ પૃથક્કૃતે ।
નિસ્તત્ત્વરૂપતા માયાસ્વભાવો વ્યોમગો ધ્વનિઃ ॥ ૭૪॥

સતોઽનુવૃત્તિઃ સર્વત્ર વ્યોમ્નો નેતિ પુરોદિતમ્ ।
વ્યોમાનુવૃત્તિરધુના કથં નવ્યાહતં વચઃ ॥ ૭૫॥

છિદ્રાનુવૃત્તિર્નેતીતિ પૂર્વોક્તિરધુના ત્વિયમ્ ।
શબ્દાનુવૃત્તિરેવોક્તા વચસો વ્યાહતિઃ કુતઃ ॥ ૭૬॥

નનુ સદ્વસ્તુપાર્થક્યાદસત્ત્વં ચેત્તદા કથમ્ ।
અવ્યક્તમાયાવૈષમ્યાદમાયામયતાપિ નો ॥ ૭૭॥

નિસ્તત્ત્વરૂપતૈવાત્ર માયાત્વસ્ય પ્રયોજિકા ।
સા શક્તિકાર્યયોસ્તુલ્યા વ્યક્તાવ્યક્તત્વભેદિનોઃ ॥ ૭૮॥

સદસત્ત્વવિવેકસ્ય પ્રસ્તુતત્ત્વાત્સચિન્ત્યતામ્ ।
અસતોઽવાન્તરો ભેદ આસ્તાં તચ્ચિન્તયાત્ર કિમ્ ॥ ૭૯॥

સદ્વસ્તુબ્રહ્મશિષ્ટોંઽશોવાયુર્મિથ્યા યથા વિયત્ ।
વાસયિત્વા ચિરં વાયોર્મિથ્યાત્વં મરુતં ત્યજેત્ ॥ ૮૦॥

ચિન્તયેદ્વહ્નિમપ્યેવં મરુતો ન્યૂનવર્તિનમ્ ।
બ્રહ્માણ્ડાવરણેષ્વેષાં ન્યૂનાધિકવિચારણા ॥ ૮૧॥

વાયોર્દશાંશતોન્યૂનોવહ્નિર્વાયૌ પ્રકલ્પિતઃ ।
પુરાણોક્તં તારતમ્યં દશાંશૈર્ભૂતપઞ્ચકે ॥ ૮૨॥

વહ્નિરુષ્ણપ્રકાશાત્મા પૂર્વાનુગતિરત્ર ચ ।
અસ્તિ વહ્નિઃ સનિસ્તત્ત્વઃ શબ્દવાન્સ્પર્શવાનપિ ॥ ૮૩॥

સન્મયાવ્યોમવાય્વંશૈર્યુક્તસ્યાગ્નેર્નિજો ગુણઃ ।
રૂપં તત્ર સતઃ સર્વમન્યદ્બુદ્ધ્યા વિવિચ્યતામ્ ॥ ૮૪॥

સતો વિવેચિતે વહ્નૌ મિથ્યાત્વે સતિ વાસિતે ।
આપો દશાંશતો ન્યૂનાઃ કલ્પિતા ઇતિ ચિન્તયેત્ ॥ ૮૫॥

સન્ત્યાપોઽમૂઃ શૂન્યતત્ત્વાઃ સશબદસ્પર્શસંયુતાઃ ।
રૂપવત્યોઽન્યધર્માનુવૃત્યા સ્વીયો રસો ગુણઃ ॥ ૮૬॥

સતો વિવેચિતાસ્વપ્સુ તન્મિથ્યાત્વે ચ વાસિતે ।
ભૂમિર્દશાંશતો ન્યૂના કલ્પિતાપ્સ્વિતિ ચિન્તયેત્ ॥ ૮૭॥

અસ્તિ ભૂસ્તત્ત્વશૂન્યાસ્યાઃ શબ્દસ્પર્શૌ સ્વરૂપકૌ ।
રસશ્ચ પરતો નૈજો ગન્ધઃ સત્તા વિવિચ્યતામ્ ॥ ૮૮॥

પૃથક્કૃતાયાં સત્તાયાં ભૂમિર્મિથ્યાવશિષ્યતે ।
ભૂમેર્દશાંશતો ન્યૂનં બ્રહ્માણ્ડં ભૂમિમધ્યગમ્ ॥ ૮૯॥

બ્રહ્માણ્ડમધ્યે તિષ્ઠન્તિ ભુવનાનિ ચતુર્દશ ।
ભુવનેષુ વસન્ત્યેષુ પ્રાણિદેહા યથાયથમ્ ॥ ૯૦॥

બ્રહ્માણ્ડલોકદેહેષુ સદ્વસ્તુનિ પૃથક્કૃતે ।
અસન્તોઽણ્ડાદયો ભાન્તુ તદ્ભાનેઽપીહ કા ક્ષતિઃ ॥ ૯૧॥

ભૂતભૌતિકમાયાનામસમત્વેઽત્યન્તવાસિતે ।
સદ્વસ્ત્વદ્વૈતમિત્યેષા ધીર્વિપર્યેતિ ન ક્વચિત્ ॥ ૯૨॥

સદદ્વૈતાત્પૃથગ્ભૂતે દ્વૈતે ભૂમ્યાદિરૂપિણિ ।
તત્તદર્થક્રિયા લોકે યથા દૃષ્ટા તથૈવ સા ॥ ૯૩॥

સાંખ્યકાણાદબૌદ્ધાદ્યૈર્જગદ્ભેદો યથા યથા ।
ઉત્પ્રેક્ષ્યતેઽનેકયુક્ત્યા ભવત્વેષ તથા તથા ॥ ૯૪॥

અવજ્ઞાતં સદદ્વૈતં નિઃશંકૈરન્યવાદિભિઃ ।

એવં કા ક્ષતિર્રસ્માકં તદ્દ્વૈતમવજાનતામ્ ॥ ૯૫॥

દ્વૈતાવજ્ઞા સુસ્થિતા ચેદદ્વૈતા ધીઃ સ્થિરા ભવેત્ ।
સ્થૈર્યે તસ્યાઃ પુમાનેષ જીવન્મુક્ત ઇતીર્યતે ॥ ૯૬॥

એષા બ્રાહ્મી સ્થિતિઃ પાર્થ નૈનાં પ્રાપ્ય વિમુહ્યતિ ।
સ્થિત્વાસ્યામન્તકાલેઽપિ બ્રહ્મનિર્વાણમૃચ્છતિ ॥ ૯૭॥

સદદ્વૈતેઽનૃતદ્વૈતે યદન્યોઽન્યૈક્યવીક્ષણમ્ ।
તસ્યાન્તકાલસ્તદ્ભેદબુદ્ધિરેવ ન ચેતરઃ ॥ ૯૮॥

યદ્વાન્તકાલઃ પ્રાણસ્ય વિયોગોસ્તુ પ્રસિદ્ધિતઃ ।
તસ્મિન્કાલેઽપિ ન ભ્રાન્તેર્ગતાયાઃ પુનરાગમઃ ॥ ૯૯॥

નીરોગ ઉપવિષ્ટો વા રુગ્ણો વા વિલુઠન્ભુવિ ।
મૂર્ચ્છિતો વા ત્યજેદેષ પ્રાણાન્ભ્રાન્તિર્ન સર્વથા ॥ ૧૦૦॥

દિને દિને સ્વપ્નસુપ્ત્યોરધીતે વિસ્મૃતેઽપ્યયમ્ ।
પરેદ્યુર્નાનધીતઃ સ્યાત્તત્ત્વવિદ્યા ન નશ્યતિ ॥ ૧૦૧॥

પ્રમાણોત્પાદિતા વિદ્યા પ્રમાણં પ્રબલં વિના ।
ન નશ્યતિ ન વેદાન્તાત્પ્રબલં માનમીક્ષતે ॥ ૧૦૨॥

તસ્માદ્વેદાન્તસંસિદ્ધં સદદ્વૈતં ન બાધ્યતે ।
અન્તકાલેઽપ્યતો ભૂતવિવેકાન્નિર્વૃતિઃ સ્થિતા ॥ ૧૦૩॥

ઇતિ ભૂતવિવેકનામ દ્વિતીયઃ પરિચ્છેદઃ ॥ ૨॥

## ૩. પઞ્ચકોષવિવેકોનામ - તૃતીયઃ પરિચ્છેદઃ ।

ગુહાહિતં બ્રહ્મ યત્તત્પઞ્ચકોષ વિવેકતઃ ।
બોદ્ધું શક્યં તતઃ કોષપઞ્ચકં પ્રવિવિચ્યતે ॥ ૧॥

દેહાદભ્યન્તરઃ પ્રાણઃ પ્રાણાદભ્યન્તરં મનઃ ।
તતઃ કર્તા તતો ભોક્તા ગુહા સેયં પરમ્પરા ॥ ૨॥

પિતૃભુક્તાન્નજાદ્વીર્યાજ્જાતોઽન્નેનૈવ વર્ધતે ।
દેહઃ સોઽન્નમયો નાત્મા પ્રાક્ચોર્ધ્વં તદભાવતઃ ॥ ૩॥

પૂર્વજન્મન્યસત્ત્વે તજ્જન્મ સમ્પાદયેત્કથમ્ ।

ભાવિજન્મન્યસત્કર્મ ન ભુઞ્જીતેહ સંચિતમ્ ॥ ૪॥

પૂર્ણો દેહે બલં યચ્છન્નક્ષાણાં યઃ પ્રવર્તકઃ ।
વાયુઃ પ્રાણમયો નાસાવાત્મા ચૈતન્યવર્જનાત્ ॥ ૫॥

અહન્તાં મમતાં દેહે ગૃહાદૌ ચ કરોતિ યઃ ।
કામાદ્યવસ્થયા ભ્રાન્તો નાસાવાત્મા મનોમયઃ ॥ ૬॥

લીના સુપ્તૌ વપુર્બોધે વ્યાપ્નુયાદાનખાગ્રગા ।
ચિચ્છાયોપેતધીર્નાત્મા વિજ્ઞાનમયશબ્દભાક્ ॥ ૭॥

કર્તૃત્વકરણત્વાભ્યાં વિક્રિયેતાન્તરિન્દ્રિયમ્ ।
વિજ્ઞાનમનસી અન્તર્બહિશ્ચૈતે પરસ્પરમ્ ॥ ૮॥

કાચિદન્તર્મુખા વૃત્તિરાનન્દપ્રતિબિમ્બભાક્ ।
પુણ્યભોગે ભોગશાન્તૌ નિદ્રારૂપેણ લીયતે ॥ ૯॥

કાદાચિત્કત્વતો નાત્મા સ્યાદાનન્દમયોઽપ્યયમ્ ।
બિમ્બભૂતો ય આનન્દ આત્માસૌ સર્વદા સ્થિતેઃ ॥ ૧૦॥

નનુ દેહમુપક્રમ્ય નિદ્રાનન્દાન્તવસ્તુષુ ।
માભૂદાત્મત્વમન્યસ્તુ ન કશ્ચિદનુભૂયતે ॥ ૧૧॥

બાઢં નિદ્રાદયઃ સર્વેઽનુભૂયન્તે ન ચેતરઃ ।
તથાપ્યેતેઽનુભૂયન્તે યેન તં કો નિવારયેત્ ॥ ૧૨॥

સ્વયમેવાનુભૂતિત્વાદ્વિદ્યતે નાનુભાવ્યતા ।
જ્ઞાતૃજ્ઞાનાન્તરાભાવાદજ્ઞેયો ન ત્વસત્તયા ॥ ૧૩॥

માધુર્યાદિસ્વભાવાનામન્યત્ર સ્વગુણાર્પિણામ્ ।
સ્વસ્મિંસ્તદર્પણાપેક્ષા નો ન ચાસ્તાન્યદર્પકમ્ ॥ ૧૪॥

અર્પકાન્તરરાહિત્યેપ્યસ્ત્યેષાં તત્સ્વભાવતા ।
માભૂત્તથાનુભાવ્યત્વં બોધાત્મા તુ ન હીયતે ॥ ૧૫॥

સ્વયંજ્યોતિર્ભવત્યેષ પુરોઽસ્માત્ભાસતેઽખિલાત્ ।
તમેવ ભાન્તમન્વેતિ તદ્ભાસા ભાસતે જગત્ ॥ ૧૬॥

યેનેદં જાનતે સર્વં તં કેનાન્યેન જાનતામ્ ।
વિજ્ઞાતારં કેન વિદ્યાચ્છક્તં વેદ્યે તુ સાધનમ્ ॥ ૧૭॥

સ વેત્તિ વેદ્યં તત્સર્વં નાન્યસ્તસ્યાસ્તિ વેદિતા ।
વિદિતાવિદિતાભ્યાં તત્પૃથક્બોધસ્વરૂપકમ્ ॥ ૧૮॥

બોધેઽપ્યનુભવો યસ્ય ન કથંચન જાયતે ।
તં કથં બોધયેચ્છાસ્ત્રં લોષ્ટં નરસમાકૃતિમ્ ॥ ૧૯॥

જિહ્વા મેઽસ્તિ ન વેત્યુક્તિર્લજ્જાયૈ કેવલં યથા ।
ન બુધ્યતે મયા બોધો બોદ્ધવ્ય ઇતિ તાદૃષી ॥ ૨૦॥

યસ્મિન્યસ્મિન્નસ્તિ લોકે બોધસ્તત્તદુપેક્ષણે ।
યદ્બોધમાત્રં તદ્બ્રહ્મેત્યેવં ધીર્બ્રહ્મનિશ્ચયઃ ॥ ૨૧॥

પઞ્ચકોષપરિત્યાગે સાક્ષિબોધાવશેષતઃ ।
સ્વસ્વરૂપં સ એવ સ્યાચ્છૂન્યત્વં તસ્ય દુર્ઘટમ્ ॥ ૨૨॥

અસ્તિ તાવત્સ્વયં નામ વિવાદાવિષયત્વતઃ ।
સ્વસ્મિન્નપિ વિવાદશ્ચેત્પ્રતિવાદ્યત્ર કો ભવેત્ ॥ ૨૩॥

સ્વાસત્ત્વન્તુ ન કસ્મૈચિદ્રોચતે વિભ્રમં વિના ।
અતએવ શ્રુતિર્બાધં બ્રૂતે ચાસત્ત્વવાદિનઃ ॥ ૨૪॥

અસદ્બ્રહ્મેતિ ચેદ્વેદ સ્વયમેવ ભવેદસન્ ।
અતોઽસ્ય માભૂદ્વેદ્યત્વં સ્વસત્ત્વન્ત્વભ્યુપેયતામ્ ॥ ૨૫॥

કીદૃક્તર્હીતિ ચેત્પૃચ્છેદીદૃક્તા નાસ્તિ તત્ર હિ ।
યદનીદૃગતાદૃક્ચ તત્સ્વરૂપં વિનિશ્ચિનુ ॥ ૨૬॥

અક્ષાણાં વિષયસ્ત્વીદૃક્પરોક્ષસ્તાદૃગુચ્યતે ।
વિષયો નાક્ષવિષયઃ સ્વત્ત્વાન્નાસ્યપરોક્ષતા ॥ ૨૭॥

અવેદ્યોઽપ્યપરોક્ષોઽતઃ સ્વપ્રકાશો ભવત્યયમ્ ।
સત્યં જ્ઞાનમનન્તં ચેત્યસ્તીહ બ્રહ્મલક્ષણમ્ ॥ ૨૮॥

સત્યત્વં બાધરાહિત્યં જગદ્બાધૈકસાક્ષિણઃ ।
બાધઃ કિંસાક્ષિકો બ્રૂહિ ન ત્વસાક્ષિક ઇષ્યતે ॥ ૨૯॥

અપનીતેષુ મૂર્તેષુ હ્યમૂર્તં શિષ્યતે વિયત્ ।
શક્યેષુ બાધિતેષ્વન્તે શિષ્યતે યત્તદેવ તત્ ॥ ૩૦॥

સર્વબાધે ન કિંચિચ્ચેદ્યન્ન કિંચિત્ તદેવ તત્ ।
ભાષા એવાત્ર ભિદ્યન્તે નિર્બાધં તાવદસ્તિ હિ ॥ ૩૧॥

અત એવ શ્રુતિર્બાધ્યં બાધિત્વા શેષયત્યદઃ ।
સ એષ નેતિ નેત્યાત્મેત્યતદ્વ્યાવૃત્તિરૂપતઃ ॥ ૩૨॥

ઇદં રૂપં તુ યદ્યાવ તત્ત્યક્તું શક્યતેઽખિલમ્ ।
અશક્યો હ્યનિદં રૂપઃ સ આત્મા બાધવર્જિતઃ ॥ ૩૩॥

સિદ્ધં બ્રહ્મણિ સત્યત્વં જ્ઞાનત્વં તુ પુરોદિતમ્ ।
સ્વયમેવાનુભૂતિત્વાદિત્યાદિવચનૈઃ સ્ફુટમ્ ॥ ૩૪॥

ન વ્યાપિત્વાદ્દેશતોઽન્તો નિત્યત્વાન્નાપિ કાલતઃ ।
ન વસ્તુતોઽપિ સર્વાત્મ્યાદાનન્ત્યં બ્રહ્મણિ ત્રિધા ॥ ૩૫॥

દેશકાલાન્યવસ્તૂનાં કલ્પિતત્વાચ્ચ માયયા ।
ન દેષાદિકૃતોઽન્તોઽસ્તિ બ્રહ્માનન્ત્યં સ્ફુટન્તતઃ ॥ ૩૬॥

સત્યં જ્ઞાનમનન્તં યદ્બ્રહ્મ તદ્વસ્તુ તસ્ય તત્ ।
ઈશ્વરત્વન્તુ જીવત્વમુપાધિદ્વયકલ્પિતમ્ ॥ ૩૭॥

શક્તિરસ્ત્યૈશ્વરી કાચિત્સર્વવસ્તુનિયામિકા ।
આનન્દમયમારભ્ય ગૂઢા સર્વેષુ વસ્તુષુ ॥ ૩૮॥

વસ્તુધર્મા નિયમ્યેરં શક્ત્યા નૈવ યદા તદા ।
અન્યોન્યધર્મસાંકર્યાદ્વિપ્લવેત જગત્ખલુ ॥ ૩૯॥

ચિચ્છાયાવેશતઃ શક્તિશ્ચેતનેવ વિભાતિ સા ।
તચ્છક્ત્યુપાધિસંયોગાદ્બ્રહ્મૈવેશ્વરતાં વ્રજેત્ ॥ ૪૦॥

કોષોપાધિવિવક્ષાયાં યાતિ બ્રહ્મૈવ જીવતામ્ ।
પિતા પિતામહશ્ચૈકઃ પુત્રપૌત્રૌ યથા પ્રતિ ॥ ૪૧॥

પુત્રાદેરવિવક્ષાયાં ન પિતા ન પિતામહઃ ।
તદ્વન્નેશો નાપિ જીવઃ શક્તિકોષાવિવક્ષણે ॥ ૪૨॥

ય એવં બ્રહ્મ વેદૈષ બ્રહ્મૈવ ભવતિ સ્વયમ્ ।
બ્રહ્મણો નાસ્તિ જન્માતઃ પુનરેષ ન જાયતે ॥ ૪૩॥

ઇતિ પઞ્ચકોષોવિવેકોનામ તૃતીયઃ પરિચ્છેદઃ ॥ ૩॥

## ૪. દ્વૈતવિવેકો નામ - ચતુર્થઃ પરિચ્છેદઃ ।

ઈશ્વરેણાપિ જીવેન સૃષ્ટં દ્વૈતં પ્રપઞ્ચ્યતે ।
વિવેકે સતિ જીવેન હેયો બન્ધઃ સ્ફુટીભવેત્ ॥ ૧॥

માયાં તુ પ્રકૃતિં વિદ્યાન્માયિનં તુ મહેશ્વરમ્ ।
સ માયી સૃજતીત્યાહુઃ શ્વેતાશ્વતર શાખિનઃ ॥ ૨॥

આત્મા વા ઇદમગ્રેઽભૂત્સ ઐક્ષત સૃજા ઇતિ ।
સઙ્કલ્પેનાસૃજલ્લોકાન્સ એતાનિતિ બહ્વૃચાઃ ॥ ૩॥

ખંવાય્વગ્નિજલોર્વ્યોષધ્યન્નદેહાઃ ક્રમાદમી ।
સમ્ભૂતા બ્રહ્મણસ્તસ્માદેતસ્માદાત્મનોઽખિલાઃ ॥ ૪॥

બહુ સ્યામહમેવાતઃ પ્રજાયેયેતિ કામતઃ ।
તપસ્તપ્ત્વાઽસૃજત્સર્વં જગદિત્યાહ તૈત્તિરિઃ ॥ ૫॥

ઇદમગ્રે સદેવાસીદ્બહુત્વાય તદૈક્ષત ।
તેજોઽવન્નાણ્ડજાદીનિ સસર્જેતિ ચ સામગાઃ ॥ ૬॥

વિસ્ફુલિઙ્ગા યથા વહ્નેર્જાયન્તેઽક્ષરતસ્તથા ।
વિવિધાશ્ચિજ્જડા ભાવા ઇત્યાથર્વણિકી શ્રુતિઃ ॥ ૭॥

જગદવ્યાકૃતં પૂર્વમાસીદ્વ્યાક્રિયતેઽધુના ।
દૃશ્યાભ્યાં નામરૂપાભ્યાં વિરાડાદિષુ તે સ્ફુટાઃ ।
વિરાણ્મનુર્નરો ગાવઃ ખરાશ્વાજાવયસ્તથા ।
પિપીલિકાવધિદ્વન્દ્વમિતિ વાજસનેયિનઃ ॥ ૮॥

કૃત્વા રૂપાન્તરં જૈવં દેહે પ્રાવિશદીશ્વરઃ ।
ઇતિ તાઃ શ્રુતયઃ પ્રાહુ જીવત્વં પ્રાણધારણાત્ ॥ ૯॥

ચૈતન્યં યદધિષ્ઠાનં લિઙ્ગદેહશ્ચ યઃ પુનઃ ।
ચિચ્છાયા લિઙ્ગદેહસ્થા તત્સંઘોજીવ ઉચ્યતે ॥ ૧૦॥

માહેશ્વરી તુ યા માયા તસ્યા નિર્માણશક્તિવત્ ।
વિદ્યતે મોહશક્તિશ્ચ તં જીવં મોહયત્યસૌ ॥ ૧૧॥

મોહાદનીશતાં પ્રાપ્ય મગ્નો વપુષિ શોચતિ ।
ઈશસૃષ્ટમિદં દ્વૈતં સર્વમુક્તં સમાસતઃ ॥ ૧૨॥

સપ્તાન્નબ્રાહ્મણે દ્વૈતં જીવસૃષ્ટં પ્રપઞ્ચિતમ્ ।

અન્નાનિ સપ્તજ્ઞાનેન કર્મણાજનયત્પિતા ॥ ૧૩॥

મર્ત્યાનામેકં દેવાન્ને દ્વે પશ્વાન્નં ચતુર્થકમ્ ।
અન્નત્રિતયમાત્માર્થમન્નાનાં વિનિયોજનમ્ ॥ ૧૪॥

વ્રીહ્યાદિકં દર્શપૂર્ણમાસૌ ક્ષીરં તથા મનઃ ।
વાક્પ્રાણશ્ચેતિ સપ્તત્વમન્નાનામવગમ્યતામ્ ॥ ૧૫॥

ઈશેન યદ્યપ્યેતાનિ નિર્મિતાનિ સ્વરૂપતઃ ।
તથાપિ જ્ઞાનકર્માભ્યાં જીવો કાર્ષીત્તદન્નતામ્ ॥ ૧૬॥

ઈશકાર્યં જીવભોગ્યં જગદ્દ્વાભ્યાં સમન્વિતમ્ ।
પિતૃજન્યા ભર્તૃભોગ્યા યથા યોષિત્તથેષ્યતામ્ ॥ ૧૭॥

માયાવૃત્ત્યાત્મકો હીશસંકલ્પઃ સાધનં જનૌ ।
મનો વૃત્ત્યાત્મકો જીવો સંકલ્પો ભોગસાધનમ્ ॥ ૧૮॥

ઈશનિર્મિતમણ્યાદૌ વસ્તુન્યેકવિધે સ્થિતે ।
ભોક્તૃધીવૃત્તિનાનાત્વાત્તદ્ભોગો બહુધેષ્યતે ॥ ૧૯॥

હૃષ્યત્યેકો મણિં લબ્ધ્વા ક્રુદ્ધ્યત્યન્યો હ્યલાભતઃ ।
પશ્યત્યેવ વિરક્તોઽત્ર ન હૃષ્યતિ ન કુપ્યતિ ॥ ૨૦॥

પ્રિયોઽપ્રિય ઉપેક્ષ્યશ્ચેત્યાકારા મણિગાસ્ત્રયઃ ।
સૃષ્ટા જીવૈરીશસૃષ્ટં રૂપં સાધારણં ત્રિષુ ॥ ૨૧॥

ભાર્યા સ્નુષા નનાન્દા ચ યાતા માતેત્યનેકધા ।
પ્રતિયોગિધિયા યોષિદ્ભિદ્યતે ન સ્વરૂપતઃ ॥ ૨૨॥

નનુ જ્ઞાનાનિ ભિદ્યન્તામાકારસ્તુ ન ભિદ્યતે ।
યોષિદ્વપુષ્યતિશયો ન દૃષ્ટો જીવનિર્મિતઃ ॥ ૨૩॥

મૈવં માંસમયી યોષિત્કાચિદન્યા મનોમયી ।
માંસમય્યા અભેદેઽપિ ભિદ્યતેઽત્ર મનોમયી ॥ ૨૪॥

ભ્રાન્તિસ્વપ્નમનોરાજ્યસ્મૃતિષ્વસ્તુ મનોમયમ્ ।
જાગ્રન્માનેન મેયસ્ય ન મનોમયતેતિ ચેત્ ॥ ૨૫॥

બાધં માને તુ મેયેન યોગાત્સ્યાદ્વિષયાકૃતિઃ ।
ભાષ્યવાર્તિકકારાભ્યામયમર્થ ઉદાહૃતઃ ॥ ૨૬॥

મૂષાસિક્તં યથા તામ્રં તન્નિભં જાયતે તથા ।
રૂપાદીન્ વ્યાપ્નુવચ્ચિત્તં તન્નિભં દૃશ્યતે ધ્રુવમ્ ॥ ૨૭॥

વ્યઞ્જકો વા યથા લોકો વ્યઙ્ગ્યસ્યાકારતામિયાત્ ।
સર્વાર્થવ્યઞ્જકત્વાદ્ધીરર્થાકારા પ્રદૃશ્યતે ॥ ૨૮॥

માતુર્માનાભિનિષ્પત્તિર્નિષ્પન્નં મેયમેતિ તત્ ।
મેયાભિસંગતં તચ્ચ મેયાભત્વં પ્રપદ્યતે ॥ ૨૯॥

સત્યેવં વિષયૌ દ્વૌ સ્તો ઘટૌ મૃણ્મયધીમયૌ ।
મૃણ્મયો માનમેયઃ સ્યાત્સાક્ષિભાષ્યસ્તુ ધીમયઃ ॥ ૩૦॥

અન્વયવ્યતિરેકાભ્યાં ધીમયો જીવબન્ધકૃત્ ।
સત્યસ્મિન્સુખદુઃખે સ્ત સ્તસ્મિન્નસતિ ન દ્વયમ્ ॥ ૩૧॥

અસત્યપિ ચ બાહ્યાર્થે સ્વપ્નાદૌ બધ્યતે નરઃ ।
સમાધિસુપ્તિમૂર્ચ્છાસુ સત્યપ્યસ્મિન્ન બધ્યતે ॥ ૩૨॥

દૂરદેશં ગતે પુત્રે જીવત્યેવાત્ર તત્પિતા ।
વિપ્રલમ્ભકવાક્યેન મૃતં મત્વા પ્રરોદિતિ ॥ ૩૩॥

મૃતેઽપિ તસ્મિન્વાર્તાયામશ્રુતાયાં ન રોદિતિ ।
અતઃ સર્વસ્ય જીવસ્ય બન્ધકૃન્માનસં જગત્ ॥ ૩૪॥

વિજ્ઞાનવાદો બાહ્યાર્થવૈયર્થ્યાત્સ્યાદિહેતિ ચેત્ ।
ન હૃદ્યાકારમાધાતું બાહ્યસ્યાપેક્ષિતત્ત્વતઃ ॥ ૩૫॥

વૈયાર્થ્યમસ્તુ વા બાહ્યં ન વારયિતુમીશ્મહે ।
પ્રયોજનમપેક્ષન્તે ન માનાનિતિ હિ સ્થિતિઃ ॥ ૩૬॥

બન્ધશ્ચેન્માનસં દ્વૈતં તન્નિરોધેન શામ્યતિ ।
અભ્યાસેદ્યોગમેવાતો બ્રહ્મજ્ઞાનેન કિં વદ ॥ ૩૭॥

તાત્કાલિક દ્વૈતશાન્તાવપ્યાગામીજનીક્ષયઃ ।
બ્રહ્મજ્ઞાનં વિના ન સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૩૮॥

અનિવૃત્તેઽપીશસૃષ્ટે દ્વૈતે તસ્ય મૃષાત્મતામ્ ।
બુદ્ધ્વા બ્રહ્માદ્વયં બોદ્ધું શક્યં વસ્ત્વૈક્યવાદિના ॥ ૩૯॥

પ્રલયે તન્નિવૃત્તૌ તુ ગુરુશાસ્ત્રાદ્યભાવતઃ ।
વિરોધિદ્વૈતાભાવેઽપિ ન શક્યં બોદ્ધુમદ્વયમ્ ॥ ૪૦॥

અબાધકં સાધકં ચ દ્વૈતમીશ્વરનિર્મિતમ્ ।
અપનેતુમશક્યં ચેત્યાસ્તાં તદ્વિષ્યતે કુતઃ ॥ ૪૧॥

જીવદ્વૈતં તુ શાસ્ત્રીયમશાસ્ત્રીયમિતિ દ્વિધા ।
ઉપાદદીતા શાસ્ત્રીયમાતત્ત્વસ્યાવબોધનાત્ ॥ ૪૨॥

આત્મબ્રહ્મવિચારાખ્યં શાસ્ત્રીયં માનસં જગત્ ।
બુદ્ધે તત્ત્વે તચ્ચ હેયમિતિ શ્રુત્યનુશાસનમ્ ॥ ૪૩॥

શાસ્ત્રાણ્યધીત્ય મેધાવી અભ્યસ્ય ચ પુનઃ પુનઃ ।
પરમં બ્રહ્મ વિજ્ઞાય ઉલ્કાવત્તાન્યથોત્સૃજેત્ ॥ ૪૪॥

ગ્રન્થમભ્યસ્ય મેધાવી જ્ઞાનવિજ્ઞાનતત્પરઃ ।
પલાલમિવ ધાન્યાર્થી ત્યજેદ્ગ્રન્થમશેષતઃ ॥ ૪૫॥

તમેવ ધીરો વિજ્ઞાય પ્રજ્ઞાં કુર્વીત બ્રાહ્મણઃ ।
નાનુધ્યાયાદ્બહૂઞ્છબ્દાન્વાચો વિગ્લાપનં હિ તત્ ॥ ૪૬॥

તમેવૈકં વિજાનીત હ્યન્યા વાચો વિમુઞ્ચથ ।
યચ્છેદ્વાઙ્મનસી પ્રાજ્ઞ ઇત્યાદ્યાઃ શ્રુતયઃ સ્ફુટાઃ ॥ ૪૭॥

અશાસ્ત્રીયમપિ દ્વૈતં તીવ્રં મન્દમિતિ દ્વિધા ।
કામક્રોધાદિકં તીવ્રં મનોરાજ્યં તથેતરત્ ॥ ૪૮॥

ઉભયં તત્ત્વબોધાત્પ્રાઙ્નિવાર્યં બોધસિદ્ધયે ।
સમઃ સમાહિતત્વં ચ સાધનેષુ શ્રુતં યતઃ ॥ ૪૯॥

બોધાદૂર્ધ્વં ચ તદ્ધેયં જીવન્મુક્તિપ્રસિદ્ધયે ।
કામાદિક્લેશબન્ધેન યુક્તસ્ય ન હિ મુક્તતા ॥ ૫૦॥

જીવન્મુક્તિરિયં મા ભુજ્જન્માભાવે ત્વહં કૃતી ।
તર્હિ જન્માપિ તેઽસ્ત્યેવ સ્વર્ગમાત્રાત્કૃતી ભવાન્ ॥ ૫૧॥

ક્ષયાતિશયદોષેણ સ્વર્ગો હેયો યદા તદા ।
સ્વયં દોષતમાત્માયં કામાદિઃ કિં ન હીયતે ॥ ૫૨॥

તત્ત્વં બુદ્ધ્વાપિ કામાદીન્નિઃશેષં ન જહાસિ ચેત્ ।
યથેષ્ટાચરણં તે સ્યાત્કર્મશાસ્ત્રાતિલઙ્ઘિનઃ ॥ ૫૩॥

બુદ્ધાદ્વૈતસતત્ત્વસ્ય યથેષ્ટાચરણં યદિ ।

શુનાં તત્ત્વદૃશાં ચૈવ કોભેદોऽશુચિભક્ષણે ॥ ૫૪॥

બોધાત્ પુરા મનોદોષમાત્રાત્ક્લિષ્ટોऽસ્યથાધુના ।
અશેષલોકનિન્દા ચેત્યહો તે બોધવૈભવમ્ ॥ ૫૫॥

વિડ્વરાહાદિતુલ્યત્વં મા કાઙ્ક્ષીસ્તત્ત્વવિદ્ ભવાન્ ।
સર્વધીદોષસંત્યાગાલ્લોકૈઃ પૂજ્યસ્વ દેવવત્ ॥ ૫૬॥

કામ્યાદિદોષદૃષ્ટ્યાદ્યાઃ કામાદિત્યાગહેતવઃ ।
પ્રસિદ્ધા મોક્ષશાસ્ત્રેષુ તાનન્વિષ્ય સુખી ભવ ॥ ૫૭॥

ત્યજ્યતામેષ કામાદિર્મનોરાજ્યે તુ કા ક્ષતિઃ ।
અશેષદોષબીજત્વાત્ ક્ષતિર્ભગવતેરિતા ॥ ૫૮॥

ધ્યાયતે વિષયાન્પુંસઃ સઙ્ગસ્તેષૂપજાયતે ।
સઙ્ગાત્સંજાયતે કામઃ કામાત્ક્રોધોऽભિજાયતે ।
ક્રોધાદ્ભવતિ સમ્મોહઃ સમ્મોહાત્સ્મૃતિવિભ્રમઃ ।
સ્મૃતિભ્રંશાદ્બુદ્ધિનાશો બુદ્ધિનાશાત્પ્રણશ્યતિ ॥ ૫૯॥

શક્યં જેતું મનોરાજ્યં નિર્વિકલ્પસમાધિતઃ ।
સુસમ્પાદઃ ક્રમાત્સોऽપિ સવિકલ્પસમાધિના ॥ ૬૦॥

બુદ્ધતત્ત્વેન ધીદોષશૂન્યેનૈકાન્તવાસિના ।
દીર્ઘં પ્રણવમુચ્ચાર્ય મનોરાજ્યં વિજીયતે ॥ ૬૧॥

જિતે તસ્મિન્ વૃત્તિશૂન્યં મનસ્તિષ્ઠતિ મૂકવત્ ।
એતત્પદં વશિષ્ઠેન રામાય બહુધેરિતમ્ ॥ ૬૨॥

દૃશ્યં નાસ્તીતિ બોધેન મનસો દૃશ્યમાર્જનમ્ ।
સમ્પન્નં ચેત્તદોત્પન્ના પરા નિર્વાણનિર્વૃતિઃ ।
વિચારિતમલં શાસ્ત્રં ચિરમુદ્ગ્રાહિતં મિથઃ ।
સન્ત્યક્તવાસનાન્મૌનાદૃતે ન્યસ્ત્યુત્તમં પદમ્ ॥ ૬૩॥

વિક્ષિપ્યતે કદાચિદ્ધીઃ કર્મણા ભોગદાયિના ।
પુનઃ સમાહિતા સા સ્યાત્તદૈવાભ્યાસપાટવાત્ ॥ ૬૪॥

વિક્ષેપો યસ્ય નાસ્ત્યસ્ય બ્રહ્મવિત્ત્વં ન મન્યતે ।
બ્રહ્મૈવાયમિતિ પ્રાહુર્મુનયઃ પારદર્શિનઃ ॥ ૬૫॥

દર્શનાદર્શને હિત્વા સ્વયં કેવલરૂપતઃ ।

યસ્તિષ્ઠતિ સ તુ બ્રહ્મન્બ્રહ્મ ન બ્રહ્મવિત્સ્વયમ્ ॥ ૬૬॥

જીવન્મુક્તેઃ પરા કાષ્ઠા જીવદ્વૈતવિવર્જનાત્ ।
લભ્યતેઽસાવતોઽત્રેદમીશદ્વૈતાદ્વિવેચિતમ્ ॥ ૬૭॥

ઇતિ દ્વૈતવિવેકનામ ચતુર્થઃ પરિચ્છેદઃ ॥ ૪॥

## ૫. મહાવાક્યવિવેકોનામ - પઞ્ચમઃ પરિચ્છેદઃ ।

યેનેક્ષતે શ‍ૃણોતીદં જિઘ્રતિ વ્યાકરોતિ ચ ।
સ્વાદ્વસ્વાદૂ વિજાનાતિ તત્પ્રજ્ઞાનમુદીરિતમ્ ॥ ૧॥

ચતુર્મુખેન્દ્રદેવેષુ મનુષ્યાશ્વશ્વગવાદિષુ ।
ચૈતન્યમેકં બ્રહ્માતઃ પ્રજ્ઞાનં બ્રહ્મમય્યપિ ॥ ૨॥

પરિપૂર્ણઃ પરાત્માસ્મિન્દેહે વિદ્યાધિકારિણિ ।
બુદ્ધેઃ સાક્ષિતયા સ્થિત્વા સ્ફુરન્નહમિતીર્યતે ॥ ૩॥

સ્વતઃ પૂર્ણઃ પરાત્માત્ર બ્રહ્મશબ્દેન વર્ણિતઃ ।
અસ્મીત્યૈક્યપરામર્શસ્તેન બ્રહ્મ ભવામ્યહમ્ ॥ ૪॥

એકમેવાદ્વિતીયં સન્નામરૂપવિવર્જિતમ્ ।
સૃષ્ટેઃ પુરાધુનાપ્યસ્ય તાદૃક્ત્વં તદિતીર્યતે ॥ ૫॥

શ્રોતુર્દેહેન્દ્રિયાતીતં વસ્ત્વત્ર ત્વં પદેરિતમ્ ।
એકતા ગૃહ્યતેઽસીતિ તદૈક્યમનુભૂયતામ્ ॥ ૬॥

સ્વપ્રકાશાપરોક્ષત્વમયમિત્યુક્તિતો મતમ્ ।
અહઙ્કારાદિદેહાન્તાત્પ્રત્યગાત્મેતિ ગીયતે ॥ ૭॥

દૃશ્યમાનસ્ય સર્વસ્ય જગતસ્તત્ત્વમીર્યતે ।
બ્રહ્મશબ્દેન તદ્બ્રહ્મ સ્વપ્રકાશાત્મરૂપકમ્ ॥ ૮॥

ઇતિ મહાવાક્યવિવેકોનામ પઞ્ચમઃ પરિચ્છેદઃ ॥ ૫॥

## ૬. ચિત્રદીપોનામ - ષષ્ઠઃ પરિચ્છેદઃ ।

યથા ચિત્રપટે દૃષ્ટમવસ્થાનાં ચતુષ્ટયમ્ ।
પરમાત્મનિ વિજ્ઞેયં તથાવસ્થાચતુષ્ટયમ્ ॥ ૧॥

યથા ધૌતો ઘટ્ટિતશ્ચ લાઞ્છિતો રઞ્જિતઃ પટઃ ।
ચિદન્તર્યામિ સૂત્રાણિ વિરાટ્ ચાત્મા તથેર્યતે ॥ ૨॥

સ્વતઃ શુભ્રોઽત્ર ધૌતઃ સ્યાદ્ઘટ્ટિતોઽન્નવિલેપનાત્ ।
મસ્યાકારૈર્લાઞ્છિતઃ સ્યાદ્રઞ્જિતો વર્ણપૂરણાત્ ॥ ૩॥

સ્વતશ્ચિદન્તર્યામી તુ માયાવી સૂક્ષ્મસૃષ્ટિતઃ ।
સૂત્રાત્મા સ્થૂલસૃષ્ટ્યૈષ વિરાડિત્યુચ્યતે પરઃ ॥ ૪॥

બ્રહ્માદ્યાઃસ્તમ્બપર્યન્તાઃ પ્રાણિનોઽત્ર જડા અપિ ।
ઉત્તમાધમભાવેન વર્તન્તે પટચિત્રવત્ ॥ ૫॥

ચિત્રાર્પિતમનુષ્યાણાં વસ્ત્રાભાસાઃ પૃથક્પૃથક્ ।
ચિત્રાધારેણ વસ્ત્રેણ સદૃશા ઇવ કલ્પિતાઃ ॥ ૬॥

પૃથક્પૃથક્ચિદાભાસાશ્ચૈતન્યાધ્યસ્તદેહિનામ્ ।
કલ્પાન્તે જીવનામાનો બહુધા સંસરન્ત્યમી ॥ ૭॥

વસ્ત્રાભાસસ્થિતાન્વર્ણાન્યદ્વદાધારવસ્ત્રગાન્ ।
વદન્ત્યજ્ઞાસ્તથા જીવસંસારં ચિદ્ગતં વિદુઃ ॥ ૮॥

ચિત્રસ્થ પર્વતાદીનાં વસ્ત્રાભાસો ન લિખ્યતે ।
સૃષ્ટિસ્થમૃત્તિકાદીનાં ચિદાભાસાસ્તથા ન હિ ॥ ૯॥

સંસારઃ પરમાર્થોઽયં સંલગ્નઃ સ્વાત્મવસ્તુનિ ।
ઇતિ ભ્રાન્તિરવિદ્યા સ્યાદ્વિદ્યયૈષા નિવર્તતે ॥ ૧૦॥

આત્માભાસસ્ય જીવસ્ય સંસારો નાત્મવસ્તુનઃ ।
ઇતિ બોધો ભવેદ્વિદ્યા લભ્યતેઽસૌ વિચારણાત્ ॥ ૧૧॥

સદા વિચારયેત્તસ્માજ્જગત્જ્જીવપરાત્મનઃ ।
જીવભાવજગદ્ભાવબાધે સ્વાત્મૈવ શિષ્યતે ॥ ૧૨॥

નાપ્રતીતિસ્તયોર્બાધઃ કિન્તુ મિથ્યાત્વનિશ્ચયઃ ।
નો ચેત્સુષુપ્તિમૂર્છાદૌ મુચ્યેતા યત્નતો જનઃ ॥ ૧૩॥

પરમાત્માવશેષોઽપિ તત્સત્યત્વવિનિશ્ચયઃ ।
ન જગદ્વિસ્મૃતિર્નો ચેજ્જીવન્મુક્તિર્ન સમ્ભવેત્ ॥ ૧૪॥

પરોક્ષા ચાપરોક્ષેતિ વિદ્યા દ્વેધા વિચારજા ।
તત્રાપરોક્ષ વિદ્યાપ્તૌ વિચારોઽયં સમાપ્યતે ॥ ૧૫॥

અસ્તિ બ્રહ્મેતિ ચેદ્વેદ પરોક્ષજ્ઞાનમેવ તત્ ।
અહં બ્રહ્મેતિ ચેદ્વેદ સાક્ષાત્કારઃ સ ઉચ્યતે ॥ ૧૬॥

તત્સાક્ષાત્કારસિદ્ધ્યર્થમાત્મતત્ત્વં વિવિચ્યતે ।
યેનાયં સર્વસંસારાત્સદ્ય એવ વિમુચ્યતે ॥ ૧૭॥

કૂટસ્થો બ્રહ્મજીવેશાવિત્યેવં ચિચ્ચતુર્વિધા ।
ઘટાકાશમહાકાશૌ જલાકાશાભ્રખે યથા ॥ ૧૮॥

ઘટાવચ્છિન્નખે નીરં યત્તત્ર પ્રતિબિમ્બિતઃ ।
સાભ્રનક્ષત્ર-આકાશો જલાકાશ-ઉદીર્યતે ॥ ૧૯॥

મહાકાશસ્ય મધ્યે યન્મેઘમણ્ડલમીક્ષ્યતે ।
પ્રતિબિમ્બતયા તત્ર મેઘાકાશો જલે સ્થિતઃ ॥ ૨૦॥

મેઘાંશરૂપમુદકં તુષારાકારસંસ્થિતમ્ ।
તત્ર ખપ્રતિબિમ્બોઽયં નીરત્વાદનુમીયતે ॥ ૨૧॥

અધિષ્ઠાનતયા દેહદ્વયાવચ્છિન્નચેતનઃ ।
કૂટવન્નિર્વિકારેણ સ્થિતઃ કૂટસ્થ-ઉચ્યતે ॥ ૨૨॥

કૂટસ્થે કલ્પિતા બુદ્ધિસ્તત્ર ચિત્ પ્રતિબિમ્બકઃ ।
પ્રાણાનાં ધારણાજ્જીવઃ સંસારેણ સ યુજ્યતે ॥ ૨૩॥

જલવ્યોમ્ના ઘટાકાશોયથા સર્વસ્તિરોહિતઃ ।
તથા જીવેન કૂટસ્થઃ સોઽન્યોઽન્યાધ્યાસ ઉચ્યતે ॥ ૨૪॥

અયં જીવો ન કૂટસ્થં વિવિનક્તિ કદાચન ।
અનાદિરવિવેકોઽયં મૂલાવિદ્યેતિ ગમ્યતામ્ ॥ ૨૫॥

વિક્ષેપાવૃતિરૂપાભ્યાં દ્વિધાવિદ્યા પ્રકલ્પિતા ।
ન ભાતિ નાસ્તિ કૂટસ્થ ઇત્યાપાદનમાવૃતિઃ ॥ ૨૬॥

અજ્ઞાની વિદુષા પૃષ્ટઃ કૂટસ્થં ન પ્રબુધ્યતે ।
ન ભાતિ નાસ્તિ કૂટસ્થ ઇતિ બુદ્ધ્વા વદત્યપિ ॥ ૨૭॥

સ્વપ્રકાશે કુતોઽવિદ્યા તાં વિના કથમાવૃતિઃ ।
ઇત્યાદિતર્કજાલાનિ સ્વાનુભૂતિર્ગ્રસત્યસૌ ॥ ૨૮॥

સ્વાનુભૂતાવવિશ્વાસે તર્કસ્યાપ્યનવસ્થિતે ।

કથં વા તાર્કિકંમન્યસ્તત્ત્વનિશ્ચયમાપ્નુયાત્ ॥ ૨૯॥

બુદ્ધ્યારોહાય તર્કશ્ચેદપેક્ષેત તથા સતિ ।
સ્વાનુભૂતિયનુસારેણ તર્ક્યતાં મા કુતર્ક્યતામ્ ॥ ૩૦॥

સ્વાનુભૂતિરવિદ્યાયામાવૃતૌ ચ પ્રદર્શિતા ।
અતઃ કૂટસ્થચૈતન્યમવિરોધીતિ તર્ક્યતામ્ ॥ ૩૧॥

તચ્ચેદ્વિરોધિ કેનઐયમાવૃતિર્હ્યનુભૂયતામ્ ।
વિવેકસ્તુ વિરોધીસ્યાત્તત્ત્વજ્ઞાનિનિ દૃશ્યતામ્ ॥ ૩૨॥

અવિદ્યાવૃતકૂટસ્થે દેહદ્વયયુતા ચિતિઃ ।
શુક્તૌ રૂપ્યવદધ્યસ્તા વિક્ષેપાધ્યાસ એવ હિ ॥ ૩૩॥

ઇદમંશસ્ય સત્યત્વં શુક્તિગં રૂપ્ય ઈક્ષ્યતે ।
સ્વયન્ત્વં વસ્તુતા ચૈવં વિક્ષેપે વીક્ષ્યતેઽન્યગમ્ ॥ ૩૪॥

નીલપૃષ્ઠત્રિકોણત્વં યથા શુક્તૌ તિરોહિતમ્ ।
અસઙ્ગાનન્દતાદ્યેવં કૂટસ્થેઽપિ તિરોહિતમ્ ॥ ૩૫॥

આરોપિતસ્ય દૃષ્ટાન્તે રૂપ્યં નામ યથા તથા ।
કૂટસ્થાધ્યસ્તવિક્ષેપનામાહમિતિ નિશ્ચયઃ ॥ ૩૬॥

ઇદમંશં સ્વતઃ પશ્યન્ રૂપ્યમિત્યભિમન્યતે ।
તથા સ્વં ચ સ્વતઃ પશ્યન્નહમિત્યભિમન્યતે ॥ ૩૭॥

ઇદંત્વરૂપ્યતે ભિન્ને સ્વત્વાહન્તે તથેક્ષ્યતામ્ ।
સામાન્યં ચ વિશેષશ્ચેત્યુભયત્રાપિ ગમ્યતે ॥ ૩૮॥

દેવદત્તઃ સ્વયં ગચ્છેત્ત્વં વીક્ષસ્વ સ્વયં તથા ।
અહં સ્વયં ન શક્નોમીત્યેવં લૌકે પ્રયુજ્યતે ॥ ૩૯॥

ઇદં રૂપ્યમિદં વસ્ત્રમિતિ યદ્વદિદં તથા ।
અસૌ ત્વમહમિત્યેષુ સ્વયમિત્યભિમન્યતે ॥ ૪૦॥

અહન્ત્વાદ્ભિદ્યતાં સ્વત્વં કૂટસ્થે તેન કિં તવ ।
સ્વયં શબ્દાર્થ એવૈષ કૂટસ્થ ઇતિ મે ભવેત્ ॥ ૪૧॥

અન્યત્વવારકં સ્વત્વમિતિ ચેદન્યવારણમ્ ।
કૂટસ્થસ્યાત્મતાં વક્તુરિષ્ટમેવ હિ તદ્ભવેત્ ॥ ૪૨॥

સ્વયમાત્મેતિ પર્યાયસ્તેન લોકે તયોઃ સહ ।
પ્રયોગો નાસ્ત્યતઃ સ્વત્વમાત્મત્વં ચાન્યવારકમ્ ॥ ૪૩॥

ઘટઃ સ્વયં ન જાનાતીત્યેવં સ્વત્વં ઘટાદિષુ ।
અચેતનેષુ દૃષ્ટં ચેદ્દૃશ્યતામાત્મસત્ત્વતઃ ॥ ૪૪॥

ચેતનાચેતનભિદા કૂટસ્થાત્મકૃતા ન હિ ।
કિન્તુ બુદ્ધિકૃતાભાસકૃતૈવેત્યવગમ્યતામ્ ॥ ૪૫॥

યથા ચેતન આભાસઃ કૂટસ્થે ભ્રાન્તિકલ્પિતઃ ।
અચેતનો ઘટાદિશ્ચ તથા તત્રૈવ કલ્પિતઃ ॥ ૪૬॥

તત્ત્વેદન્તેઽપિ સ્વત્વમિવ ત્વમહમાદિષુ ।
સર્વત્રાનુગતે તેન તયોરપ્યાત્મતેતિ ચેત્ ॥ ૪૭॥

તે આત્મત્વેઽપ્યનુગતે તત્ત્વેદન્તે તતસ્તયોઃ ।
આત્મત્વં નૈવ સમ્ભાવ્યં સમ્યક્ત્વાદેર્યથા તથા ॥ ૪૮॥

તત્ત્વેદન્તે સ્વતાન્યત્વે ત્વન્તાહન્તે પરસ્પરમ્ ।
પ્રતિદ્વન્દ્વિતયા લોકે પ્રસિદ્ધેનાસ્તિ સંશયઃ ॥ ૪૯॥

અન્યતાયાઃ પ્રતિદ્વન્દ્વી સ્વયં કૂટસ્થ ઇષ્યતામ્ ।
ત્વંતાયાઃ પ્રતિયોગ્યેષોઽહમિત્યાત્મનિ કલ્પિતઃ ॥ ૫૦॥

અહંતાસ્વત્વયોર્ભેદે રૂપ્યતેદન્તયોરિવ ।
સ્પષ્ટેઽપિ મોહમાપન્ના એકત્વં પ્રતિપેદિરે ॥ ૫૧॥

તાદાત્મ્યાધ્યાસ એવાત્ર પૂર્વોક્તાવિદ્યયા કૃતઃ ।
અવિદ્યાયાં નિવૃત્તાયાં તત્કાર્યં વિનિવર્તતે ॥ ૫૨॥

અવિદ્યાવૃતિતાદાત્મ્યે વિદ્યયૈવ વિનશ્યતઃ ।
વિક્ષેપસ્ય સ્વરૂપં તુ પ્રારબ્ધક્ષયમીક્ષ્યતે ॥ ૫૩॥

ઉપાદાને વિનષ્ટેઽપિ ક્ષણં કાર્યં પ્રતીક્ષ્યતે ।
ઇત્યાહુસ્તાર્કિકાસ્તદ્વદસ્માકં કિં ન સમ્ભવેત્ ॥ ૫૪॥

તન્તૂનાં દિનસંખ્યાનાં તૈસ્તાદૃક્ક્ષણ ઈરિતઃ ।
ભ્રમસ્યાસંખ્યકલ્પસ્ય યોગ્યઃ ક્ષણ ઇહેષ્યતામ્ ॥ ૫૫॥

વિના ક્ષોદક્ષમં માનં તૈર્વૃથા પરિકલ્પ્યતે ।
શ્રુતિયુક્ત્યનુભૂતિભ્યો વદતાં કિન્નુ દુઃશકમ્ ॥ ૫૬॥

આસ્તાં દુસ્તાર્કિકૈઃ સાકં વિવાદઃ પ્રકૃતં બ્રુવે ।
સ્વાહમોઃ સિદ્ધમેકત્વં કૂટસ્થપરિણામિનોઃ ॥ ૫૭ ॥

ભ્રામ્યન્તે પણ્ડિતંમન્યાઃ સર્વે લૌકિકતાર્કિકાઃ ।
અનાદૃત્ય શ્રુતિં મૌર્ખ્યાત્કેવલાં યુક્તિમાશ્રિતાઃ ॥ ૫૮ ॥

પૂર્વાપરપરામર્શવિકલાસ્તત્ર કેચન ।
વાક્યાભાસાન્સ્વસ્વપક્ષે યોજયન્ત્યપ્યલજ્જયા ॥ ૫૯ ॥

કૂટસ્થાદિશરીરાન્તસંઘાતસ્યાત્મતાં જગુઃ ।
લોકાયતાઃ પામરાશ્ચ પ્રત્યક્ષાભાસમાશ્રિતાઃ ॥ ૬૦ ॥

શ્રૌતીકર્તું સ્વપક્ષન્તે કોષમન્નમયં તથા ।
વિરોચનસ્ય સિદ્ધાન્તં પ્રમાણં પ્રતિજજ્ઞિરે ॥ ૬૧ ॥

જીવાત્મનિર્ગમે દેહમરણસ્યાત્ર દર્શનાત્ ।
દેહાતિરિક્ત એવાત્મેત્યાહુર્લોકાયતાઃ પરે ॥ ૬૨ ॥

પ્રત્યક્ષત્વેનાભિમતાહં ધીર્દેહાતિરેકિણમ્ ।
ગમયેદિન્દ્રિયાત્માનં વચ્મીત્યાદિપ્રયોગતઃ ॥ ૬૩ ॥

વાગાદિનામિન્દ્રિયાણાં કલહઃ શ્રુતિષુ શ્રુતઃ ।
તેન ચૈતન્યમેતેષામાત્મત્વં તત એવ હિ ॥ ૬૪ ॥

હૈરણ્યગર્ભાઃ પ્રાણાત્મવાદિનસ્ત્વેવમૂચિરે ।
ચક્ષુરાદ્યક્ષલોપેઽપિ પ્રાણસત્ત્વે તુ જીવતિ ॥ ૬૫ ॥

પ્રાણો જાગર્તિ સુપ્તેષુ પ્રાણશ્રૈષ્ઠ્યાદિકં શ્રુતમ્ ।
કોષઃ પ્રાણમયઃ સમ્યગ્વિસ્તરેણ પ્રપઞ્ચિતઃ ॥ ૬૬ ॥

મન આત્મા ઇતિ મન્યન્ત ઉપાસનપરા જનાઃ ।
પ્રાણસ્યાભોક્તૃતા સ્પષ્ટા ભોક્તૃત્વં મનસસ્તતઃ ॥ ૬૭ ॥

મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ ।
શ્રુતો મનોમયઃ કોષસ્તેનાત્મેતીરિતં મનઃ ॥ ૬૮ ॥

વિજ્ઞાનમાત્મેતિ પર આહુઃ ક્ષણિકવાદિનઃ ।
યતોવિજ્ઞાનમૂલત્વં મનસો ગમ્યતે સ્ફુટમ્ ॥ ૬૯ ॥

અહં વૃત્તિરિદં વૃત્તિરિત્યન્તઃકરણં દ્વિધા ।

વિજ્ઞાનં સ્યાદહંવૃત્તિરિદંવૃત્તિર્મનો ભવેત્ ॥ ૭૦॥

અહંપ્રત્યયબીજત્વમિદંવૃત્તેરિતિસ્ફુટમ્ ।
અવિદિત્વા સ્વમાત્માનં બાહ્યં વેદ ન તુ ક્વચિત્ ॥ ૭૧॥

ક્ષણે ક્ષણે જન્મનાશાવહંવૃત્તિર્મિતૌ યતઃ ।
વિજ્ઞાનં ક્ષણિકં તેન સ્વપ્રકાશં સ્વતો મિતેઃ ॥ ૭૨॥

વિજ્ઞાનમયકોશોઽયં જીવ ઇત્યાગમા જગુઃ ।
સર્વસંસાર એતસ્ય જન્મનાશસુખાદિકઃ ॥ ૭૩॥

વિજ્ઞાનં ક્ષણિકં નાત્મા વિદ્યુદભ્રનિમેષવત્ ।
અન્યસ્યાનુપલબ્ધત્વાચ્છૂન્યં માધ્યમિકા જગુઃ ॥ ૭૪॥

અસદેવેદમિત્યાદાવિદમેવ શ્રુતં તતઃ ।
જ્ઞાનજ્ઞેયાત્મકં સર્વં જગદ્ભ્રાન્તિપ્રકલ્પિતમ્ ॥ ૭૫॥

નિરધિષ્ઠાનવિભ્રાન્તેરભાવાદાત્મનોઽસ્તિતા ।
શૂન્યસ્યાપિ સસાક્ષિત્વાદન્યથા નોક્તિરસ્ય તે ॥ ૭૬॥

અન્યો વિજ્ઞાનમયત આનન્દમય આન્તરઃ ।
અસ્તીત્યેવોપલબ્ધવ્ય ઇતિ વૈદિકદર્શનમ્ ॥ ૭૭॥

અણુર્મહાન્મધ્યમો વેત્યેવં તત્રાપિ વાદિનઃ ।
બહુધા વિવદન્તે હિ શ્રુતિયુક્તિસમાશ્રયાત્ ॥ ૭૮॥

અણું વદન્ત્યન્તરાલાઃ સૂક્ષ્મનાડીપ્રચારતઃ ।
રોમ્ણઃ સહસ્રભાગેન તુલ્યાસુ પ્રચરત્યયમ્ ॥ ૭૯॥

અણોરણીયાનેષોઽણુઃ સૂક્ષ્માત્સૂક્ષ્મતરં ત્વિતિ ॥

અણુત્વમાહુઃ શ્રુતયઃ શતશોઽથ સહસ્રશઃ ॥ ૮૦॥

વાલાગ્રશતભાગસ્ય શતધા કલ્પિતસ્ય ચ ।
ભાગો જીવઃ સ વિજ્ઞેય ઇતિ ચાહપરા શ્રુતિઃ ॥ ૮૧॥

દિગમ્બરા મધ્યમત્વમાહુરાપાદમસ્તકમ્ ।
ચૈતન્યવ્યાપ્તિસંદૃષ્ટેરાનખાગ્રશ્રુતેરપિ ॥ ૮૨॥

સૂક્ષ્મનાડી પ્રચારસ્તુ સૂક્ષ્મૈરવયવૈર્ભવેત્ ।
સ્થૂલદેહસ્ય હસ્તાભ્યાં કઞ્ચુકપ્રતિમોકવત્ ॥ ૮૩॥

ન્યૂનાધિકશરીરેષુ પ્રવેશોઽપિ ગમાગમૈઃ ।
આત્માંશાનાં ભવેત્તેન મધ્યમત્વં સુનિશ્ચિતમ્ ॥ ૮૪॥

સંશસ્ય ઘટવન્નાશો ભવત્યેવ તથા સતિ ।
કૃતનાશાકૃતાભ્યાગમયોઃ કો વારકો ભવેત્ ॥ ૮૫॥

તસ્માદાત્મા મહાનેવ નૈવાણુર્નાપિ મધ્યમઃ ।
આકાશવત્સર્વગતો નિરંશઃ શ્રુતિસંમતઃ ॥ ૮૬॥

ઇત્યુક્ત્વા તદ્વિશેષેઽપિ બહુધા કલહં યયુઃ ।
અચિદ્રૂપોઽથ ચિદ્રૂપાશ્ચિદચિદ્રૂપ ઇત્યપિ ॥ ૮૭॥

પ્રાભાકરાસ્તાર્કિકાશ્ચ પ્રાહુરસ્યાચિદાત્મતામ્ ।
આકાશવદ્દ્રવ્યમાત્મા શબ્દવત્તદ્ગુણશ્ચિતિઃ ॥ ૮૮॥

ઇચ્છાદ્વેષપ્રયત્નાશ્ચ ધર્માધર્મૌ સુખાસુખે ।
તત્સંસ્કારાશ્ચ તસ્યૈતે ગુણાશ્ચિતિવદીરિતાઃ ॥ ૮૯॥

આત્મનો મનસા યોગે સ્વાદૃષ્ટવશતો ગુણાઃ ।
જાયન્તેઽથ પ્રલીયન્તે સુષુપ્તેઽદૃષ્ટસંક્ષયાત્ ॥ ૯૦॥

ચિતિમત્ત્વાચ્ચેતનોઽયમિચ્છાદ્વેષપ્રયત્નવાન્ ।
સ્યાદ્ધર્માધર્મયોઃ કર્તા ભોક્તા દુઃખાદિમત્ત્વતઃ ॥ ૯૧॥

યથાત્ર કર્મવશતઃ કાદાદિકં મુખાદિકમ્ ।
તથા લોકાન્તરે દેહે કર્મણેચ્છાદિ જન્યતે ॥ ૯૨॥

એવં ચ સર્વગસ્યાપિ સમ્ભવેતાં ગમાગમૌ ।
કર્મકાણ્ડઃ સમગ્રોઽત્ર પ્રમાણમિતિ તેઽવદન્ ॥ ૯૩॥

આનન્દમયકોષો યઃ સુષુપ્તૌ પરિશિષ્યતે ।
અસ્પષ્ટચિત્સ આત્મૈષાં પૂર્વકોશોઽસ્ય તે ગુણાઃ ॥ ૯૪॥

ગૂઢં ચૈતન્યમુત્પ્રેક્ષ્ય બોધાબોધસ્વરૂપતામ્ ।
આત્મનો બ્રુવતે ભાટ્ટાશ્ચિદુત્પ્રેક્ષ્યોત્થિતસ્મૃતેઃ ॥ ૯૫॥

જડો ભૂત્વા તદાસ્વાપ્સમિતિ જાડ્યસ્મૃતિસ્તદા ।
વિના જાડ્યાનુભૂતિં ન કથંચિદુપપદ્યતે ॥ ૯૬॥

દ્રષ્ટુર્દૃષ્ટેરલોપશ્ચ શ્રુતઃ સુપ્તૌ તતસ્ત્વયમ્ ।
અપ્રકાશપ્રકાશાભ્યામાત્મા ખદ્યોતવદ્યુતઃ ॥ ૯૭॥

નિરંશસ્યોભયાત્મત્વં ન કથંચિદ્ઘટિષ્યતે ।
તેન ચિદ્રૂપ એવાત્મેત્યાહુઃ સાંખ્યા વિવેકિનઃ ॥ ૯૮॥

જાડ્યાંશઃ પ્રકૃતેરૂપં વિકારિ ત્રિગુણં ચ તત્ ।
ચિતો ભોગાપવર્ગાર્થં પ્રકૃતિઃ સા પ્રવર્તતે ॥ ૯૯॥

અસઙ્ગાયાશ્ચિતેર્બન્ધમોક્ષૌ ભેદાગ્રહાન્મતૌ ।
બન્ધમોક્ષવ્યવસ્થાર્થં પૂર્વેષામિવ ચિદ્ભિદા ॥ ૧૦૦॥

મહતઃ પરમવ્યક્તમિતિ પ્રકૃતિરુચ્યતે ।
શ્રુતાઽસઙ્ગતા તદ્વદસઙ્ગો હીત્યતઃ સ્ફુટા ॥ ૧૦૧॥

ચિત્સન્નિધૌ પ્રવૃત્તાયા પ્રકૃતેર્હિ નિયામકમ્ ।
ઈશ્વરં બ્રુવતે યોગાઃ સ જીવેભ્યઃ પરઃ શ્રુતઃ ॥ ૧૦૨॥

પ્રધાનક્ષેત્રજ્ઞપતિર્ગુણેશ ઇતિ હિ શ્રુતિઃ ।
આરણ્યકે સંભ્રમેણ હ્યન્તર્યામ્યુપપાદિતઃ ॥ ૧૦૩॥

અત્રાપિ કલહાયન્તે વાદિનઃ સ્વસ્વયુક્તિભિઃ ।
વાક્યાન્યપિ યથાપ્રજ્ઞં દાર્ઢ્યાયોદાહરન્તિ હિ ॥ ૧૦૪॥

ક્લેશકર્મવિપાકૈસ્તદાશયૈરપ્યસંયુતઃ ।
પુંવિશેષો ભવેદીશો જીવવત્સોઽપ્યસઙ્ગચિત્ ॥ ૧૦૫॥

તથાપિ પુંવિશેષત્વાદ્ઘટતેઽસ્ય નિયન્તૃતા ।
અવ્યવસ્થૌ બન્ધમોક્ષાવાપતેતામિહાન્યથા ॥ ૧૦૬॥

ભીષાસ્માદિત્યેવમાદાવસઙ્ગસ્ય પરાત્મનઃ ।
શ્રુતં તદ્યુક્તમપ્યસ્ય ક્લેશકર્માદ્યસઙ્ગમાત્ ॥ ૧૦૭॥

જીવાનામપ્યસઙ્ગત્વાત્ક્લેશાદિ ન હ્યથાપિ ચ ।
વિવેકાગ્રહતઃ ક્લેશકર્માદિ પ્રાગુદીરિતમ્ ॥ ૧૦૮॥

નિત્યજ્ઞાનપ્રયત્નેચ્છાગુણાનીશસ્ય મન્વતે ।
અસઙ્ગસ્ય નિયન્તૃત્વમયુક્તમિતિ તાર્કિકાઃ ॥ ૧૦૯॥

પુંવિશેષત્વમપ્યસ્ય ગુણૈરેવ ન ચાન્યથા ।
સત્યકામઃ સત્યસંકલ્પ ઇત્યાદિશ્રુતિર્જગૌ ॥ ૧૧૦॥

નિત્યજ્ઞાનાદિમત્ત્વેઽસ્ય સૃષ્ટિરેવ સદા ભવેત્ ।

હિરણ્યગર્ભ ઈશોઽતો લિઙ્ગદેહેન સંયુતઃ ॥ ૧૧૧॥

ઉદ્ગીથબ્રાહ્મણે તસ્ય માહાત્મ્યમતિવિસ્તૃતમ્ ।
લિઙ્ગસત્ત્વેઽપિ જીવત્વં નાસ્ય કર્માદ્યભાવતઃ ॥ ૧૧૨॥

સ્થૂલદેહં વિના લિઙ્ગદેહો ન ક્વાપિ દૃશ્યતે ।
વૈરાજો દેહ ઈશોઽતઃ સર્વતો મસ્તકાદિમાન્ ॥ ૧૧૩॥

સહસ્રશીર્ષેત્યેવં હિ વિશ્વતશ્ચક્ષુરિત્યપિ ।
શ્રુતમિત્યાહુરનિશં વિશ્વરૂપસ્ય ચિન્તકાઃ ॥ ૧૧૪॥

સર્વતઃ પાણિપાદત્વે કૃમ્યાદેરપિ ચેશતા ।
તતશ્ચતુર્મુખો દેવ એવેશો નેતરઃ પુમાન્ ॥ ૧૧૫॥

પુત્રાર્થં તમુપાસીના એવમાહુઃ પ્રજાપતિઃ ।
પ્રજા અસૃજતેત્યાદિશ્રુતિશ્ચોદાહરન્ત્યમી ॥ ૧૧૬॥

વિષ્ણોર્નાભેઃ સમુદ્ભૂતો વેધાઃ કમલજસ્તતઃ ।
વિષ્ણુરેવેશ ઇત્યાહુર્લોકે ભાગવતા જનાઃ ॥ ૧૧૭॥

શિવસ્ય પાદાવન્વેષ્ટું શાર્ઙ્ગ્યશક્તસ્તતઃ શિવઃ ।
ઈશો ન વિષ્ણુરિત્યાહુઃ શૈવા આગમમાનિનઃ ॥ ૧૧૮॥

પુરત્રયં સાદયિતું વિઘ્નેશં સોઽપ્યપૂજયત્ ।
વિનાયકં પ્રાહુરીશં ગાણપત્યમતે રતાઃ ॥ ૧૧૯॥

એવમન્યે સ્વસ્વપક્ષાભિમાનેનાન્યથાન્યથા ।
મન્ત્રાર્થવાદકલ્પાદીનાશ્રિત્ય પ્રતિપેદિરે ॥ ૧૨૦॥

અન્તર્યામિણમારભ્ય સ્થાવરાન્તેશવાદિનઃ ।
સન્ત્યશ્વત્થાર્કવંશાદેઃ કુલદૈવત્વદર્શનાત્ ॥ ૧૨૧॥

તત્ત્વનિશ્ચયકામેન ન્યાયાગમવિચારિણામ્ ।
એકૈવ પ્રતિપત્તિઃ સ્યાત્સાપ્યત્ર સ્ફુટમુચ્યતે ॥ ૧૨૨॥

માયાં તુ પ્રકૃતિં વિદ્યાન્માયિનં તુ મહેશ્વરમ્ ।
અસ્યાવયવભૂતૈસ્તુ વ્યાપ્તં સર્વમિદં જગત્ ॥ ૧૨૩॥

ઇતિ શ્રુત્યનુસારેણ ન્યાયો નિર્ણય ઈશ્વરે ।
તથા સત્યવિરોધઃ સ્યાત્સ્થાવરાન્તેશવાદિનામ્ ॥ ૧૨૪॥

માયા ચેયં તમોરૂપા તાપનીયે તદીરણાત્ ।
અનુભૂતિં તત્ર માનં પ્રતિજજ્ઞે શ્રુતિઃ સ્વયમ્ ॥ ૧૨૫॥

જડં મોહાત્મકં તચ્ચેત્યનુભાવયતિ શ્રુતિઃ ।
આબાલગોપં સ્પષ્ટત્વાદાનન્ત્યં તસ્ય સાબ્રવીત્ ॥ ૧૨૬॥

અચિદાત્મઘટાદિનાં યત્સ્વરૂપં જડં હિ તત્ ।
યત્ર કુણ્ઠીભવેદ્બુદ્ધિઃ સ મોહ ઇતિ લૌકિકાઃ ॥ ૧૨૭॥

ઇત્થં લૌકિકદૃષ્ટ્યૈતત્સર્વૈરપ્યનુભૂયતે ।
યુક્તિદૃષ્ટ્યા ત્વનિર્વાચ્યં નાસદાસીદિતિશ્રુતેઃ ॥ ૧૨૮॥

નાસદાસીદ્વિભાતત્વાન્નો સદાસીચ્ચ બાધનાત્ ।
વિદ્યાદૃષ્ટ્યા શ્રુતં તુચ્છં તસ્ય નિત્યનિવૃત્તિતઃ ॥ ૧૨૯॥

તુચ્છાનિર્વચનીયા ચ વાસ્તવી ચેત્યસૌ ત્રિધા ।
જ્ઞેયા માયા ત્રિભિર્બોધૈઃ શ્રૌતયૌક્તિકલૌકિકૈઃ ॥ ૧૩૦॥

અસ્ય સત્ત્વમસત્ત્વં ચ જગતો દર્શયત્યસૌ ।
પ્રસારણાચ્ચ સંકોચાદ્યથા ચિત્રપટસ્તથા ॥ ૧૩૧॥

અસ્વતન્ત્રા હિ માયા સ્યાદપ્રતીતેર્વિના ચિતિમ્ ।
સ્વતન્ત્રાપિ તથૈવ સ્યાદસઙ્ગસ્યાન્યથાકૃતેઃ ॥ ૧૩૨॥

કૂટસ્થાસઙ્ગમાત્માનં જડત્ત્વેન કરોતિ સા ।
ચિદાભાસસ્વરૂપેણ જીવેશાવપિ નિર્મમે ॥ ૧૩૩॥

કૂટસ્થમનુપાસ્કૃત્ય કરોતિ જગદાદિકમ્ ।
દુર્ઘટૈકવિધાયિન્યાં માયાયાં કા ચમત્કૃતિઃ ॥ ૧૩૪॥

દ્રવત્વમુદકે વહ્નાવુષ્ણ્યં કાઠિન્યમશ્મનિ ।
માયાયા દુર્ઘટત્વં ચ સ્વતઃ સિદ્ધ્યતિ નાન્યથા ॥ ૧૩૫॥

ન વેત્તિ માયિનં લોકો યાવત્તાવચ્ચમત્કૃતિમ્ ।
ધત્તે મનસિ પશ્ચાત્તુ માયૈષેત્યુપશામ્યતિ ॥ ૧૩૬॥

પ્રસરન્તિ હિ ચોદ્યાનિ જગદ્વસ્તુત્વવાદિષુ ।
ન ચોદનીયં માયાયાં તસ્યાશ્ચોદ્યૈકરૂપતઃ ॥ ૧૩૭॥

ચોદ્યેઽપિ યદિ ચોદ્યં સ્યાત્તચ્ચોદ્યે ચોદ્યતે મયા ।
પરિહાર્યં તતશ્ચોદ્યં ન પુનઃ પ્રતિચોદ્યતામ્ ॥ ૧૩૮॥

વિસ્મયૈકશરીરાયા માયાયાશ્ચોદ્યરૂપતઃ ।
અન્વેષ્યઃ પરિહારોઽસ્યા બુદ્ધિમદ્ભિઃ પ્રયત્નતઃ ॥ ૧૩૯॥

માયાત્વમેવ નિશ્ચેયમિતિ ચેત્તર્હિ નિશ્ચિનુ ।
લોકપ્રસિદ્ધમાયાયા લક્ષણં યત્તદીક્ષ્યતામ્ ॥ ૧૪૦॥

ન નિરૂપયિતું શક્યા વિસ્પષ્ટં ભાસતે ચ યા ।
સા માયેતીન્દ્રજાલાદૌ લોકાઃ સમ્પ્રતિપેદિરે ॥ ૧૪૧॥

સ્પષ્ટં ભાતિ જગચ્ચેદમશક્યં તન્નિરૂપણમ્ ।
માયામયં જગત્તસ્માદીક્ષસ્વાપક્ષપાતતઃ ॥ ૧૪૨॥

નિરૂપયિતુમારબ્ધે નિખિલૈરપિ પણ્ડિતૈઃ ।
અજ્ઞાનં પુરતસ્તેષાં ભાતિ કક્ષાસુ કાસુચિત્ ॥ ૧૪૩॥

દેહેન્દ્રિયાદયો ભાવા વીર્યેણોત્પાદિતાઃ કથમ્ ।
કથં વા તત્ર ચૈતન્યમિત્યુક્તે તે કિમુત્તરમ્ ॥ ૧૪૪॥

વીર્યસ્યૈષ સ્વભાવશ્ચેત્કથં તદ્વિદિતં ત્વયા ।
અન્વયવ્યતિરેકૌ યૌ ભગ્નૌ તૌ વ્યર્થવીર્યતઃ ॥ ૧૪૫॥

ન જાનામિ કિમપ્યેતદિત્યન્તે શરણં તવ ।
અત એવ મહન્તોઽસ્યાઃ પ્રવદન્તીન્દ્રજાલતામ્ ॥ ૧૪૬॥

એતસ્માત્કિમિવેન્દ્રજાલમપરં યદ્ગર્ભવાસસ્થિતમ્
રેતશ્ચેતતિ હસ્તમસ્તકપદં પ્રોદ્ભૂતનાનાઙ્કુરમ્ ।
પર્યાયેણ શિશુત્વયૌવનજરારોગૈરનેકૈર્વૃતમ્
પશ્યત્યત્તિ શ‍ૃણોતિ જિઘ્રતિ તથા ગચ્છત્યથાગચ્છતિ ॥ ૧૪૭॥

દેહવદ્વટધાનાદૌ સુવિચાર્યાવલોક્યતામ્ ।
ક્વ ધાના કુત્ર વા વૃક્ષસ્તસ્માન્માયેતિ નિશ્ચિનુ ॥ ૧૪૮॥

નિરુક્તાવભિમાનં યે દધતે તાર્કિકાદયઃ ।
હર્ષમિશ્રાદિભિસ્તે તુ ખણ્ડનાદૌ સુશિક્ષિતાઃ ॥ ૧૪૯॥

અચિન્ત્યાઃ ખલુ યે ભાવા ન તાંસ્તર્કેષુ યોજયેત્ ।
અચિન્ત્યરચનારૂપં મનસાપિ જગત્ખલુ ॥ ૧૫૦॥

અચિન્ત્યરચનાશક્તિબીજં માયેતિ નિશ્ચિનુ ।

માયાબીજં તદેવૈકં સુષુપ્તાવનુભૂયતે ॥ ૧૫૧॥

જાગ્રત્સ્વપ્નજગત્તત્ર લીનં બીજ ઇવ દ્રુમઃ ।
તસ્માદશેષજગતો વાસનાસ્તત્ર સંસ્થિતાઃ ॥ ૧૫૨॥

યા બુદ્ધિવાસનાસ્તાસુ ચૈતન્યં પ્રતિબિમ્બતિ ।
મેઘાકાશવદસ્પષ્ટશ્ચિદાભાસોઽનુમીયતામ્ ॥ ૧૫૩॥

સાભાસમેવ તદ્બીજં ધીરૂપેણ પ્રરોહતિ ।
અતો બુદ્ધૌ ચિદાભાસો વિસ્પષ્ટં પ્રતિભાસતે ॥ ૧૫૪॥

માયાભાસેન જીવેશૌ કરોતીતિ શ્રુતૌ શ્રુતમ્ ।
મેઘાકાશજલાકાશાવિવ તૌ સુવ્યવસ્થિતૌ ॥ ૧૫૫॥

મેઘવદ્વર્તતે માયા મેઘસ્થિતતુષારવત્ ।
ધીવાસનાશ્ચિદાભાસસ્તુષારસ્થખવત્સ્થિતઃ ॥ ૧૫૬॥

માયાધીનશ્ચિદાભાસઃ શ્રુતૌ માયી મહેશ્વરઃ ।
અન્તર્યામી ચ સર્વજ્ઞો જગદ્યોનિઃ સ એવ હિ ॥ ૧૫૭॥

સૌષુપ્તમાનન્દમયં પ્રક્રમ્યૈવં શ્રુતિર્જગૌ ।
એષ સર્વેશ્વર ઇતિ સોઽયં વેદોક્ત ઈશ્વરઃ ॥ ૧૫૮॥

સર્વજ્ઞત્વાદિકે તસ્ય નૈવ વિપ્રતિપદ્યતામ્ ।
શ્રૌતાર્થસ્યાવિતર્ક્યત્વાન્માયાયાં સર્વસમ્ભવાત્ ॥ ૧૫૯॥

અયં યત્સૃજતે વિશ્વં તદન્યથયિતું પુમાન્ ।
ન કોઽપિ શક્તસ્તેનાયં સર્વેશ્વર ઇતિ ઈરિતઃ ॥ ૧૬૦॥

અશેષપ્રાણિબુદ્ધીનાં વાસનાસ્તત્ર સંસ્થિતાઃ ।
તાભિઃ ક્રોડીકૃતં સર્વં તેન સર્વજ્ઞ ઈરિતઃ ॥ ૧૬૧॥

વાસનાનાં પરોક્ષત્વાત્સર્વજ્ઞત્વં ન હીક્ષ્યતે ।
સર્વબુદ્ધિષુ તદ્દૃષ્ટ્વા વાસનાસ્વનુમીયતામ્ ॥ ૧૬૨॥

વિજ્ઞાનમયમુખ્યેષુ કોષેષ્વન્યત્ર ચૈવ હિ ।
અન્તસ્તિષ્ઠન્યમયતિ તેનાન્તર્યામિતાં વ્રજેત્ ॥ ૧૬૩॥

બુદ્ધૌ તિષ્ઠન્નાન્તરોઽસ્યાધિયાનીક્ષ્યશ્ચ ધીવપુઃ ।
ધિયમન્તર્યમયતીત્યેવં વેદેન ઘોષિતમ્ ॥ ૧૬૪॥

તન્તુઃ પટે સ્થિતો યદ્વદુપાદાનતયા તથા ।
સર્વોપાદાનરૂપત્વાત્સર્વત્રાયમવસ્થિતઃ ॥ ૧૬૫॥

પટાદપ્યાન્તરસ્તન્તુસ્તન્તોરપ્યંશુરાન્તરઃ ।
આન્તરત્વસ્ય વિશ્રાન્તિર્યત્રાસાવનુમીયતામ્ ॥ ૧૬૬॥

દ્વિત્ર્યાન્તરત્વકક્ષાણાં દર્શનેઽપ્યયમાન્તરઃ ।
ન વીક્ષ્યતે તતો યુક્તિશ્રુતિભ્યામેવ નિર્ણયઃ ॥ ૧૬૭॥

પટરૂપેણ સંસ્થાનાત્પટસ્તન્તોર્વપુર્યથા ।
સર્વરૂપેણ સંસ્થાનાત્સર્વમસ્ય વપુસ્તથા ॥ ૧૬૮॥

તન્તોઃ સંકોચવિસ્તારચલનાદૌ પટસ્તથા ।
અવશ્યમેવ ભવતિ ન સ્વાતન્ત્ર્યં પટે મનાક્ ॥ ૧૬૯॥

તથાન્તર્યામ્યયં યત્ર યયા વાસનયા યથા ।
વિક્રીયતે તથાવશ્યં ભવત્યેવ ન સંશયઃ ॥ ૧૭૦॥

ઈશ્વરઃ સર્વભૂતાનાં હૃદ્દેશેઽર્જુન ! તિષ્ઠતિ ।
ભ્રામયન્સર્વભૂતાનિ યન્ત્રારૂઢાનિ માયયા ॥ ૧૭૧॥

સર્વભૂતાનિ વિજ્ઞાનમયાસ્તે હૃદયે સ્થિતાઃ ।
તદુપાદાનભૂતેશસ્તત્ર વિક્રિયતે ખલુ ॥ ૧૭૨॥

દેહાદિપઞ્જરં યન્ત્રં તદારોહોઽભિમાનિતા ।
વિહિતપ્રતિસિદ્ધેષુ પ્રવૃત્તિર્ભ્રમણં ભવેત્ ॥ ૧૭૩॥

વિજ્ઞાનમયરૂપેણ તત્પ્રવૃત્તિસ્વરૂપતઃ ।
સ્વશક્ત્યેશો વિક્રિયતે માયયા ભ્રામણં હિ તત્ ॥ ૧૭૪॥

અન્તર્યમયતીત્યુક્ત્યા યમેવાર્થઃ શ્રુતૌ શ્રુતઃ ।
પૃથિવ્યાદિષુ સર્વત્ર ન્યાયોઽયં યોજ્યતાં ધિયા ॥ ૧૭૫॥

જાનામિ ધર્મં ન ચ મે પ્રવૃત્તિ-
 ર્જાનામ્યધર્મં ન ચ મે નિવૃત્તિઃ ।
કેનાપિ દેવેન હૃદિ સ્થિતેન
 યથા નિયુક્તોઽસ્મિ તથા કરોમિ ॥ ૧૭૬॥

નાર્થઃ પુરુષકારેણેત્યેવં મા શંક્યતાં યતઃ ।
ઈશઃ પુરુષકારસ્ય રૂપેણાપિ વિવર્તતે ॥ ૧૭૭॥

ઇદૃગ્બોધેનેશ્વરસ્ય પ્રવૃત્તિર્મૈવ વાર્યતામ્ ।
તથાપીશસ્ય બોધેન સ્વાત્માસઙ્ગત્વધીજનિઃ ॥ ૧૭૮ ॥

તાવતા મુક્તિરિત્યાહુઃ શ્રુતયઃ સ્મૃતયસ્તથા ।
શ્રુતિસ્મૃતી મમૈવાજ્ઞે ઇત્યપીશ્વરભાષિતમ્ ॥ ૧૭૯ ॥

આજ્ઞાયા ભીતિહેતુત્વં ભીષાસ્માદિતિ હિ શ્રુતમ્ ।
સર્વેશ્વરત્વમેતત્સ્યાદન્તર્યામિત્વતઃ પૃથક્ ॥ ૧૮૦ ॥

એતસ્ય વા અક્ષરસ્ય પ્રશાસન ઇતિ શ્રુતિઃ ।
અન્તઃ પ્રવિષ્ટઃ શાસ્તાયં જનાનામિતિ ચ શ્રુતિઃ ॥ ૧૮૧ ॥

જગદ્યોનિર્ભવેદેષ પ્રભવાપ્યયકૃદ્યતઃ ।
આવિર્ભાવતિરોભાવાવુત્પત્તિપ્રલયૌ મતૌ ॥ ૧૮૨ ॥

આવિર્ભાવયતિ સ્વસ્મિન્વિલીનં સકલં જગત્ ।
પ્રાણિકર્મવશાદેષ પટો યદ્વત્પ્રસારિતઃ ॥ ૧૮૩ ॥

પુનસ્તિરોભાવયતિ સ્વાત્મન્યેવાખિલં જગત્ ।
પ્રાણિકર્મક્ષયવશાત્સંકોચિતપટો યથા ॥ ૧૮૪ ॥

રાત્રિઘસ્રૌ સુપ્તિબોધાવુન્મીલનનિમીલને ।
તૂષ્ણીંભાવમનોરાજ્યે ઇવ સૃષ્ટિલયાવિમૌ ॥ ૧૮૫ ॥

આવિર્ભાવતિરોભાવશક્તિમત્ત્વેન હેતુના ।
આરમ્ભપરિણામાદિચોદ્યાનાં નાત્ર સમ્ભવઃ ॥ ૧૮૬ ॥

અચેતનાનાં હેતુઃ સ્યાજ્જાડ્યાંશેનેશ્વરસ્તથા ।
ચિદાભાસાંશતસ્ત્વેષ જીવાનાં કારણં ભવેત્ ॥ ૧૮૭ ॥

તમઃ પ્રધાનઃ ક્ષેત્રાણાં ચિત્પ્રધાનશ્ચિદાત્મનામ્ ।
પરઃ કારણતામેતિ ભાવનાજ્ઞાનકર્મભિઃ ॥ ૧૮૮ ॥

ઇતિ વાર્તિકકારેણ જડચેતનહેતુતા ।
પરમાત્મન એવોક્તા નેશ્વરસ્યેતિ ચેચ્છૃણુ ॥ ૧૮૯ ॥

અન્યોન્યાધ્યાસમત્રાપિ જીવકૂટસ્થયોરિવ ।
ઈશ્વરબ્રહ્મણોઃ સિદ્ધં કૃત્વા બ્રૂતે સુરેશ્વરઃ ॥ ૧૯૦ ॥

સત્યં જ્ઞાનમનન્તં યદ્બ્રહ્મ તસ્માત્સમુત્થિતાઃ ।
ખં વાય્વગ્નિજલોર્વ્યોષધ્યન્નદેહાઃ ઇતિ શ્રુતિઃ ॥ ૧૯૧ ॥

આપાતદૃષ્ટિતસ્તત્ર બ્રહ્મણો ભાતિ હેતુતા ।
હેતોશ્ચ સત્યતા તસ્માદન્યોન્યાધ્યાસ ઇષ્યતે ॥ ૧૯૨॥

અન્યોન્યાધ્યાસરૂપોઽસાવન્નલિપ્તઃ પટો યથા ।
ઘટ્ટિતેનૈકતામેતિ તદ્વદ્ભ્રાન્તૈકતાંગતઃ ॥ ૧૯૩॥

મેઘાકાશમહાકાશૌ વિવિચ્યેતે ન પામરૈઃ ।
તદ્વદ્બ્રહ્મએશયોરૈક્યં પશ્યન્ત્યાપાતદર્શિનઃ ॥ ૧૯૪॥

ઉપક્રમાદિભિર્લિઙ્ગૈસ્તાત્પર્યસ્ય વિચારણાત્ ।
અસઙ્ગં બ્રહ્મ માયાવી સૃજત્યેષ મહેશ્વરઃ ॥ ૧૯૫॥

સત્યં જ્ઞાનમનન્તં ચેત્યુપક્રમ્યોપસંહૃતઃ ।
યતો વાચો નિવર્તન્તે ઇત્યસઙ્ગત્વનિર્ણયઃ ॥ ૧૯૬॥

માયી સૃજતિ વિશ્વં સંનિરુદ્ધસ્તત્ર માયયા ।
અન્ય ઇત્યપરા બ્રૂતે શ્રુતિસ્તેનેશ્વરઃ સૃજેત્ ॥ ૧૯૭॥

આનન્દમય ઈશોઽયં બહુ સ્યામિત્યવૈક્ષત ।
હિરણ્યગર્ભરૂપોઽભૂત્સુપ્તિઃ સ્વપ્નો યથા ભવેત્ ॥ ૧૯૮॥

ક્રમેણ યુગપદ્વૈષા સૃષ્ટિર્જ્ઞેયા યથાશ્રુતિ ।
દ્વિવિધશ્રુતિસદ્ભાવાદ્વિવિધસ્વપ્નદર્શનાત્ ॥ ૧૯૯॥

સૂત્રાત્મા સૂક્ષ્મદેહાખ્યઃ સર્વજીવઘનાત્મકઃ ।
સર્વાહંમાનધારિત્વાત્ક્રિયાજ્ઞાનાદિશક્તિમાન્ ॥ ૨૦૦॥

પ્રત્યૂષે વા પ્રદોષે વા મગ્નો મન્દે તમસ્યયમ્ ।
લોકો ભાતિ યથા તદ્વદસ્પષ્ટં જગદીક્ષ્યતે ॥ ૨૦૧॥

સર્વતો લાઞ્છિતો મસ્યા યથા સ્યાદ્ઘટ્ટિતઃ પટઃ ।
સૂક્ષ્માકારૈસ્તથેશસ્ય વપુઃ સર્વત્ર લાઞ્છિતમ્ ॥ ૨૦૨॥

શસ્યં વા શાકજાતં વા સર્વતોઽઙ્કુરિતં યથા ।
કોમલં તદ્વદેવૈષ પેલવો જગદઙ્કુરઃ ॥ ૨૦૩॥

આતપાભાતલોકો વા પટો વા વર્ણપૂરિતઃ ।
શસ્યં વા ફલિતં યદવત્તથા સ્પષ્ટવપુર્વિરાટ્ ॥ ૨૦૪॥

વિશ્વરૂપાધ્યાય એષ ઉક્તઃ સૂક્તેઽપિ પૌરુષે ।

ધાત્રાદિસ્તમ્બપર્યન્તાનેતસ્યાવયવાન્ વિદુઃ ॥ ૨૦૫॥

ઈશસૂત્રવિરાડ્વેધોવિષ્ણુરુદ્રએન્દ્રવહ્નયઃ ।
વિઘ્નભૈરવમૈરાલમારિકા યક્ષરાક્ષસાઃ ॥ ૨૦૬॥

વિપ્રક્ષત્રિયવિટ્શૂદ્રા ગવાશ્વમૃગપક્ષિણઃ ।
અશ્વત્થવટચૂતાદ્યા યવવૃહિતૃણાદયઃ ॥ ૨૦૭॥

જલપાષાણમૃત્કાષ્ઠવાસ્યાકુદ્દાલકાદયઃ ।
ઈશ્વરાઃ સર્વ એવૈતે પૂજિતાઃ ફલદાયિનઃ ॥ ૨૦૮॥

યથા યથોપાસતે તં ફલમીયુસ્તથા તથા ।
ફલોત્કર્ષાપકર્ષૌ તુ પૂજ્યપૂજાનુસારતઃ ॥ ૨૦૯॥

મુક્તિસ્તુ બ્રહ્મતત્ત્વસ્ય જ્ઞાનાદેવ ન ચાન્યથા ।
સ્વપ્રબોધં વિના નૈવ સ્વસ્વપ્નં હીયતે યથા ॥ ૨૧૦॥

અદ્વિતીયબ્રહ્મતત્ત્વે સ્વપ્નોઽયમખિલં જગત્ ।
ઈશજીવાદ્રૂપેણ ચેતનાચેતનાત્મકમ્ ॥ ૨૧૧॥

આનન્દમયવિજ્ઞાનમયાવીશ્વરજીવકૌ ।
માયયા કલ્પિતાવેતૌ તાભ્યાં સર્વં પ્રકલ્પિતમ્ ॥ ૨૧૨॥

ઈક્ષણાદિપ્રવેશાન્તા સૃષ્ટિરીશેન કલ્પિતા ।
જાગ્રદાદિવિમોક્ષાન્તઃ સંસારો જીવકલ્પિતઃ ॥ ૨૧૩॥

અદ્વિતીયં બ્રહ્મતત્ત્વમસઙ્ગં તન્ન જાનતે ।
જીવએશયોર્માયિકયોર્વૃથૈવ કલહં યયુઃ ॥ ૨૧૪॥

જ્ઞાત્વા સદા તત્ત્વનિષ્ઠાનનુમોદામહે વયમ્ ।
અનુશોચામ એવાન્યાન્ન ભ્રાન્તૈર્વિવદામહે ॥ ૨૧૫॥

તૃણાર્ચકાદિયોગાન્તા ઈશ્વરભ્રાન્તિમાશ્રિતાઃ ।
લોકાયતાદિસાંખ્યાન્તા જીવવિભ્રાન્તિમાશ્રિતાઃ ॥ ૨૧૬॥

અદ્વિતીયબ્રહ્મતત્ત્વં ન જાનન્તિ યદા તદા ।
ભ્રાન્તા એવાખિલાસ્તેષાં ક્વ મુક્તિઃ ક્વેહ વા સુખમ્ ॥ ૨૧૭॥

ઉત્તમાધમભાવશ્ચેત્તેષાં સ્યાદસ્તુ તેન કિમ્ ।
સ્વપ્નસ્થરાજ્યભિક્ષાભ્યાં ન બુદ્ધઃ સ્પૃશ્યતે ખલુ ॥ ૨૧૮॥

તસ્માન્મુમુક્ષિભિર્નૈવ મતિર્જીવેશવાદયોઃ ।
કાર્યા કિંતુ બ્રહ્મતત્ત્વં વિચાર્ય બુધ્યતાં ચ તત્ ॥ ૨૧૯॥

પૂર્વપક્ષતયા તૌ ચેત્તત્ત્વનિશ્ચયહેતુતામ્ ।
પ્રાપ્નુતોઽસ્તુ નિમજ્જસ્ય તયોર્નૈતાવતા વશઃ ॥ ૨૨૦॥

અસઙ્ગચિદ્વિભુર્જીવઃ સાંખ્યોક્તસ્તાદૃગીશ્વરઃ ।
યોગોક્તસ્તત્ત્વમોરર્થૌ શુદ્ધૌ તાવિતિ ચેચ્છૃણુ ॥ ૨૨૧॥

ન તત્ત્વમોરુભાવાર્થાવસ્મત્સિદ્ધાન્તતાં ગતૌ ।
અદ્વૈતબોધનાયૈવ સા કક્ષા કાચિદિષ્યતે ॥ ૨૨૨॥

અનાદિમાયયા ભ્રાન્તા જીવેશૌ સુવિલક્ષણૌ ।
મન્યન્તે તદ્વ્યુદાસાય કેવલં શોધનં તયોઃ ॥ ૨૨૩॥

અત એવાત્ર દૃષ્ટાન્તો યોગ્યઃ પ્રાક્સમ્યગીરિતઃ ।
ઘટાકાશમહાકાશજલાકાશાભ્રખાત્મકઃ ॥ ૨૨૪॥

જલાભ્રોપાધ્યધીને તે જલાકાશાભ્રખે તયોઃ ।
આધારૌ તુ ઘટાકાશમહાકાશૌ સુનિર્મલૌ ॥ ૨૨૫॥

એવમાનન્દવિજ્ઞાનમયૌ માયાધિયોર્વશૌ ।
તદધિષ્ઠાનકૂટસ્થબ્રહ્મણી તુ સુનિર્મલે ॥ ૨૨૬॥

એતત્કક્ષોપયોગેન સાંખ્યયોગૌ મતૌ યદિ ।
દેહોઽન્નમયકક્ષત્વાદાત્મત્વેનાભ્યુપેયતામ્ ॥ ૨૨૭॥

આત્મભેદો જગત્સત્યમીશોઽન્ય ઇતિ ચેત્ત્રયમ્ ।
ત્યજ્યતે તૈસ્તદા સાંખ્યયોગવેદાન્તસંમતિઃ ॥ ૨૨૮॥

જીવાસઙ્ગત્વમાત્રેણ કૃતાર્થ ઇતિ ચેત્તદા ।
સ્રક્ચન્દનાદિનિત્યત્વમાત્રેણાપિ કૃતાર્થતા ॥ ૨૨૯॥

યથા સ્રગાદિનિત્યત્વં દુઃસમ્પાદ્યં તથાત્મનઃ ।
અસઙ્ગત્વં ન સમ્ભાવ્યં જીવતોર્જગદીશયોઃ ॥ ૨૩૦॥

અવશ્યં પ્રકૃતિઃ સઙ્ગં પુરેવાપાદયેત્તથા ।
નિયચ્છત્યેતમીશોઽપિ કોઽસ્ય મોક્ષસ્તથા સતિ ॥ ૨૩૧॥

અવિવેકકૃતઃ સઙ્ગો નિયમશ્ચેતિ ચેત્તદા ।
બલાદાપતિતો માયાવાદઃ સાંખ્યસ્ય દુર્મતેઃ ॥ ૨૩૨॥

બન્ધમોક્ષવ્યવસ્થાર્થમાત્મનાનાત્વમિષ્યતામ્ ।
ઇતિ ચેન્ન યતો માયા વ્યવસ્થાપયિતું ક્ષમા ॥ ૨૩૩॥

દુર્ઘટં ઘટયામીતિ વિરુદ્ધં કિં ન પશ્યસિ ।
વાસ્તવૌ બન્ધમોક્ષૌ તુ શ્રુતિર્ન સહતેતરામ્ ॥ ૨૩૪॥

ન નિરોધો ન ચોત્પત્તિર્ન બદ્ધો ન ચ સાધકઃ ।
ન મુમુક્ષુર્ન વૈ મુક્ત ઇત્યેષા પરમાર્થતા ॥ ૨૩૫॥

માયાખ્યાયા કામધેનોર્વત્સૌ જીવેશ્વરાવુભૌ ।
યથેચ્છં પિબતાં દ્વૈતં તત્ત્વં ત્વદ્વૈતમેવ હિ ॥ ૨૩૬॥

કૂટસ્થબ્રહ્મણોર્ભેદો નામમાત્રાદૃતે ન હિ ।
ઘટાકાશમહાકાશૌ વિયુજ્યેતે ન હિ ક્વચિત્ ॥ ૨૩૭॥

યદદ્વૈતં શ્રુતં સૃષ્ટેઃ પ્રાક્તદેવાદ્ય ચોપરિ ।
મુક્તાવપિ વૃથા માયા ભ્રામયત્યખિલાન્ જનાન્ ॥ ૨૩૮॥

યે વદન્તીત્થમેતેઽપિ ભ્રામ્યન્તેઽવિદ્યયાત્ર કિમ્ ।
ન યથા પૂર્વમેતેષામત્ર ભ્રાન્તેરદર્શનાત્ ॥ ૨૩૯॥

ઐહિકામુષ્મિકઃ સર્વઃ સંસારો વાસ્તવસ્તતઃ ।
ન ભાતિ નાસ્તિ ચાદ્વૈતમિત્યજ્ઞાનિવિનિશ્ચયઃ ॥ ૨૪૦॥

જ્ઞાનીનાં વિપરીતોઽસ્માન્નિશ્ચયઃ સમ્યગીક્ષ્યતે ।
સ્વસ્વનિશ્ચયતો બદ્ધો મુક્તોઽહં વેતિ મન્યતે ॥ ૨૪૧॥

નાદ્વૈતમપરોક્ષં ચેન્ન ચિદ્રૂપેણ ભાસનાત્ ।
અશેષેણ ન ભાતં ચેદ્દ્વૈતં કિં ભાસતેઽખિલમ્ ॥ ૨૪૨॥

દિઙ્માત્રેણ વિભાનં તુ દ્વયોરપિ સમં ખલુ ।
દ્વૈતસિદ્ધિવદદ્વૈતસિદ્ધિસ્ત્વેતાવતા ન કિમ્ ॥ ૨૪૩॥

દ્વૈતેન હીનમદ્વૈતં દ્વૈતજ્ઞાને કથં ત્વિદમ્ ।
ચિદ્ભાનં ત્વવિરોધ્યસ્ય દ્વૈતસ્યાતોઽસમે ઉભે ॥ ૨૪૪॥

એવં તર્હિ શ‌ૃણુ દ્વૈતમસન્માયામયત્વતઃ ।
તેન વાસ્તવમદ્વૈતં પરિશેષાદ્વિભાસતે ॥ ૨૪૫॥

અચિન્ત્યરચનારૂપં માયૈવ સકલં જગત્ ।

ઇતિ નિશ્ચિત્ય વસ્તુત્વમદ્વૈતે પરિશેષ્યતામ્ ॥ ૨૪૬॥

પુનર્દ્વૈતસ્ય વસ્તુત્વં ભાતિ ચેત્ત્વં તથા પુનઃ ।
પરિશીલય કો વાત્ર પ્રયાસસ્તેન તે વદ ॥ ૨૪૭॥

કિયન્તં કાલમિતિ ચેત્ખેદોઽયં દ્વૈત ઇષ્યતામ્ ।
અદ્વૈતે તુ ન યુક્તોઽયં સર્વાનાર્થનિવારણાત્ ॥ ૨૪૮॥

ક્ષુત્પિપાસાદયો દૃષ્ટા યથાપૂર્વં મયીતિ ચેત્ ।
મચ્છબ્દવાચ્યેઽહઙ્કારે દૃશ્યતાં નેતિ કો વદેત્ ॥ ૨૪૯॥

ચિદ્રૂપેઽપિ પ્રસજ્યેરન્ તાદાત્મ્યાધ્યાસતો યદિ ।
માધ્યાસં કુરુ કિન્તુ ત્વં વિવેકં કુરુ સર્વદા ॥ ૨૫૦॥

ઝટિત્યધ્યાસ આયાતિ દૃઢવાસનયેતિ ચેત્ ।
આવર્તયેદ્વિવેકં ચ દૃઢં વાસયિતું સદા ॥ ૨૫૧॥

વિવેકે દ્વૈતમિથ્યાત્વં યુક્ત્યૈ વેતિ ન મણ્યતામ્ ।
અચિન્ત્યરચનાત્વસ્યાનુભૂતિર્હિ સ્વસાક્ષિકી ॥ ૨૫૨॥

ચિદપ્યચિન્ત્યરચના યદિ તર્હ્યસ્તુ નો વયમ્ ।
ચિતિં સ્વચિન્ત્યરચનાં બ્રૂમો નિત્યત્વકારણાત્ ॥ ૨૫૩॥

પ્રાગભાવો નાનુભૂતશ્ચિતેર્નિત્યા તતશ્ચિતિઃ ।
દ્વૈતસ્ય પ્રાગભાવસ્તુ ચૈતન્યેનાનુભૂયતે ॥ ૨૫૪॥

પ્રાગભાવયુતં દ્વૈતં રચ્યતે હિ ઘટાદિવત્ ।
તથાપિ રચના ચિન્ત્યા મિથ્યા તેનેન્દ્રજાલવત્ ॥ ૨૫૫॥

ચિત્પ્રત્યક્ષા તતોઽન્યસ્ય મિથ્યાત્વં ચાનુભૂયતે ।
નાદ્વૈતમપરોક્ષં ચેત્યેતન્ન વ્યાહતં કથમ્ ॥ ૨૫૬॥

ઇત્થં જ્ઞાત્વાપ્યસન્તુષ્ટાઃ કેચિત્કુત ઇતીર્ય તામ્ ।
ચાર્વાકાદેઃ પ્રબુદ્ધસ્યાપ્યાત્મા દેહઃ કુતો વદ ॥ ૨૫૭॥

સમ્યગ્વિચારો નાસ્ત્યસ્ય ધીદોષાદિતિ ચેત્તથા ।
અસન્તુષ્ટાશ્ચ શાસ્ત્રાર્થં ન ત્વીક્ષન્તે વિશેષતઃ ॥ ૨૫૮॥

યદા સર્વે પ્રમુચ્યન્તે કામા યેઽસ્ય હૃદિ શ્રિતાઃ ।
ઇતિ શ્રૌતં ફલં દૃષ્ટં નેતિ ચેદ્દૃષ્ટમેવ તત્ ॥ ૨૫૯॥

યદા સર્વે પ્રભિદ્યન્તે હૃદયગ્રન્થયસ્ત્વિતિ ।
કામા ગ્રન્થિસ્વરૂપેણ વ્યાખ્યાતા વાક્યશેષતઃ ॥ ૨૬૦॥

અહઙ્કારચિદાત્માનવીકીકૃત્યાવિવેકતઃ ।
ઇદં મે સ્યાદિદં મે સ્યાદિતીચ્છાઃ કામશબ્દિતાઃ ॥ ૨૬૧॥

અપ્રવેશ્ય ચિદાત્માનં પૃથક્પશ્યન્નહઙ્કૃતિમ્ ।
ઇચ્છસ્તુ કોટિવસ્તૂનિ ન બાધો ગ્રન્થિભેદતઃ ॥ ૨૬૨॥

ગ્રન્થિભેદેઽપિ સમ્ભાવ્યા ઇચ્છાઃ પ્રારબ્ધદોષતઃ ।
બુધ્વાપિ પાપબાહુલ્યાદસન્તોષો યથા તવ ॥ ૨૬૩॥

અહઙ્કારગતેચ્છાદ્યૈર્દેહવ્યાધિદિભિસ્તથા ।
વૃક્ષાદિજન્મનાશૈર્વા ચિદ્રૂપાત્મનિ કિં ભવેત્ ॥ ૨૬૪॥

ગ્રન્થિભેદાત્પુરાપ્યેવમિતિ ચેત્તન્ન વિસ્મર ।
અયમેવ ગ્રન્થિભેદસ્તવ તેન કૃતી ભવાન્ ॥ ૨૬૫॥

નૈવં જાનન્તિ મૂઢાશ્ચેત્સોઽયં ગ્રન્થિર્નચાપરઃ ।
ગ્રન્થિતદ્ભેદમાત્રેણ વૈષમ્યં મૂઢબુદ્ધયોઃ ॥ ૨૬૬॥

પ્રવૃત્તૌ વા નિવૃત્તૌ વા દેહેન્દ્રિયમનોધિયામ્ ।
ન કિંચિદપિ વૈષમ્યમસ્ત્યજ્ઞાનિવિબુદ્ધયોઃ ॥ ૨૬૭॥

વ્રાત્યશ્રોત્રિયયોર્વેદપાઠાપાઠકૃતાભિદા ।
નાહારાદવસ્તિ ભેદઃ સોઽયં ન્યાયોઽત્ર યોજ્યતામ્ ॥ ૨૬૮॥

ન દ્વેષ્ટિ સમ્પ્રવૃત્તાનિ ન નિવૃત્તાનિ કાઙ્ક્ષતિ ।
ઉદાસીનવદાસીન ઇતિ ગ્રન્થિભિદોચ્યતે ॥ ૨૬૯॥

ઔદાસીન્યં વિધેયં ચેદ્વચ્છશબ્દ વ્યર્થતા તદા ।
ન શક્તા હ્યસ્ય દેહાદ્યા ઇતિ ચેદ્રોગ એવ સઃ ॥ ૨૭૦॥

તત્ત્વબોધં ક્ષયવ્યાધિં મન્યન્તે યે મહાધિયઃ ।
તેષં પ્રજ્ઞાતિવિશદા કિં તેષાં દુઃશકં વદ ॥ ૨૭૧॥

ભરતાદેરપ્રવૃત્તિઃ પુરાણોક્તેતિ ચેત્તદા ।
જક્ષત્ક્રીડન્રતિં વિન્દન્નિત્યશ્રૌષીર્ન કિં શ્રુતિમ્ ॥ ૨૭૨॥

ન હ્યાહારાદિ સન્ત્યજ્ય ભરતાદ્યાઃ સ્થિતાઃ ક્વચિત્ ।
કાષ્ઠપાષાણવત્કિન્તુ સઙ્ગભીતા ઉદાસતે ॥ ૨૭૩॥

સઙ્ગી હિ બાધ્યતે લોકે નિઃસઙ્ગઃ સુખમશ્નુતે ।
તેન સઙ્ગઃ પરિત્યાજ્યઃ સર્વદા સુખમિચ્છતા ॥ ૨૭૪॥

અજ્ઞાત્વા શાસ્ત્રહૃદયં મૂઢો વક્ત્યન્યથાન્યથા ।
મૂર્ખાણાં નિર્ણય સ્વાસ્તામસ્મત્સિદ્ધાન્ત ઉચ્યતે ॥ ૨૭૫॥

વૈરાગ્યબોધોપરમાઃ સહાયાસ્તે પરસ્પરમ્ ।
પ્રાયેણ સહ વર્તન્તે વિયુજ્યન્તે ક્વચિત્ક્વચિત્ ॥ ૨૭૬॥

હેતુસ્વરૂપકાર્યાણિ ભિન્નાન્યેષામસંકરઃ ।
યથાવદવગન્તવ્યઃ શાસ્ત્રાર્થપ્રવિવિચ્યતા ॥ ૨૭૭॥

દોષદૃષ્ટિર્જિહાસા ચ પુનર્ભોગેષ્વદીનતા ।
અસાધારણહેત્વાદ્યા વૈરાગ્યસ્ય ત્રયોઽપ્યમી ॥ ૨૭૮॥

શ્રવણાદિત્રયં તદ્વત્તત્ત્વમિત્થાવિવેચનમ્ ।
પુનર્ગ્રન્થેરનુદયો બોધસ્યેતે ત્રયો મતાઃ ॥ ૨૭૯॥

યમાદિર્ધીનિરોધશ્ચ વ્યવહારસ્ય સંક્ષયઃ ।
સ્યુર્હેત્વાદ્યા ઉપરતેરિત્યસંકર ઈરિતઃ ॥ ૨૮૦॥

તત્ત્વબોધઃ પ્રધાનં સ્યાત્સાક્ષાન્મોક્ષ પ્રદત્વતઃ ।
બોધોપકારિણાવેતૌ વૈરાગ્યોપરમાવુભૌ ॥ ૨૮૧॥

ત્રયોઽપ્યત્યન્તપક્વાશ્ચેન્મહતસ્તપસઃ ફલમ્ ।
દુરિતેન ક્વચિત્કિંચિત્કદાચિત્પ્રતિબધ્યતે ॥ ૨૮૨॥

વૈરાગ્યોપરતી પૂર્ણે બોધસ્તુ પ્રતિબધ્યતે ।
યસ્ય તસ્ય ન મોક્ષોઽસ્તિ પુણ્યલોકસ્તપોબલાત્ ॥ ૨૮૩॥

પૂર્ણે બોધે તદન્યૌ દ્વૌ પ્રતિબદ્ધૌ યદા તદા ।
મોક્ષો વિનિશ્ચિતઃ કિન્તુ દૃષ્ટદુઃખં ન નશ્યતિ ॥ ૨૮૪॥

બ્રહ્મલોકતૃણીકારો વૈરાગ્યસ્યાવધિર્મતઃ ।
દેહાત્મવત્પરાત્મત્વદાર્ઢ્યે બોધઃ સમાપ્યતે ॥ ૨૮૫॥

સુપ્તિવદ્વિસ્મૃતિઃ સીમા ભવેદુપરમસ્ય હિ ।
દિશાનયા વિનિશ્ચેયં તારતમ્યમવાન્તરમ્ ॥ ૨૮૬॥

આરબ્ધકર્મનાનાત્વાદ્બુદ્ધાનામન્યથાન્યથા ।

વર્તનન્તેન શાસ્ત્રાર્થે ભ્રમિતવ્યં ન પણ્ડિતૈઃ ॥ ૨૮૭॥

સ્વસ્વકર્માનુસારેણ વર્તતન્તાં તે યથા તથા ।
અવિશિષ્ટઃ સર્વબોધઃ સમા મુક્તિરિતિ સ્થિતિઃ ॥ ૨૮૮॥

જગચ્ચિત્રં સ્વચૈતન્યે પટે ચિત્રમિવાર્પિતમ્ ।
માયયા તદપેક્ષૈવ ચૈતન્યે પરિશિષ્યતામ્ ॥ ૨૮૯॥

ચિત્રદીપમિમં નિત્યં યેઽનુસન્દધતે બુધાઃ ।
પશ્યન્તોઽપિ જગચ્ચિત્રં તે મુહ્યન્તિ ન પૂર્વવત્ ॥ ૨૯૦॥

ઇતિ ચિત્રદીપોનામ ષષ્ઠઃ પરિચ્છેદઃ ॥ ૬॥

## ૭. તૃપ્તિદીપોનામ - સપ્તમઃ પરિચ્છેદઃ ।

આત્માનં ચેદ્વિજાનીયાદયમસ્મીતિ પૂરુષઃ ।
કિમિચ્છન્કસ્ય કામાય શરીરમનુસંજ્વરેત્ ॥ ૧॥

અસ્યાઃ શ્રુતેરભિપ્રાયઃ સમ્યગત્ર વિચાર્યતે ।
જીવન્મુક્તસ્ય યા તૃપ્તિઃ સા તેન વિશદાયતે ॥ ૨॥

માયાભાસેન જીવેશૌ કરોતીતિ શ્રુતત્વતઃ ।
કલ્પિતાવેવ જીવેશૌ તાભ્યાં સર્વં પ્રકલ્પિતમ્ ॥ ૩॥

ઈક્ષણાદિપ્રવેશાન્તા સૃષ્ટિરીશેન કલ્પિતા ।
જાગ્રદાદિવિમોક્ષાન્તઃ સંસારો જીવકલ્પિતઃ ॥ ૪॥

ભ્રમાધિષ્ઠાનભૂતાત્મા કૂટસ્થાસઙ્ગચિદ્વપુઃ ।
અન્યોન્યાધ્યાસતોઽસઙ્ગધીસ્થજીવોઽત્ર પૂરુષઃ ॥ ૫॥

સાધિષ્ઠાનો વિમોક્ષાદૌ જીવોઽધિક્રિયતે ન તુ ।
કેવલો નિરધિષ્ઠાનવિભ્રાન્તેઃ ક્વાપ્યસિદ્ધિતઃ ॥ ૬॥

અધિષ્ઠાનાંશસંયુક્તં ભ્રમાંશમવલમ્બતે ।
યદા તદાહં સંસારીત્યેવં જીવોઽતિમન્યતે ॥ ૭॥

ભ્રમાંશસ્ય તિરસ્કારાદધિષ્ઠાનપ્રધાનતા ।
યદા તદા ચિદાત્માહમસઙ્ગોઽસ્મીતિ બુદ્ધ્યતે ॥ ૮॥

નાસઙ્ગેઽહંકૃતિર્યુક્તા કથમસ્મીતિ ચેચ્છૃણુ ।

એકો મુખ્યો દ્વાવમુખ્યાવિત્યર્થસ્ત્રિવિધોઽહમઃ ॥ ૯॥

અન્યોન્યાધ્યાસરૂપેણ કૂટસ્થાભાસયોર્વપુઃ ।
એકીભૂય ભવેન્મુખ્યસ્તત્ર મૂઢૈઃ પ્રપૂજ્યતે ॥ ૧૦॥

પૃથગાભાસકૂટસ્થાવમુખ્યૌ તત્ર તત્ત્વવિત્ ।
પર્યાયેણ પ્રયુઙ્ક્તેઽહંશબ્દં લોકે ચ વૈદિકે ॥ ૧૧॥

લૌકિકવ્યવહારેઽહં ગચ્છામીત્યાદિકે બુધઃ ।
વિવિચ્યૈવ ચિદાભાસં કૂટસ્થાત્તં વિવક્ષતિ ॥ ૧૨॥

અસઙ્ગોઽહં ચિદાત્માહમિતિ શાસ્ત્રીયદૃષ્ટિતઃ ।
અહંશબ્દં પ્રયુઙ્ક્તેયં કૂટસ્થે કેવલે બુધઃ ॥ ૧૩॥

જ્ઞાનિતાજ્ઞાનિતે ત્વાત્માભાસસ્યૈવ ન ચાત્મનઃ ।
તથા ચ કથમાભાસઃ કૂટસ્થોઽસ્મીતિ બુદ્ધ્યતામ્ ॥ ૧૪॥

નાયં દોષશ્ચિદાભાસઃ કૂટસ્થૈકસ્વભાવવાન્ ।
આભાસત્વસ્ય મિથ્યાત્વાત્કૂટસ્થત્વાવશેષણાત્ ॥ ૧૫॥

કૂટસ્થોઽસ્મીતિ બોધોઽપિ મિથ્યા ચેન્નેતિ કો વદેત્ ।
ન હિ સત્યતયાભીષ્ટં રજ્જુસર્પવિસર્પણમ્ ॥ ૧૬॥

તાદૃશેનાપિ બોધેન સંસારો વિનિવર્તતે ।
યક્ષાનુરૂપો હિ બલિરિત્યાહુર્લૌકિકા જનાઃ ॥ ૧૭॥

તસ્માદાભાસપુરુષઃ સકૂટસ્થો વિવિચ્ય તમ્ ।
કૂટસ્થોઽસ્મીતિ વિજ્ઞાતુમર્હતીત્યભ્યધાત્ શ્રુતિઃ ॥ ૧૮॥

અસંદિગ્ધ અવિપર્યસ્ત બોધો દેહ આત્મનીક્ષ્યતે ।
તદ્વદત્રેતિ નિર્ણેતુમયમિત્યભિધીયતે ॥ ૧૯॥

દેહાત્મજ્ઞાનવજ્જ્ઞાનં દેહાત્મજ્ઞાનબાધકમ્ ।
આત્મન્યેવ ભવેદ્યસ્ય સ નેચ્છન્નપિ મુચ્યતે ॥ ૨૦॥

અયમિત્યપરોક્ષત્વમુચ્યતે ચેત્તદુચ્યતામ્ ।
સ્વયંપ્રકાશચૈતન્યમપરોક્ષં સદા યતઃ ॥ ૨૧॥

પરોક્ષમપરોક્ષં ચ જ્ઞાનમજ્ઞાનમિત્યદઃ ।
નિત્યાપરોક્ષરૂપેઽપિ દ્વયં સ્યાદ્દશમે યથા ॥ ૨૨॥

નવસંખ્યાહૃતજ્ઞાનો દશમો વિભ્રમાત્તદા ।
ન વેત્તિ દશમોઽસ્મીતિ વીક્ષ્યમાણોઽપિ તાન્નવ ॥ ૨૩॥

ન ભાતિ નાસ્તિ દશમ ઇતિ સ્વં દહમં તદા ।
મત્વા વક્તિ તદજ્ઞાનકૃતમાવરણં વિદુઃ ॥ ૨૪॥

નદ્યાં મમાર દશમ ઇતિ શોચન્પ્રરોદિતિ ।
અજ્ઞાનકૃતવિક્ષેપં રોદનાદિં વિદુર્બુધઃ ॥ ૨૫॥

ન મૃતો દશમોઽસ્તીતિ શ્રુત્વાપ્તવચનં તદા ।
પરોક્ષત્વેન દશમં વેત્તિ સ્વર્ગાદિલોકવત્ ॥ ૨૬॥

ત્વમેવ દશમોઽસીતિ ગણયિત્વા પ્રદર્શિતઃ ।
અપરોક્ષતયા જ્ઞાત્વા હૃષ્યત્યેવ ન રોદિતિ ॥ ૨૭॥

અજ્ઞાન અવૃતિવિક્ષેપ દ્વિવિધા જ્ઞાન તૃપ્તયઃ ।
શોકાપગમ ઇત્યેતે યોજનીયાશ્ચિદાત્મનિ ॥ ૨૮॥

સંસારાસક્તચિત્તઃ સંશ્ચિદાભાસઃ કદાચન ।
સ્વયંપ્રકાશકૂટસ્થં સ્વતત્ત્વં નૈવ વેત્ત્યયમ્ ॥ ૨૯॥

ન ભાતિ નાસ્તિ કૂટસ્થ ઇતિ વક્તિ પ્રસઙ્ગતઃ ।
કર્તા ભોક્તાહમસ્મીતિ વિક્ષેપં પ્રતિપદ્યતે ॥ ૩૦॥

અસ્તિ કૂટસ્થ ઇત્યાદૌ પરોક્ષં વેત્તિ વાર્ત્તયા ।
પશ્ચાત્કૂટસ્થ એવાસ્મીત્યેવં વેત્તિ વિચારતઃ ॥ ૩૧॥

કર્તા ભોક્તેત્યેવમાદિશોકજાતં પ્રમુઞ્ચતિ ।
કૃતં કૃત્યં પ્રાપણીયં પ્રાપ્તમિત્યેવ તુષ્યતિ ॥ ૩૨॥

અજ્ઞાનમાવૃતિસ્તદ્વદ્વિક્ષેપશ્ચ પરોક્ષધીઃ ।
અપરોક્ષમતિઃ શોકમોક્ષસ્તૃપ્તિર્નિરઙ્કુશા ॥ ૩૩॥

સપ્તાવસ્થા ઇમાઃ સન્તિ ચિદાભાસસ્ય તાસ્વિમૌ ।
બન્ધમોક્ષૌ સ્થિતૌ તત્ર તિસ્રો બન્ધકૃતઃ સ્મૃતાઃ ॥ ૩૪॥

ન જાનામીત્યુદાસીનવ્યવહારસ્ય કારણમ્ ।
વિચારપ્રાગભાવેન યુક્તમજ્ઞાનમીરિતમ્ ॥ ૩૫॥

અમાર્ગેણ વિચાર્યાથ નાસ્તિ નો ભાતિ ચેત્યસૌ ।
વિપરીતવ્યવહૃતિરાવૃતેઃ કાર્યમિષ્યતે ॥ ૩૬॥

દેહદ્વયચિદાભાસરૂપો વિક્ષેપ ઈરિતઃ ।
કર્તૃત્વાદ્યખિલઃ શોકઃ સંસારાખ્યોઽસ્ય બન્ધકઃ ॥ ૩૭॥

અજ્ઞાનમાવૃતિશ્ચૈતે વિક્ષેપાત્પ્રાક્પ્રસિદ્ધ્યતઃ ।
યદ્યપ્યથાપ્યવસ્થેતે વિક્ષેપસ્યૈવ નાત્મનઃ ॥ ૩૮॥

વિક્ષેપોત્પત્તિતઃ પૂર્વમપિ વિક્ષેપસંસ્કૃતિઃ ।
અસ્ત્યેવ તદવસ્થાત્વમવિરુદ્ધં તતસ્તયોઃ ॥ ૩૯॥

બ્રહ્મણ્યારોપિતત્વેન બ્રહ્માવસ્થે ઇમે ઇતિ ।
નશઙ્કનીયં સર્વાસાં બ્રહ્મણ્યેવાધિરોપણાત્ ॥ ૪૦॥

સંસાર્યહં વિબુદ્ધોઽહં નિઃશોકસ્તુષ્ટ ઇત્યપિ ।
જીવગા ઉત્તરાવસ્થા ભાન્તિ ન બ્રહ્મગા યદિ ॥ ૪૧॥

તર્હ્યજ્ઞોઽહં બ્રહ્મસત્ત્વભાને મદૃષ્ટિતો ન હિ ।
ઇતિ પૂર્વે અવસ્થે ચ ભાસેતે જીવગે ખલુ ॥ ૪૨॥

અજ્ઞાનસ્યાશ્રયો બ્રહ્મેત્યધિષ્ઠાનતયા જગુઃ ।
જીવાવસ્થાત્વમજ્ઞાનાભિમાનિત્વાદવાદિષમ્ ॥ ૪૩॥

જ્ઞાનદ્વયેન નષ્ટેઽસ્મિન્નજ્ઞાને તત્કૃતાવૃતિઃ ।
ન ભાતિ નાસ્તિ ચેત્યેષા દ્વિવિધાપિ વિનશ્યતિ ॥ ૪૪॥

પરોક્ષજ્ઞાનતો નશ્યેદસત્ત્વાવૃત્તિહેતુતા ।
અપરોક્ષજ્ઞાનનાશ્યા હ્યભાનાવૃત્તિહેતુતા ॥ ૪૫॥

અભાનાવરણે નષ્ટે જીવત્વારોપસંક્ષયાત્ ।
કર્તૃત્વાદ્યખિલઃ શોકઃ સંસારાખ્યઃ નિવર્તતે ॥ ૪૬॥

નિવૃત્તે સર્વસંસારે નિત્યમુક્તત્વભાસનાત્ ।
નિરઙ્કુશા ભવેત્તૃપ્તિઃ પુનઃ શોકાસમુદ્ભવાત્ ॥ ૪૭॥

અપરોક્ષજ્ઞાનશોકનિવૃત્તાખ્યે ઉભે ઇમે ।
અવસ્થે જીવગે બ્રૂતે આત્માનં ચેદિતિ શ્રુતિઃ ॥ ૪૮॥

અયમિત્યપરોક્ષત્વમુક્તં તદ્વિવિધં ભવેત્ ।
વિષયસ્વપ્રકાશત્વાદ્ધિયાપ્યેવં તદીક્ષણાત્ ॥ ૪૯॥

પરોક્ષજ્ઞાનકાલેઽપિ વિષયસ્વપ્રકાશતા ।

સમાબ્રહ્મ સ્વપ્રકાશમસ્તીત્યેવં વિબોધનાત્ ॥ ૫૦॥

અહં બ્રહ્મેત્યનુલ્લિખ્ય બ્રહ્માસ્તીત્યેવમુલ્લિખ્ત્ ।
પરોક્ષજ્ઞાનમેતં ન ભ્રાન્તં બાધાનિરૂપણાત્ ॥ ૫૧॥

બ્રહ્મ નાસ્તીતિ માનં ચેત્સ્યાદ્બાધ્યેત તદા ધ્રુવમ્ ।
ન ચૈવં પ્રબલં મનં પશ્યામોઽતો ન બાધ્યતે ॥ ૫૨॥

વ્યક્ત્યનુલ્લેખમાત્રેણ ભ્રમત્વે સ્વર્ગધીરપિ ।
ભ્રાન્તિઃ સ્યાદ્વ્યક્ત્યનુલ્લેખાત્સામાન્યોલ્લેખદર્શનાત્ ॥ ૫૩॥

અપરોક્ષત્વ યોગ્યસ્ય ન પરોક્ષમતિર્ભ્રમઃ ।
પરોક્ષમિત્યનુલ્લેખાદર્થાત્પારોક્ષ્યસમ્ભવાત્ ॥ ૫૪॥

અંશાગૃહીતિર્ભ્રાન્તિશ્ચેદ્ ઘટજ્ઞાં ભ્રમો ભવેત્ ।
નિરંશસ્યાપિ સંશત્વં વ્યાવર્ત્યાંશવિભેદતઃ ॥ ૫૫॥

અસત્વાંશો નિવર્તેત પરોક્ષજ્ઞાનતસ્તથા ।
અભાનાંશનિવૃત્તિઃ સ્યાદપરોક્ષધિયા કૃતા ॥ ૫૬॥

દશમોઽસ્તીત્યવિભ્રાન્તં પરોક્ષજ્ઞાનમીક્ષ્યતે ।
બ્રહ્માસ્તીત્યપિ તદ્વત્સ્યાદજ્ઞાનાવરણં સમમ્ ॥ ૫૭॥

આત્મા બ્રહ્મેતિ વાક્યાર્થે નિઃશેષેણ વિચારિતે ।
વ્યક્તિરુલ્લિખ્યતે યદ્વદ્દશમસ્ત્વમસીત્યતઃ ॥ ૫૮॥

દશમઃ ક ઇતિ પ્રશ્ને ત્વમેવેતિ નિરાકૃતે ।
ગણયિત્વા સ્વેન સહ સ્વમેવ દશમં સ્મરેત્ ॥ ૫૯॥

દશમોઽસ્મીતિ વાક્યોત્થા ન ધીરસ્ય વિહન્યતે ।
આદિમધ્યાવસાનેષુ ન નવત્વસ્ય સંશયઃ ॥ ૬૦॥

સદેવેત્યાદિવાક્યેન બ્રહ્મસત્ત્વં પરોક્ષતઃ ।
ગૃહીત્વા તત્ત્વમસ્યાદિવાક્યાદ્વ્યક્તિં સમુલ્લિખેત્ ॥ ૬૧॥

આદિ મધ્યાવસાનેષુ સ્વસ્ય બ્રહ્મત્વધીરિયમ્ ।
નૈવ વ્યભિચરેત્તસ્માદાપરોક્ષં પ્રતિષ્ઠિતમ્ ॥ ૬૨॥

જન્માદિકારણત્વાખ્યલક્ષણેન ભૃગુઃ પુરા ।
પરોક્ષેણ ગૃહીત્વાથ વિચારાત્ વ્યક્તિમૈક્ષત ॥ ૬૩॥

યદ્યપિ ત્વમસીત્યત્ર વાક્યં નોચે ભૃગોઃ પિતા ।
તથાપ્યન્નં પ્રાણમિતિ વિચાર્યસ્થલમુક્તવાન્ ॥ ૬૪॥

અન્નપ્રાણાદિ કોષેષુ સુવિચાર્ય પુનઃ પુનઃ ।
આનન્દવ્યક્તિમીક્ષિત્વા બ્રહ્મલક્ષાપ્યયૂયુજત્ ॥ ૬૫॥

સત્યં જ્ઞાનમનન્તં ચેત્યેવં બ્રહ્મસ્વલક્ષણમ્ ।
ઉક્ત્વા ગુહાહિતત્વેન કોશેષ્વેતત્ પ્રદર્શિતમ્ ॥ ૬૬॥

પારોક્ષ્યેણ વિબુધ્યેન્દ્રો ય આત્મેયાદિલક્ષણાત્ ।
અપરોક્ષીકર્તુમિચ્છંશ્ચતુર્વારં ગુરું યયૌ ॥ ૬૭॥

આત્મા વા ઇઅદમિત્યાદૌ પરોક્ષં બ્રહ્મલક્ષિતમ્ ।
અધ્યારોપાપવાદાભ્યાં પ્રજ્ઞાનં બ્રહ્મ દર્શિતમ્ ॥ ૬૮॥

અવાન્તરેણ વાક્યેન પરોક્ષબ્રહ્મધીર્ભવેત્ ।
સર્વત્રૈવ મહાવાક્યવિચારાત્ત્વપરોક્ષધીઃ ॥ ૬૯॥

બ્રહ્માપારોક્ષ્યસિદ્ધ્યર્થં મહાવાક્યમિતીરિતમ્ ।
વાક્યવૃત્તાવતો બ્રહ્માપરોક્ષ્યે વિમતિર્નહિ ॥ ૭૦॥

આલમ્બનતયા ભાતિ યોઽસ્મત્પ્રત્યયશબ્દયોઃ ।
અન્તઃકરણસમ્ભિન્નબોધઃ સત્ત્વમ્પદાભિધઃ ॥ ૭૧॥

માયોપાધિર્જગદ્યોનિઃ સર્વજ્ઞત્વાદિલક્ષણઃ ।
પારોક્ષ્યશબલઃ સત્યાદ્યાત્મકસ્તત્પદાભિધઃ ॥ ૭૨॥

પ્રત્યક્પરોક્ષતૈકસ્ય સદ્વિતીયત્વપૂર્ણતા ।
વિરુદ્ધ્યેતે યતસ્તસ્માલ્લક્ષણા સમ્પ્રવર્તતે ॥ ૭૩॥

તત્ત્વમસ્યાદિવાક્યેષુ લક્ષણા ભાગલક્ષણા ।
સોઽયમિત્યાદિવાક્યસ્થપદયોરિવ નાપરા ॥ ૭૪॥

સંસર્ગો વા વિશિષ્ટો વા વાક્યાર્થો નાત્ર સંમતઃ ।
અખણ્ડૈકરસત્વેન વાક્યાર્થો વિદુષાં મતઃ ॥ ૭૫॥

પ્રત્યગ્બોધો ય આભાતિ સોઽદ્વયાનન્દલક્ષણઃ ।
અદ્વયાનન્દરૂપશ્ચ પ્રત્યગ્બોધૈકલક્ષણઃ ॥ ૭૬॥

ઇત્થમન્યોઽન્યતાદાત્મ્યપ્રતિપત્તિર્યદા ભવેત્ ।
અબ્રહ્મત્વં ત્વમર્થસ્ય વ્યવર્ત્યેત તદૈવ હિ ।

તદર્થસ્ય ચ પારોક્ષ્યં યદ્યેવં કિં તતઃ શ્ૃણુ ।
પૂર્ણાનન્દૈકરૂપેણ પ્રત્યગ્બોધોઽવશિષ્યતે ॥ ૭૭॥

એવં સતિ મહાવાક્યાત્પરોક્ષજ્ઞાનમીર્યતે ।
યૈસ્તેષાં શાસ્ત્રસિદ્ધાન્તવિજ્ઞાનં શોભતેતરામ્ ॥ ૭૮॥

આસ્તાં શાસ્ત્રસ્ય સિદ્ધાન્તો યુક્ત્યા વાક્યાત્પરોક્ષધીઃ ।
સ્વર્ગાદિવાક્યવન્નૈવં દશમે વ્યભિચારતઃ ॥ ૭૯॥

સ્વતોઽપરોક્ષજીવસ્ય બ્રહ્મત્વમભિવાંછતઃ ।
નશ્યેત્સિદ્ધપરોક્ષત્વમિતિ યુક્તિર્મહત્યહો ॥ ૮૦॥

વૃદ્ધિમિષ્ટવતો મૂલમપિ નષ્ટમિતીરિતમ્ ।
લૌકિકં વચનં સાર્થં સમ્પન્નં ત્વત્પ્રસાદતઃ ॥ ૮૧॥

અન્તઃકરણસંભિન્નબોધો જીવોઽપરોક્ષતામ્ ।
અર્હત્યુપાધિસદ્ભાવાન્ન તુ બ્રહ્માનુપાધિતઃ ॥ ૮૨॥

નૈવં બ્રહ્મત્વબોધસ્ય સોપાધિવિષયત્વતઃ ।
યાવદ્વિદેહકૈવલ્યમુપાધેરનિવારણાત્ ॥ ૮૩॥

અન્તઃકરણસાહિત્યરાહિત્યાભ્યાં વિશિષ્યતે ।
ઉપાધિર્જીવભાવસ્ય બ્રહ્મતાયાશ્ચ નાન્યથા ॥ ૮૪॥

યથા વિધિરુપાધિઃ સ્યાત્પ્રતિષેધસ્તથા ન કિમ્ ।
સુવર્ણલૌહભેદેન શ્ૃઙ્ખલાત્વં ન ભિદ્યતે ॥ ૮૫॥

અતદ્વ્યાવૃત્તિરૂપેણ સાક્ષાદ્વિધિમુખેન ચ ।
વેદાન્તાનાં પ્રવૃત્તિઃ સ્યાદ્વિધેત્યાચાર્યભાષિતમ્ ॥ ૮૬॥

અહમર્થપરિત્યાગાદહં બ્રહ્મેતિ ધીઃ કુતઃ ।
નૈવમંશસ્ય હિ ત્યાગો ભાગલક્ષણયોદિતઃ ॥ ૮૭॥

અન્તઃકરણસન્ત્યાગાદવશિષ્ટે ચિદાત્મનિ ।
અહં બ્રહ્મેતિ વાક્યેન બ્રહ્મત્વં સાક્ષિણીક્ષ્યતે ॥ ૮૮॥

સ્વપ્રકાશોઽપિ સાક્ષ્યેષ ધીવૃત્ત્યા વ્યાપ્યતેઽન્યવત્ ।
ફલવ્યાપ્યત્વમેવાસ્ય શાસ્ત્રકૃદ્ભિર્નિવારિતમ્ ॥ ૮૯॥

બુદ્ધિતત્સ્થચિદાભાસૌ દ્વાવપિ વ્યાપ્નુતો ઘટમ્ ।
તત્રાજ્ઞાનં ધિયા નશ્યેદાભાસેન ઘટઃ સ્ફુરેત્ ॥ ૯૦॥

બ્રહ્મણ્યજ્ઞાનનાશાય વૃત્તિવ્યાપ્તિરપેક્ષિતા ।
સ્વયં સ્ફુરણરૂપત્વાન્નાભાસ ઉપયુજ્યતે ॥ ૯૧॥

ચક્ષુર્દીપાવપેક્ષ્યેતે ઘટાદેર્દર્શને તથા ।
ન દીપદર્શને કિન્તુ ચક્ષુરેકમપેક્ષ્યતે ॥ ૯૨॥

સ્થિતોઽપ્યસૌ ચિદાભાસો બ્રહ્મણ્યેકીભવેત્પરમ્ ।
ન તુ બ્રહ્મણિ અતીશયં ફલં કુર્યાદ્ઘટ આદિવત્ ॥ ૯૩॥

અપ્રમેયમનાદિં ચેત્યત્ર શ્રુત્યેદમીરિતમ્ ।
મનસૈવેદમાપ્તવ્યમિતિ ધીવ્યાપ્યતા શ્રુતા ॥ ૯૪॥

આત્માનં ચેદ્વિજાનીયાદયમસ્મીતિ વાક્યતઃ ।
બ્રહ્માત્મવ્યક્તિમુલ્લિખ્ય યો બોધઃ સોઽભિધીયતે ॥ ૯૫॥

અસ્તુ બોધોઽપરોક્ષોઽત્ર મહાવાક્યાત્ તથાપ્યસૌ ।
ન દૃઢઃ શ્રવણાદીનામાચાર્યૈઃ પુનરીરણાત્ ॥ ૯૬॥

અહં બ્રહ્મેતિ વાક્યાર્થબોધો યાવદ્દૃઢીભવેત્ ।
શમાદિસહિતસ્તાવદભ્યસેચ્છ્રવણાદિકમ્ ॥ ૯૭॥

બાધં સન્તિ હ્યદાર્ઢ્યસ્ય હેતવઃ શ્રુત્યનેકતા ।
અસમ્ભાવ્યત્વમર્થસ્ય વિપરીત ચ ભાવના ॥ ૯૮॥

શાખાભેદાત્કામભેદાચ્છ્રુતં કર્માણ્યથાન્યથા ।
એવમત્રાપિ માશઙ્કીત્યતઃ શ્રવણમાચરેત્ ॥ ૯૯॥

વેદાન્તાનામશેષાણામાદિમધ્યાવસાનતઃ ।
બ્રહ્માત્મન્યેવ તાત્પર્યમિતિધીઃ શ્રવણં ભવેત્ ॥ ૧૦૦॥

સમન્વયાધ્યાય એતત્સૂક્તં ધીસ્વાસ્થ્યકારિભિઃ ।
તર્કૈઃ સમ્ભાવનાર્થસ્ય દ્વિતીયાધ્યાયઃ ઈરિતા ॥ ૧૦૧॥

બહુજન્મદૃઢાભ્યાસાદ્દેહાદિષ્વાત્મધીઃ ક્ષણાત્ ।
પુનઃ પુનરુદેત્યેવં જગત્સત્યત્વધીરપિ ॥ ૧૦૨॥

વિપરીતા ભાવનેયમૈકાગ્ર્યાત્સા નિવર્તતે ।
તત્ત્વોપદેશાત્ પ્રાગેવ ભવત્યેતદુપાસનાત્ ॥ ૧૦૩॥

ઉપાસ્તયોઽત એવાત્ર બ્રહ્મશાસ્ત્રેઽપિ ચિન્તિતાઃ ।

પ્રાગનભ્યાસિનઃ પશ્ચાદ્બ્રહ્માભ્યાસેન તદ્ભવેત્ ॥ ૧૦૪॥

તચ્ચિન્તનં તત્કથનમન્યોન્યં તત્પ્રબોધનમ્ ।
એતદેકપરત્વં ચ બ્રહ્માભ્યાસં વિદુર્બુધાઃ ॥ ૧૦૫॥

તમેવ ધીરો વિજ્ઞાય પ્રજ્ઞાં કુર્વીત બ્રાહ્મણઃ ।
નાનુધ્યાયાદ્બહુઞ્છબ્દાન્વાચો વિગ્લાપનં હિ તત્ ॥ ૧૦૬॥

અનન્યાશ્ચિન્તયન્તો માં યે જનાઃ પર્યુપાસતે ।
તેષાં નિત્યાભિયુક્તાનાં યોગક્ષેમં વહામ્યહમ્ ॥ ૧૦૭॥

ઇતિ શ્રુતિસ્મૃતી નિત્યમાત્મન્યેકાગ્રતાં ધિયઃ ।
વિધત્તો વિપરીતાયા ભાવનાયાઃ ક્ષયાય હિ ॥ ૧૦૮॥

યદ્ યથા વર્તતે તસ્ય તત્ત્વં હિત્વાન્યથાત્વધીઃ ।
વિપરીત ભાવના સ્યાત્પિત્રાદાવરિધીર્યથા ॥ ૧૦૯॥

આત્મા દેહાદિભિન્નોઽયં મિથ્યા ચેદં જગત્ તયોઃ ।
દેહાદ્યાત્મત્વસત્યત્વધીર્વિપર્યયભાવના ॥ ૧૧૦॥

તત્ત્વભાવનયા નશ્યેત્સાતો દેહાતિરિક્તતામ્ ।
આત્મનો ભાવયેત્તદ્વન્મિથ્યાત્વં જગતોઽનિશમ્ ॥ ૧૧૧॥

કિં મન્ત્રજપવન્મૂર્તિધ્યાનવચ્ચાત્મભેદધીઃ ।
જગન્મિથ્યાત્વધીશ્ચાત્ર વ્યાવર્ત્યા સ્યાદુતાન્યથા ॥ ૧૧૨॥

અન્યથેતિ વિજાનીહિ દૃષ્ટાર્થત્વેન ભુક્તિવત્ ।
બુભુક્ષુર્જપવદ્ભુઙ્ક્તે ન કશ્ચિન્નિયતઃ ક્વચિત્ ॥ ૧૧૩॥

અશ્નાતિ વા ન વાશ્નાતિ ભુઙ્ક્તે વા સ્વેચ્છયાન્યથા ।
યેન કેન પ્રકારેણ ક્ષુધામપનિનીશતિ ॥ ૧૧૪॥

નિયમેન જપં કુર્યાદકૃતૌ પ્રત્યવાયતઃ ।
અન્યથાકરણેઽનર્થઃ સ્વરવર્ણવિપર્યયાત્ ॥ ૧૧૫॥

ક્ષુધેવ દૃષ્ટબાધાકૃદ્વિપરીતા ચ ભાવના ।
જેયા કેનાપ્યુપાયેન નાસ્ત્યત્રાનુષ્ઠિતેઃ ક્રમઃ ॥ ૧૧૬॥

ઉપાયઃ પૂર્વમેવોક્તસ્તચ્ચિન્તાકથનાદિકઃ ।
એતદેકપરત્વેઽપિ નિર્બન્ધો ધ્યાનવન્ન હિ ॥ ૧૧૭॥

મૂર્તિપ્રત્યયસાન્તત્યમન્યાનન્તરિતં ધિયઃ ।
ધ્યાનં તત્રાતિનિર્બન્ધો મનસશ્ચઞ્ચલાત્મનઃ ॥ ૧૧૮॥

ચઞ્ચલં હિ મનઃ કૃષ્ણ પ્રમાથિ બલવદ્દૃઢમ્ ।
તસ્યાહં નિગ્રહં મન્યે વાયોરિવ સુદુષ્કરમ્ ॥ ૧૧૯॥

અપ્યબ્ધિપાનાન્મહતઃ સુમેરૂન્મૂલનાદપિ ।
અપિ વહ્ન્યશનાત્ સાધો વિષમશ્ચિત્તનિગ્રહઃ ॥ ૧૨૦॥

કથનાદૌ ન નિર્બન્ધઃ શૃઙ્ખલાબદ્ધદેહવત્ ।
કિન્ત્વનન્તેતિહાસાદ્યૈર્વિનોદો નાટ્યવદ્ધિયઃ ॥ ૧૨૧॥

ચિદેવાત્મા જગન્મિથ્યેત્યત્ર પર્યવસાનતઃ ।
નિદિધ્યાસનવિક્ષેપો નેતિહાસાદિભિર્ભવેત્ ॥ ૧૨૨॥

કૃષિવાણિજ્યસેવાદૌ કાવ્યતર્કાદિકેષુ ચ ।
વિક્ષિપ્યતે પ્રવૃત્તા ધીસ્તૈસ્તત્ત્વસ્મૃત્યસમ્ભવાત્ ॥ ૧૨૩॥

અનુસન્દધતૈવાત્ર ભોજનાદૌ પ્રવર્તિતુમ્ ।
શક્યતેઽત્યન્તવિક્ષેપાભાવાદાશુ પુનઃ સ્મૃતેઃ ॥ ૧૨૪॥

તત્ત્વવિસ્મૃતિમાત્રાન્નાનર્થઃ કિન્તુ વિપર્યયાત્ ।
વિપર્યેતું ન કાલોઽસ્તિ ઝટિતિ સ્મરતઃ ક્વચિત્ ॥ ૧૨૫॥

તત્ત્વ સ્મૃતેરવસરો નાસ્ત્યન્યાભ્યાસશાલિનઃ ।
પ્રત્યુતાભ્યાસઘતિત્વાદ્બલાત્તત્ત્વમપેક્ષ્યતે ॥ ૧૨૬॥

તમેવૈકં વિજાનીત હ્યન્યા વાચો વિમુઞ્ચથ ।
ઇતિ શ્રુતં તથાન્યત્ર વાચો વિગ્લાપનન્ત્વિતિ ॥ ૧૨૭॥

આહારાદિ ત્યજન્નૈવ જીવેચ્છાસ્ત્રાન્તરં ત્યજન્ ।
કિં ન જીવસિ યેનૈવં કરોષ્યત્ર દુરાગ્રહમ્ ॥ ૧૨૮॥

જનકાદેઃ કથં રાજ્યમિતિ ચેદ્દૃઢબોધતઃ ।
તથા તવાપિ ચેત્તર્કં પઠ યદ્વા કૃષિં કુરુ ॥ ૧૨૯॥

મિથ્યાત્વવાસનાદાર્ઢ્યે પ્રારબ્ધક્ષયકાઙ્ક્ષયા ।
અક્લિશ્યન્તઃ પ્રવર્તન્તે સ્વસ્વકર્માનુસારતઃ ॥ ૧૩૦॥

અતિપ્રસઙ્ગો મા શક્યઃ સ્વકર્મવશવર્તિનામ્ ।
અસ્તુ વા કઃ અત્ર શક્યેત કર્મ વારયિતું વદ ॥ ૧૩૧॥

જ્ઞાનિનોઽજ્ઞાનિનશ્ચાત્ર સમેઽપ્યારબ્ધકર્મણિ ।
ન ક્લેષો જ્ઞાનિનો ધૈર્યાન્મૂઢઃ ક્લિશ્યત્યધૈર્યતઃ ॥ ૧૩૨॥

માર્ગે ગન્ત્રોર્દ્વયોઃ શ્રાન્તૌ સમાયામપ્યદૂરતામ્ ।
જાનન્ધૈર્યાદ્દ્રુતં ગચ્છેદન્યસ્તિષ્ઠતિ દીનધીઃ ॥ ૧૩૩॥

સાક્ષાત્કૃતાત્મધીઃ સમ્યગવિપર્યયબાધિતઃ ।
કિમિચ્છન્કસ્ય કામાય શરીરમનુસંજ્વરેત્ ॥ ૧૩૪॥

જગન્મિથ્યાત્વધીભાવાદાક્ષિપ્તૌ કામ્યકામુકૌ ।
તયોરભાવે સન્તાપઃ શામ્યેન્નિઃસ્નેહદીપવત્ ॥ ૧૩૫॥

ગન્ધર્વપત્તને કિંચિન્નેન્દ્રજાલિકનિર્મિતમ્ ।
જાનન્ કામયતે કિન્તુ જિહાસતિ હસન્નિદમ્ ॥ ૧૩૬॥

આપાતરમણીયેષુ ભોગેષ્વેવં વિચારવાન્ ।
નાનુરજ્જતિ કિન્ત્વેતાન્ દોષદૃષ્ટ્યા જિહાસતિ ॥ ૧૩૭॥

અર્થાનામર્જને ક્લેશસ્તથૈવ પરિરક્ષણે ।
નાશે દુઃખં વ્યયે દુઃખં ધિગર્થાન્ક્લેશકારિણઃ ॥ ૧૩૮॥

માંસપાઞ્ચાતિકાયાસ્તુ યન્ત્રલોલેઽઙ્ગપઞ્જરે ।
સ્નાય્વસ્થિગ્રન્થિશાલિન્યાઃ સ્ત્રિયાઃ કિમિવ શોભનમ્ ॥ ૧૩૯॥

એવમાદિષુ શાસ્ત્રેષુ દોષાઃ સમ્યક્પ્રપઞ્ચિતાઃ ।
વિમૃશન્નનિશન્તાનિ કથં દુઃખેષુ મજ્જતિ ॥ ૧૪૦॥

ક્ષુધયા પીડ્યમાનોઽપિ ન વિષં હ્યત્તુમિચ્છતિ ।
મિષ્ટાન્નધ્વસ્તતૃઙ્જાનન્નામૂઢસ્તજ્જિઘત્સતિ ॥ ૧૪૧॥

પ્રારબ્ધકર્મપ્રાબલ્યાદ્ભોગેષ્વિચ્છા ભવેદ્યદિ ।
ક્લિશ્યન્નેવ તદાપ્યેષ ભુઙ્ક્તે વિષ્ટિગૃહીતવત્ ॥ ૧૪૨॥

ભુઞ્જાનાસ્તાનપિ બુધાઃ શ્રદ્ધાવન્તઃ કુટુમ્બિનઃ ।
નાદ્યાપિ કર્મ નશ્છિન્નમિતિ ક્લિશ્યન્તિ સન્તતમ્ ॥ ૧૪૩॥

નાયં ક્લેશોઽત્ર સંસારતાપઃ કિન્તુ વિરક્તતા ।
ભ્રાન્તિજ્ઞાનનિદાનો હિ તાપઃ સાંસારિકઃ સ્મૃતઃ ॥ ૧૪૪॥

વિવેકેન પરિક્લિશ્યન્નલ્પભોગેન તૃપ્યતિ ।

અન્યથાનન્તભોગેઽપિ નૈવ તૃપ્યતિ કર્હિચિત્ ॥ ૧૪૫॥

ન જાતુ કામઃ કામાનામુપભોગેન શામ્યતિ ।
હવિષા કૃષ્ણવર્ત્મેવ ભૂય એવ અભિવર્ધતે ॥ ૧૪૬॥

પરિજ્ઞાયોપભુક્તો હિ ભોગો ભવતિ તુષ્ટયે ।
વિજ્ઞાય સેવિતશ્ચૌરી મૈત્રીમેતિ ન ચૌરતામ્ ॥ ૧૪૭॥

મનસો નિગૃહીતસ્ય લીલાભોગોઽલ્પકોઽપિ યઃ ।
તમેવાલબ્ધવિસ્તારં ક્લિષ્ટત્વાદ્બહુ મન્યતે ॥ ૧૪૮॥

બદ્ધમુક્તો મહીપાલો ગ્રામમાત્રેણ તુષ્યતિ ।
પરૈર્ન બદ્ધો નાક્રાન્તો ન રાષ્ટ્રં બહુ મન્યતે ॥ ૧૪૯॥

વિવેકે જાગ્રતિ સતિ દોષદર્શનલક્ષણે ।
કથમારબ્ધકર્માપિ ભોગેચ્છાં જનયિષ્યતિ ॥ ૧૫૦॥

નૈષ દોષો યતોઽનેકવિધં પ્રારબ્ધમીક્ષ્યતે ।
ઇચ્છાનિચ્છા પરેચ્છા ચ પ્રારબ્ધં ત્રિવિધં સ્મૃતમ્ ॥ ૧૫૧॥

અપથ્યસેવિનશ્ચૌરા રાજદારરતા અપિ ।
જાનન્ત એવ સ્વાનર્થમિચ્છન્ત્યારબ્ધકર્મતઃ ॥ ૧૫૨॥

ન ચાત્રૈતદ્વારયિતુમીશ્વરેણાપિ શક્યતે ।
યત ઈશ્વર એવાહ ગીતાયામર્જુનં પ્રતિ ॥ ૧૫૩॥

સદૃશં ચેષ્ટતે સ્વસ્યાઃ પ્રકૃતેર્જ્ઞાનવાનપિ ।
પ્રકૃતિં યાન્તિ ભૂતાનિ નિગ્રહઃ કિં કરિષ્યતિ ॥ ૧૫૪॥

અવશ્યં ભાવિભાવાનાં પ્રતીકારો ભવેદ્યદિ ।
તદા દુઃખૈર્ન લિપ્યેરન્ નલરામયુધિષ્ઠિરાઃ ॥ ૧૫૫॥

ન ચેશ્વરત્વમીશસ્ય હીયતે તાવતા યતઃ ।
અવશ્યં ભાવિતાપ્યેષઈશ્વરેણ એવ નિર્મિતા ॥ ૧૫૬॥

પ્રશ્નોત્તરાભ્યામેવૈતદ્ગમ્યતેઽર્જુનકૃષ્ણયોઃ ।
અનિચ્છાપૂર્વકં ચાસ્તિ પ્રારબ્ધમિતિ તચ્છૃણુ ॥ ૧૫૭॥

અથ કેન પ્રયુક્તોઽયં પાપં ચરતિ પૂરુષઃ ।
અનિચ્છન્નપિ વાર્ષ્ણેય બલાદિવ નિયોજિતઃ ॥ ૧૫૮॥

કામ એષ ક્રોધ એષ રજોગુણસમુદ્ભવઃ ।
મહાશનો મહાપાપ્મા વિદ્ધ્યેનમિહ વૈરિણમ્ ॥ ૧૫૯ ॥

સ્વભાવજેન કૌન્તેય નિબદ્ધઃ સ્વેન કર્મણા ।
કર્તું નેચ્છસિ યન્મોહાત્કરિષ્યસ્યવશોઽપિ તત્ ॥ ૧૬૦ ॥

નાનિચ્છન્તો ન ચેચ્છન્તઃ પરદાક્ષિણ્યસંયુતાઃ ।
સુખદુઃખે ભજન્ત્યેતત્પરેચ્છા પૂર્વકર્મ હિ ॥ ૧૬૧ ॥

કથં તર્હિ કિમિચ્છન્નિત્યેવમિચ્છા નિષિધ્યતે ।
નેચ્છાનિષેધઃ કિન્ત્વિચ્છાબાધો ભર્જિતબીજવત્ ॥ ૧૬૨ ॥

ભર્જિતાનિ તુ બીજાનિ સન્ત્યકાર્યકરાણિ ચ ।
વિદ્વદિચ્છા યથેષ્ટવ્યા સત્ત્વબોધાન્ન કાર્યકૃત્ ॥ ૧૬૩ ॥

દગ્ધબીજમરોહેઽપિ ભક્ષણાયોપયુજ્યતે ।
વિદ્વદિચ્છાપ્યલ્પભોગં કુર્યાન્ન વ્યસનં બહુ ॥ ૧૬૪ ॥

ભોગેન ચરિતાર્થત્વાત્પ્રારબ્ધં કર્મ હીયતે ।
ભોક્તવ્યસત્યતાભ્રાન્ત્યાવ્યસનં તત્ર જાયતે ॥ ૧૬૫ ॥

મા વિનશ્યત્વયં ભોગો વર્ધતામુત્તરોત્તરમ્ ।
મા વિઘ્નાઃ પ્રતિબધ્નન્તુ ધન્યોઽસ્મ્યસ્માદિતિ ભ્રમઃ ॥ ૧૬૬ ॥

યદભાવિ ન તદ્ભાવિ ભાવિ ચેન્ન તદન્યથા ।
ઇતિ ચિન્તાવિષઘ્નોઽયં બોધો ભ્રમનિવર્તકઃ ॥ ૧૬૭ ॥

સમેઽપિ ભોગે વ્યસનં ભ્રાન્તો ગચ્છેન્ન બુદ્ધિમાન્ ।
અશક્યાર્થસ્ય સઙ્કલ્પાદ્ભ્રાન્તસ્ય વ્યસનં બહુ ॥ ૧૬૮ ॥

માયામયત્વં ભોગ્યસ્ય બુદ્ધ્વાસ્થામુપસંહરન્ ।
ભુઞ્જાનોઽપિ ન સઙ્કલ્પં કુરુતે વ્યસનં કુતઃ ॥ ૧૬૯ ॥

સ્વપ્નેન્દ્રજાલસદૃશમચિન્ત્યરચનાત્મકમ્ ।
દૃષ્ટનષ્ટં જગત્પશ્યન્કથં તત્રાનુરજ્જતિ ॥ ૧૭૦ ॥

સ્વસ્વપ્નમાપરોક્ષેણ દૃષ્ટ્વા પશ્યન્સ્વજાગરમ્ ।
ચિન્તયેદપ્રમત્તઃ સન્નુભાવનુદિનં મુહુઃ ॥ ૧૭૧ ॥

ચિરં તયોઃ સર્વસામ્યમનુસન્ધાય જાગરે ।
સત્યત્વબુદ્ધિં સંત્યજ્ય નાનુરજ્જતિ પૂર્વવત્ ॥ ૧૭૨ ॥

ઇન્દ્રજાલમિદં દ્વૈતમચિન્ત્યરચનાત્વતઃ ।
ઇત્યવિસ્મરતો હાનિઃ કા વા પ્રારબ્ધભોગતઃ ॥ ૧૭૩॥

નિર્બન્ધસ્તત્ત્વવિદ્યાયા ઇન્દ્રજાલત્વસંસ્મૃતૌ ।
પ્રારબ્ધસ્યાગ્રહો ભોગે જીવસ્ય સુખદુઃખયોઃ ॥ ૧૭૪॥

વિદ્યારબ્ધે વિરુદ્ધ્યેતે ન ભિન્નવિષયત્વતઃ ।
જાનદ્ભિરપ્યૈન્દ્રજાલો વિનોદો દૃશ્યતે ખલુ ॥ ૧૭૫॥

જગત્સત્યત્વમાપાદ્ય પ્રારબ્ધં ભોજયેદ્યદિ ।
તદા વિરોધિ વિદ્યાયા ભોગમાત્રાન્ન સત્યતા ॥ ૧૭૬॥

અન્યૂનો જાયતે ભોગઃ કલ્પિતૈઃ સ્વપ્નવસ્તુભિઃ ।
જાગ્રત્વસ્તુભિરપ્યેવમસત્યૈર્ભોગ ઇષ્યતામ્ ॥ ૧૭૭॥

યદિ વિદ્યાપહ્નુવિત જગત્પ્રારબ્ધ ઘાતિની ।
તદા સ્યાન્ન તુ માયાત્વબોધેન તદપહ્નવઃ ॥ ૧૭૮॥

અનપહ્નુત્ય લોકાસ્તદિન્દ્રજાલમિદં ત્વિતિ ।
જાનન્ત્યેવાનપહ્નુત્ય ભોગં માયાત્વધીસ્તથા ॥ ૧૭૯॥

યત્ર ત્વસ્ય જગત્ સ્વાત્મા પશ્યેત્કસ્તત્ર કેન કિમ્ ।
કિં જિઘ્રેત્કિં વદેદ્વેતિ શ્રુતૌ તુ બહુ ઘોષિતમ્ ॥ ૧૮૦॥

તેન દ્વૈતમપહ્નુત્ય વિદ્યોદેતિ ન ચાન્યથા ।
તથા ચ વિદુષો ભોગઃ કથં સ્યાદિતિ ચેત્ શ‌ૃણુ ॥ ૧૮૧॥

સુષુપ્તિવિષયા મુક્તિવિષયા વા શ્રુતિસ્ત્વિતિ ।
ઉક્તં સ્વાપ્યયસમ્પત્યોરિતિ સૂત્રે હ્યતિસ્ફુટમ્ ॥ ૧૮૨॥

અન્યથા યાજ્ઞવલ્ક્યાદેરાચાર્યત્વં ન સમ્ભવેત્ ।
દ્વૈતદૃષ્ટાવવિદ્વત્તા દ્વૈતાદૃષ્ટૌ ન વાગ્વદેત્ ॥ ૧૮૩॥

નિર્વિકલ્પસમાધૌ તુ દ્વૈતાદર્શનહેતુતઃ ।
સૈવાપરોક્ષવિદ્યેતિ ચેત્સુષુપ્તિસ્તથા ન કિમ્ ॥ ૧૮૪॥

આત્મતત્ત્વં ન જાનાતિ સુપ્તૌ યદિ તદા ત્વયા ।
આત્મધીરેવ વિદ્યેતિ વાચ્યં ન દ્વૈતવિસ્મૃતિઃ ॥ ૧૮૫॥

ઉભયં મિલિતં વિદ્યા યદિ તર્હિ ઘટાદયઃ ।

અર્ધવિદ્યાભાજિનઃ સ્યુઃ સકલદ્વૈતવિસ્મૃતેઃ ॥ ૧૮૬॥

મશકધ્વનિમુખ્યાનાં વિક્ષેપાણાં બહુત્વતઃ ।
તત્ત્વવિદ્યા તથા ન સ્યાદ્ઘટાદીનાં યથા દૃઢા ॥ ૧૮૭॥

આત્મધીરેવ વિદ્યેતિ યદિ તર્હિ સુખી ભવ ।
દુષ્ટચિત્તં નિરુન્ધ્યાચ્ચેન્નિરુન્ધિ ત્વં યથાસુખમ્ ॥ ૧૮૮॥

તદિષ્ટમેષ્ટવ્યમાયામયત્વસ્ય સમીક્ષણાત્ ।
ઇચ્છન્નપ્યજ્ઞવન્નેચ્છેત્કિમિચ્છન્નિતિ હિ શ્રુતમ્ ॥ ૧૮૯॥

રાગો લિઙ્ગમબોધસ્ય સન્તુ રાગાદયો બુધે ।
ઇતિ શાસ્ત્રદ્વયં સાર્થમેવં સત્યવિરોધતઃ ॥ ૧૯૦॥

જગન્મિથ્યાત્વવત્ સ્વાત્માસઙ્ગત્વસ્ય સમીક્ષણાત્ ।
કસ્ય કામાયેતિ વચો ભોક્ત્રભાવવિવક્ષયા ॥ ૧૯૧॥

પતિજાયાદિકં સર્વં તત્તદ્ભોગાય નેચ્છતિ ।
કિન્ત્વાત્મભોગાર્થમિતિ શ્રુતાવુદ્ઘોષિતં બહુ ॥ ૧૯૨॥

કિં કૂટસ્થશ્ચિદાભાસોઽથ વા કિમુભયાત્મકઃ ।
ભોક્તા તત્ર ન કૂટસ્થોઽસઙ્ગત્વાદ્ભોક્તૃતાં વ્રજેત્ ॥ ૧૯૩॥

સુખદુઃખાભિમાનાખ્યો વિકારો ભોગ ઉચ્યતે ।
કૂટસ્થસ્ય વિકારી ચેત્યેતન્ન વ્યાહતં કથમ્ ॥ ૧૯૪॥

વિકારિબુદ્ધ્યધીનત્વાદાભાસે વિકૃતાવપિ ।
નિરધિષ્ઠાનવિભ્રાન્તિઃ કેવલા ન હિ તિષ્ઠતિ ॥ ૧૯૫॥

ઉભયાત્મક એવાતો લોકે ભોક્તા નિગદ્યતે ।
તદૃગાત્માનમારભ્ય કૂટસ્થઃ શેષિતઃ શ્રુતૌ ॥ ૧૯૬॥

આત્મા કતમ ઇત્યુક્તે યાજ્ઞવલ્ક્યો વિબોધયન્ ।
વિજ્ઞાનમયમારભ્યાસઙ્ગં તં પર્યશેષયત્ ॥ ૧૯૭॥

કોઽયમાત્મેત્યેવમાદૌ સર્વત્રાત્મવિચારતઃ ।
ઉભયાત્મકમારભ્ય કૂટસ્થઃ શેષ્યતે શ્રુતૌ ॥ ૧૯૮॥

કૂટસ્થસત્યતાં સ્વસ્મિન્નધ્યસ્યાત્મા વિવેકતઃ ।
તાત્વિકીં ભોક્તૃતાં મત્વા ન કદાચિજ્જિહાસતિ ॥ ૧૯૯॥

ભોક્તા સ્વસ્યૈવ ભોગાય પતિજાયાદિમિચ્છતિ ।
એષ લૌકિકવૃત્તાન્તઃ શ્રુત્યા સમ્યગનૂદિતઃ ॥ ૨૦૦॥

ભોગ્યાનાં ભોક્તૃશેષત્વાન્મા ભોગ્યેષ્વનુરજ્યતામ્ ।
ભોક્તર્યેવ પ્રધાનેઽતોઽનુરાગં તં વિધિત્સતિ ॥ ૨૦૧॥

યા પ્રીતિરવિવેકાનાં વિષયેષ્વનપાયિની ।
ત્વામનુસ્મરતઃ સા મે હૃદયાન્માપસર્પતુ ॥ ૨૦૨॥

ઇતિ ન્યાયેન સર્વસ્માદ્ભોગ્યજાતાદ્વિરક્તધીઃ ।
ઉપસંહૃત્ય તાં પ્રીતિં ભોક્તર્યેવં બુભુત્સતે ॥ ૨૦૩॥

સ્રક્ચન્દનવધૂવસ્ત્રસુવર્ણાદિષુ પામરઃ ।
અપ્રમત્તો યથા તદ્વન્ન પ્રમાદ્યતિ ભોક્તરિ ॥ ૨૦૪॥

કાવ્યનાટકતર્કાદિમભ્યસ્યતિ નિરન્તરમ્ ।
વિજિગીષુર્યથા તદ્વન્મુમુક્ષુઃ સ્વં વિચારયેત્ ॥ ૨૦૫॥

જપયાગોપાસનાદિ કુરુતે શ્રદ્ધયા યથા ।
સ્વર્ગાદિવાઞ્છયા તદ્વચ્છ્રદ્દધ્યાત્સ્વે મુમુક્ષયા ॥ ૨૦૬॥

ચિત્તૈકાગ્ર્યં યથા યોગી મહાયાસેન સાધયેત્ ।
અણિમાદિપ્રેપ્સયૈવં વિવિચ્યાત્સ્વં મુમુક્ષયા ॥ ૨૦૭॥

કૌશલાનિ વિવર્ધન્તે તેષામભ્યાસપાટવાત્ ।
યથા તદ્વદ્વિવેકોઽસ્યાપ્યભ્યાસાદ્વિશદાયતે ॥ ૨૦૮॥

વિવિઞ્ચતા ભોક્તૃતત્ત્વં જાગ્રદાદિષ્વસઙ્ગતા ।
અન્વયવ્યતિરેકાભ્યાં સાક્ષિણ્યધ્યવસીયતે ॥ ૨૯॥

યત્ર યદ્દૃશ્યતે દ્રષ્ટા જાગ્રત્સ્વપ્નસુષુપ્તિષુ ।
તત્રૈવ તન્નેતરત્રેત્યનુભૂતિર્હિ સંમતા ॥ ૨૧૦॥

સ યત્તત્રેક્ષતે કિંચિત્તેનાનન્વાગતો ભવેત્ ।
દૃષ્ટ્વૈવ પુણ્યં પાપં ચેત્યેવં શ્રુતિષુ ડિણ્ડિમઃ ॥ ૨૧૧॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિ પ્રપઞ્ચં યત્પ્રકાશતે ।
તદ્બ્રહ્માહમિતિ જ્ઞાત્વા સર્વબન્ધૈઃ પ્રમુચ્યતે ॥ ૨૧૨॥

એક એવ આત્મા મન્તવ્યો જાગ્રત્સ્વપ્નસુષુપ્તિષુ ।
સ્થાનત્રયવ્યતીતસ્ય પુનર્જન્મ ન વિદ્યતે ॥ ૨૧૩॥

ત્રિષુ ધામસુ યદ્ભોગ્યં ભોક્તા ભોગશ્ચ યદ્ભવેત્ ।
તેભ્યો વિલક્ષણઃ સાક્ષી ચિન્માત્રોઽહં સદાશિવઃ ॥ ૨૧૪॥

એવં વિવેચિતે તત્ત્વે વિજ્ઞામયશબ્દિતઃ ।
ચિદાભાસો વિકારી યો ભોક્તૃત્વં તસ્ય શિષ્યતે ॥ ૨૧૫॥

માયિકોઽયં ચિદાભાસઃ શ્રુતેરનુભવાદપિ ।
ઇન્દ્રજાલં જગત્પ્રોક્તં તદન્તઃપાત્યયં યતઃ ॥ ૨૧૬॥

વિલોપોઽસ્ય સુષુપ્ત્યાદૌ સાક્ષિણા હ્યનુભૂયતે ।
એતાદૃશં સ્વસ્વભાવં વિવિનક્તિ પુનઃ પુનઃ ॥ ૨૧૭॥

વિવિચ્ય નાશં નિશ્ચિત્ય પુનર્ભોગં ન વાઞ્છતિ ।
મુમૂર્ષુઃ શાયિતો ભૂમૌ વિવાહં કોઽભિવાઞ્છતિ ॥ ૨૧૮॥

જિહ્રેતિ વ્યવહર્તું ચ ભોક્તાહમિતિ પૂર્વવત્ ।
છિન્નનાશ ઇવ હ્રિતઃ ક્લિશ્યન્નારબ્ધમશ્નુતે ॥ ૨૧૯॥

યદા સ્વસ્યાપિ ભોક્તૃત્વં મન્તું જિહ્રેત્યયં તદા ।
સાક્ષિણ્યારોપયેદેતદિતિ કૈવ કથા વૃથા ॥ ૨૨૦॥

ઇત્યભિપ્રેત્ય ભોક્તારમાક્ષિપત્યવિશઙ્કયા ।
કસ્ય કામાયેતિ તતઃ શરીરાનુજ્વરો ન હિ ॥ ૨૨૧॥

સ્થૂલં સૂક્ષ્મં કારણં ચ શરીરં ત્રિવિધં સ્મૃતમ્ ।
અવશ્યં ત્રિવિધોઽસ્ત્યેવ તત્ર તત્રોચિતો જ્વરઃ ॥ ૨૨૨॥

વાતપિત્તશ્લેષ્મજન્યા વ્યાધયઃ કોટિશસ્તનૌ ।
દુર્ગન્ધિત્વં કુરૂપત્વં દાહભઙ્ગાદયસ્તથા ॥ ૨૨૩॥

કામક્રોધાદયઃ શાન્તિદાન્ત્યાદ્યા લિઙ્ગદેહગાઃ ।
જ્વરાદ્વયેઽપિ બાધન્તે પ્રાપ્ત્યાપ્રાપ્ત્યા નરં ક્રમાત્ ॥ ૨૨૪॥

સ્વં પરં ચ ન વેત્ત્યાત્મા વિનષ્ટ ઇવ કારણે ।
આગામિદુઃખબીજં ચેત્યેતદિન્દ્રેણ દર્શિતમ્ ॥ ૨૨૫॥

એતે જ્વરાઃ શરીરેષુ ત્રિષુ સ્વાભાવિકા મતાઃ ।
વિયોગે તુ જ્વરૈસ્તાનિ શરીરાણ્યેવ નાસતે ॥ ૨૨૬॥

તન્તોર્વિયુજ્યેન્ન પટો વાલેભ્યઃ કમ્બલો યથા ।

મૃદો ઘટસ્તથા દેહો જ્વરેભ્યોઽપીતિ દૃશ્યતામ્ ॥ ૨૨૭॥

ચિદાભાસે સ્વતઃ કોઽપિ જ્વરો નાસ્તિ યતશ્ચિતઃ ।
પ્રકાશૈકસ્વભાવત્વમેવ દૃષ્ટં ન ચેતરત્ ॥ ૨૨૮॥

ચિદાભાસેઽપ્યસમ્ભાવ્યા જ્વરાઃ સાક્ષિણિ કા કથા ।
એવમેવૈકતાં મેને ચિદાભાસો હ્યવિદ્યયા ॥ ૨૨૯॥

સાક્ષિસત્યત્વમધ્યસ્ય સ્વેનોપેતે વપુસ્ત્રયે ।
તત્સર્વં વાસ્તવં સ્વસ્ય સ્વરૂપમિતિ મન્યતે ॥ ૨૩૦॥

એતસ્મિન્ભ્રાન્તિકાલેઽયં શરીરેષુ જ્વરત્સ્વથ ।
સ્વયમેવ જ્વરામીતિ મન્યતે હિ કુટુમ્બિવત્ ॥ ૨૩૧॥

પુત્રદારેષુ તૃપ્યત્સુ તૃપ્યામીતિ યથા વૃથા ।
મન્યતે પુરુષસ્તદ્વદાભાસોઽપ્યભિમન્યતે ॥ ૨૩૨॥

વિવિચ્ય ભ્રાન્તિમુજ્ઝિત્વા સ્વમપ્યગણયન્ સદા ।
ચિન્તયન્સાક્ષિણં કસ્માચ્છરીરમનુસંજ્વરેત્ ॥ ૨૩૩॥

અયથાવસ્તુસર્પાદિજ્ઞાનં હેતુઃ પલાયને ।
રજ્જુજ્ઞાનેઽહિધીધ્વસ્તૌ કૃતમપ્યનુશોચતિ ॥ ૨૩૪॥

મિથ્યાભિયોગદોષસ્ય પ્રાયશ્ચિત્તત્વસિદ્ધયે ।
ક્ષમાપયન્નિવાત્માનં સાક્ષિણં શરણં ગતઃ ॥ ૨૩૫॥

આવૃત્તપાપનૂત્યર્થં સ્નાનાદ્યાવર્તતે યથા ।
આવર્તયન્નિવ ધ્યાનં સદા સાક્ષિપરાયણઃ ॥ ૨૩૬॥

ઉપસ્થકુષ્ઠિની વેશ્યા વિલાસેષુ વિલજ્જતે ।
જાનતોઽગ્રે તથાભાસઃ સ્વપ્રખ્યાતૌ વિલજ્જતે ॥ ૨૩૭॥

ગૃહીતો બ્રાહ્મણો મ્લેચ્છૈઃ પ્રાયશ્ચિત્તં ચરન્પુનઃ ।
મ્લેચ્છૈઃ સઙ્કીર્યતે નૈવ તથાભાસઃ શરીરકૈઃ ॥ ૨૩૮॥

યૌવરાજ્યે સ્થિતો રાજપુત્રઃ સામ્રાજ્યવાઞ્છયા ।
રાજાનુકારી ભવતિ તથા સાક્ષ્યનુકાર્યયમ્ ॥ ૨૩૯॥

યો બ્રહ્મ વેદ બ્રહ્મૈવ ભવત્યેવેતિ શ્રુતિમ્ ।
શ્રુત્વા તદેકચિત્તઃ સન્બ્રહ્મ વેત્તિ ન ચેતરત્ ॥ ૨૪૦॥

દેવત્વકામા હ્યગ્ન્યાદૌ પ્રવિશન્તિ યથા તથા ।
સાક્ષિત્વેનાવશેષાય સ્વવિનાશં સ વાઞ્છતિ ॥ ૨૪૧॥

યાવત્સ્વદેહદાહં સ નરત્વં નૈવ મુઞ્ચતિ ।
તાવદારબ્ધદેહઃ સ્યાન્નાભાસત્વવિમોચનમ્ ॥ ૨૪૨॥

રજ્જુજ્ઞાનેઽપિ કમ્પાદિઃ શનૈરેવોપશામ્યતિ ।
પુનર્મન્દાન્ધકારિ સા રજ્જુઃ ક્ષિપ્તોરગી ભવેત્ ॥ ૨૪૩॥

એવમારબ્ધભોગોઽપિ શનૈઃ શામ્યતિ નો હઠાત્ ।
ભોગકાલે કદાચિત્તુ મર્ત્યોઽહમિતિ ભાસતે ॥ ૨૪૪॥

નૈતાવતાપરાધેન તત્ત્વજ્ઞાનં વિનશ્યતિ ।
જીવન્મુક્તિવ્રતં નેદં કિન્તુ વસ્તુસ્થિતિઃ ખલુ ॥ ૨૪૫॥

દશમોઽપિ શિરસ્તાડં રુદન્બુદ્ધ્વા ન રોદિતિ ।
શિરોવ્રણસ્તુ માસેન શનૈઃ શામ્યતિ નો તદા ॥ ૨૪૬॥

દશમામૃતિલાભેન જાતો હર્ષો વ્રણવ્યથામ્ ।
તિરોધત્તે મુક્તિલાભસ્તથા પ્રારબ્ધદુઃખિતામ્ ॥ ૨૪૭॥

વ્રતાભાવાદ્યદાધ્યાસસ્તદા ભૂયો વિવિચ્યતામ્ ।
રસસેવી દિને ભુઙ્ક્તે ભૂયો ભૂયો યથા તથા ॥ ૨૪૮॥

શમયત્યૌષધેનાયં દશમઃ સ્વવ્રણં યથા ।
ભોગેન શમયિત્વૈતત્પ્રારબ્ધં મુચ્યતે તથા ॥ ૨૪૯॥

કિમિચ્છન્નિતિ વાક્યોક્તઃ શોકમોક્ષ ઉદીરિતઃ ।
આભાસસ્ય હ્યવસ્થૈષા ષષ્ઠી તૃપ્તિસ્તુ સપ્તામિ ॥ ૨૫૦॥

સાઙ્કુશા વિષયૈસ્તૃપ્તિરિયં તૃપ્તિર્નિરઙ્કુશા ।
કૃતં કૃત્યં પ્રાપણીયં પ્રાપ્તમિત્યેવ તૃપ્યતિ ॥ ૨૫૧॥

ઐહિકામુષ્મિકવ્રાતસિદ્ધ્યૈ મુક્તેશ્ચ સિદ્ધયે ।
બહુ કૃત્યં પુરાસ્યાભૂત્તત્સર્વમધુના કૃતમ્ ॥ ૨૫૨॥

તદેતત્કૃતકૃત્યત્વં પ્રતિયોગિપુરઃસરમ્ ।
અનુસન્દધદેવાયમેવં તૃપ્યતિ નિત્યશઃ ॥ ૨૫૩॥

દુઃખિનોઽજ્ઞાઃ સંસરન્તુ કામં પુત્રાદ્યપેક્ષયા ।
પરમાનન્દપૂર્ણોઽહં સંસરામિ કિમિચ્છયા ॥ ૨૫૪॥

અનુતિષ્ઠન્તુ કર્માણિ પરલોકાયિયાસવઃ ।
સર્વલોકાત્મકઃ કસ્માદનુતિષ્ઠામિ કિં કથમ્ ॥ ૨૫૫॥

વ્યાચક્ષતાન્તે શાસ્ત્રાણિ વેદાનધ્યાપયન્તુ વા ।
યેઽત્રાધિકારિણો મે તુ નાધિકારોઽક્રિયત્વતઃ ॥ ૨૫૬॥

નિદ્રાભિક્ષે સ્નાનશૌચે નેચ્છામિ ન કરોમિ ચ ।
દ્રષ્ટારશ્ચેત્કલ્પયન્તિ કિં મે સ્યાદન્યકલ્પનાત્ ॥ ૨૫૭॥

ગુઞ્જાપુઞ્જાદિ દહ્યેત નાન્યારોપિતવહ્નિના ।
નાન્યારોપિતસંસારધર્માનેવમહં ભજે ॥ ૨૫૮॥

શ ृણ્વન્ત્વજ્ઞાતતત્ત્વાસ્તે જાનં કસ્માચ્છૃણોમ્યહમ્ ।
મન્યન્તાં સંશયાપન્ના ન મન્યેઽહમસંશયઃ ॥ ૨૫૯॥

વિપર્યસ્તો નિદિધ્યાસેત્કિં ધ્યાનમવિપર્યયે ।
દેહાત્મત્વવિપર્યાસં ન કદાચિદ્ભજામ્યહમ્ ॥ ૨૬૦॥

અહં મનુષ્ય ઇત્યાદિવ્યવહારો વિનાપ્યમુમ્ ।
વિપર્યાસં ચિરાભ્યસ્તવાસનાતોઽવકલ્પતે ॥ ૨૬૧॥

પ્રારબ્ધકર્મણિ ક્ષીણે વ્યવહારો નિવર્તતે ।
કર્માક્ષયે ત્વસૌ નૈવ શામ્યેદ્ધ્યાનસહસ્રતઃ ॥ ૨૬૨॥

વિરલત્વં વ્યવહૃતેરિષ્ટં ચેદ્ધ્યાનમસ્તુ તે ।
અબાધિકાં વ્યવહૃતિં પશ્ય ધ્યાયામ્યહં કુતઃ ॥ ૨૬૩॥

વિક્ષેપો નાસ્તિ યસ્માન્મે ન સમાધિસ્તતો મમ ।
વિક્ષેપો વા સમાધિર્વા મનસઃ સ્યાદ્વિકારિણઃ ॥ ૨૬૪॥

નિત્યાનુભવરૂપસ્ય કો મેઽત્રાનુભવઃ પૃથક્ ।
કૃતં કૃત્યં પ્રાપણીયં પ્રાપ્તમિત્યેવ નિશ્ચયઃ ॥ ૨૬૫॥

વ્યવહારો લૌકિકો વા શાસ્ત્રીયોઽપ્યન્યથાપિ વા ।
મમાકર્તુરલેપસ્ય યથારબ્ધં પ્રવર્તતામ્ ॥ ૨૬૬॥

અથવા કૃતકૃત્યોઽપિ લોકાનુગ્રહકામ્યયા ।
શાસ્ત્રીયેણૈવ માર્ગેણ વર્તેઽહં કા મમ ક્ષતિઃ ॥ ૨૬૭॥

દેવાર્ચનસ્નાનશૌચભિક્ષાદૌ વર્તતાં વપુઃ ।

તારં જપતુ વાક્તદ્વત્પઠત્વામ્નાયમસ્તકમ્ ॥ ૨૬૮॥

વિષ્ણું ધ્યાયતુ ધીર્યદ્વા બ્રહ્માનન્દે વિલીયતામ્ ।
સાક્ષ્યહં કિંચિદપ્યત્ર ન કુર્વે નાપિ કારયે ॥ ૨૬૯॥

એવં ચ કલહઃ કુત્ર સમ્ભવેત્કર્મિણ મમ ।
વિભિન્નવિષયત્વેન પૂર્વાપરસમુદ્રવત્ ॥ ૨૭૦॥

વપુર્વાગ્ધીષુ નિર્બન્ધઃ કર્મિણો ન તુ સાક્ષિણિ ।
જ્ઞાનિનઃ સાક્ષ્યલેપત્વે નિર્બન્ધો નેતરત્ર હિ ॥ ૨૭૧॥

એવં ચાન્યોન્યવૃત્તાન્તાનભિજ્ઞૌ બધિરાવિવ ।
વિવદેતાં બુદ્ધિમન્તો હસન્ત્યેવ વિલોક્ય તૌ ॥ ૨૭૨॥

યં કર્મી ન વિજાનાતિ સાક્ષિણં તસ્ય તત્ત્વવિત્ ।
બ્રહ્મત્વં બુધ્યતાં તત્ર કર્મિણઃ કિં વિહીયતે ॥ ૨૭૩॥

દેહવાગ્બુદ્ધયસ્ત્યક્તા જ્ઞાનિનાનૃતબુદ્ધિતઃ ।
કર્મી પ્રવર્તયવાભિર્જ્ઞાનિનો હીયતેઽત્ર કિમ્ ॥ ૨૭૪॥

પ્રવૃત્તિર્નોપયુક્તા ચેન્નિવૃત્તિઃ ક્વોપયુજ્યતે ।
બોધે હેતુર્નિવૃત્તિશ્ચેદ્બુભુત્સાયાં તથેતરા ॥ ૨૭૫॥

બુદ્ધશ્ચેન્ન બુભુત્સેત નાપ્યસૌ બુધ્યતે પુનઃ ।
અબાધાદનુવર્તેત બોધો ન ત્વન્યસાધનાત્ ॥ ૨૭૬॥

નાવિદ્યા નાપિ તત્કાર્યં બોધં બાધિતુમર્હતિ ।
પુરૈવ તત્ત્વબોધેન બાધિતે તે ઉભે યતઃ ॥ ૨૭૭॥

બાધિતં દૃશ્યતામક્ષૈસ્તેન બાધો ન શઙ્ક્યતે ।
જીવન્નાખુર્ન માર્જારં હન્તિ હન્યાત્કથં મૃતઃ ॥ ૨૭૮॥

અપિ પાશુપતાસ્ત્રેણ વિદ્ધશ્ચેન્ન મમાર યઃ ।
નિષ્ફલેષુવિતુન્નાઙ્ગો નઙ્ક્ષ્યતીત્યત્ર કા પ્રમા ॥ ૨૭૯॥

આદાવવિદ્યયા ચિત્રૈઃ સ્વકાર્યૈર્જૃમ્ભમાણયા ।
યુદ્ધ્વા બોધોઽજયત્સોઘ સુદૃઢો બાધ્યતાં કથમ્ ॥ ૨૮૦॥

તિષ્ઠન્તુવજ્ઞાનતત્કાર્યશવાબોધેન મારિતાઃ ।
ન હાનીર્બોધ સમ્રાજઃ કીર્તિઃ પ્રત્યુત તસ્ય તૈઃ ॥ ૨૮૧॥

ય એવમતિશૂરેણ બોધેન ન વિયુજ્યતે ।
નિવૃત્ત્યા વા પ્રવૃત્ત્યા વા દેહાદિગતયાસ્ય કિમ્ ॥ ૨૮૨॥

પ્રવૃત્તાવાગ્રહો ન્યાય્યો બોધહીનસ્ય સર્વથા ।
સ્વર્ગાય વાપવર્ગાય યોજિતવ્યં યતો નૃભિઃ ॥ ૨૮૩॥

વિદ્વાંશ્ચેત્તાદૃશાં મધ્યે તિષ્ઠેત્તદનુરોધતઃ ।
કાયેન મનસા વાચા કરોત્યેવાખિલાઃ ક્રિયાઃ ॥ ૨૮૪॥

એષ મધ્યે બુભુત્સાનાં યદા તિષ્ઠેત્તદા પુનઃ ।
બોધાયૈષાં ક્રિયાઃ સર્વા દૂષયંસ્ત્યજતુ સ્વયમ્ ॥ ૨૮૫॥

અવિદ્વદનુસારેણ વૃત્તિર્બુદ્ધસ્ય યુજ્યતે ।
સ્તનન્ધયાનુસારેણ વર્તતે તત્પિતા યતઃ ॥ ૨૮૬॥

અધિક્ષિપ્તસ્તાડિતો વા બાલેન સ્વપિતા તદા ।
ન ક્લિશ્યતિ ન કુપ્યેચ્ચ બાલં પ્રત્યુત લાલયેત્ ॥ ૨૮૭॥

નિન્દિતઃ સ્તૂયમાનો વા વિદ્વાનજ્ઞૈર્ન નિન્દતિ ।
ન સ્તૌતિ કિન્તુ તેષાં સ્યાદ્યથા બોધસ્તથા ચરેત્ ॥ ૨૮૮॥

યેનાયં નટનેનાત્ર બુધ્યતે કાર્યમેવ તત્ ।
અજ્ઞપ્રબોધાન્નૈવાન્યત્કાર્યમસ્ત્યત્ર તદ્વિદઃ ॥ ૨૮૯॥

કૃતકૃત્યતયા તૃપ્તઃ પ્રાપ્તપ્રાપ્યતયા પુનઃ ।
તૃપ્યન્નેવં સ્વમનસા મન્યતેઽસૌ નિરન્તરમ્ ॥ ૨૯૦॥

ધન્યોઽહં ધન્યોઽહં નિત્યં સ્વાત્માનમઞ્જસા વેદ્મિ ।
ધન્યોઽહં ધન્યોઽહં બ્રહ્માનન્દો વિભાતિ મે સ્પષ્ટમ્ ॥ ૨૯૧॥

ધન્યોઽહં ધન્યોઽહં દુઃખં સાંસારિકં ન વીક્ષેઽદ્ય ।
ધન્યોઽહં ધન્યોઽહં સ્વસ્યાજ્ઞાનં પલાયિતં ક્વાપિ ॥ ૨૯૨॥

ધન્યોઽહં ધન્યોઽહં કર્તવ્યં મે ન વિદ્યતે કિઞ્ચિત્ ।
ધન્યોઽહં ધન્યોઽહં પ્રાપ્તવ્યં સર્વમદ્ય સમ્પન્નમ્ ॥ ૨૯૩॥

ધન્યોઽહં ધન્યોઽહં તૃપ્તિર્મે કોપમા ભવેલ્લોકે ।
ધન્યોઽહં ધન્યોઽહં ધન્યો ધન્યો ધન્યઃ પુનઃ પુનઃ ॥ ૨૯૪॥

અહો પુણ્યમહો પુણ્યં ફલિતં ફલિતં દૃઢમ્ ।
અસ્ય પુણ્યસ્ય સમ્પત્તેરહો વયમહો વયમ્ ॥ ૨૯૫॥

અહો શાસ્ત્રમહો શાસ્ત્રમહો ગુરુરહો ગુરુઃ ।
અહો જ્ઞાનમહો જ્ઞાનમહો સુખમહો સુખમ્ ॥ ૨૯૬॥

તૃપ્તિદીપમિમં નિત્યં યેઽનુસન્દધતે બુધાઃ ।
બ્રહ્માનન્દે નિમજ્જન્તસ્તે તૃપ્યન્તિ નિરન્તરમ્ ॥ ૨૯૭॥

ઇતિ તૃપ્તિદીપોનામ સપ્તમઃ પરિચ્છેદઃ ॥ ૭॥

## ૮. કૂટસ્થદીપોનામ - અષ્ટમઃ પરિચ્છેદઃ ।

ખાદિત્યદીપિતે કુડ્યે દર્પણાદિત્યદીપ્તિવત્ ।
કૂટસ્થભાસિતો દેહો ધીસ્થજીવેન ભાસ્યતે ॥ ૧॥

અનેકદર્પણાદિત્યદીપ્તીનાં બહુસન્ધિષુ ।
ઇતરા વ્યજ્યતે તાસામભાવેઽપિ પ્રકાશતે ॥ ૨॥

ચિદાભાસવિશિષ્ટાનાં તથાનેકધિયામસૌ ।
સન્ધિં ધિયામભાવં ચ ભાસયન્પ્રવિવિચ્યતામ્ ॥ ૩॥

ઘટૈકાકારધીસ્થા ચિદ્ઘટમેવાવભાસયેત્ ।
ઘટસ્ય જ્ઞાતતા બ્રહ્મચૈતન્યેનાવભાસ્યતે ॥ ૪॥

અજ્ઞાતત્વેન જ્ઞાતોઽયં ઘટો બુદ્ધ્યુદયાત્પુરા ।
બ્રહ્મણૈવોપરિષ્ટાત્તુ જ્ઞાતત્વેનેત્યસૌ ભિદા ॥ ૫॥

ચિદાભાસાન્તધીવૃત્તિર્જ્ઞાનં લોહાન્તકુન્તવત્ ।
જાડ્યમજ્ઞાનમેતાભ્યાં વ્યાપ્તઃ કુમ્ભો દ્વિધોચ્યતે ॥ ૬॥

અજ્ઞાતો બ્રહ્મણા ભાસ્યો જ્ઞાતઃ કુમ્ભસ્તથા ન કિમ્ ।
જ્ઞાતત્વજનનેનૈવ ચિદાભાસપરિક્ષયઃ ॥ ૭॥

આભાસહીનયા બુદ્ધ્યા જ્ઞાતત્વં નૈવ જન્યતે ।
તાદૃગ્બુદ્ધેર્વિશેષઃ કો મૃદાદેઃ સ્યાદ્વિકારિણઃ ॥ ૮॥

જ્ઞાત ઇત્યુચ્યતે કુમ્ભો મૃદા લિપ્તો ન કુત્રચિત્ ।
ધીમાત્રવ્યાપ્તકુમ્ભસ્ય જ્ઞાતત્વં નેષ્યતે તથા ॥ ૯॥

જ્ઞાતત્વં નામ કુમ્ભેઽતશ્ચિદાભાસફલોદયઃ ।
ન ફલં બ્રહ્મચૈતન્યં મનાત્પ્રાગપિ સત્વતઃ ॥ ૧૦॥

પરાગર્થપ્રમેયેષુ યા ફલત્વેન સંમતા
સંવિત્સૈવેહ મેયોઽર્થો વેદાન્તોક્તિ પ્રમાણતઃ ।
ઇતિ વાર્તિકકારેણ ચિત્સદૃશ્યં વિવક્ષિતમ્
બ્રહ્મચિત્ફલયોર્ભેદઃ સાહસ્ર્યાં વિશ્રુતો યતઃ ॥ ૧૧॥

આભાસ ઉદિતસ્તસ્માજ્જ્ઞાતત્વં જનયેદ્ઘટે ।
તત્પુનર્બ્રહ્મણા ભાસ્યમજ્ઞાતત્વવદેવ હિ ॥ ૧૨॥

ધીવૃત્ત્યાભાસકુમ્ભાનાં સમૂહો ભાસ્યતે ચિતા ।
કુમ્ભમાત્રફલત્વાત્સ એક આભાસતઃ સ્ફુરેત્ ॥ ૧૩॥

ચૈતન્યં દ્વિગુણં કુમ્ભે જ્ઞાતત્વેન સ્ફુરેત્તતઃ ।
અન્યેઽનુવ્યવસાયાખ્યમાહુરેતદ્યથોદિતમ્ ॥ ૧૪॥

ઘટોઽયમિત્યસાવુક્તિરાભાસસ્ય પ્રસાદતઃ ।
વિજ્ઞાતો ઘટ ઇત્યુક્તિર્બ્રહ્માનુગ્રહતો ભવેત્ ॥ ૧૫॥

આભાસબ્રહ્મણી દેહાદ્બહિર્યદ્વદ્વિવેચિતે ।
તદ્વદાભાસકૂટસ્થૌ વિવિચ્યેતાં વપુષ્યપિ ॥ ૧૬॥

અહંવૃત્તૌ ચિદાભાસઃ કામક્રોધાદિકાસુ ચ ।
સંવ્યાપ્ય વર્તતે તપ્તે લોહે વહ્નિર્યથા તથા ॥ ૧૭॥

સ્વમાત્રં ભાસયેત્તપ્તં લોહં નાન્યત્કદાચન ।
એવમાભાસસહિતા વૃત્તયઃ સ્વસ્વભાસિકાઃ ॥ ૧૮॥

ક્રમાદ્વિચ્છિદ્ય વિચ્છિદ્ય જાયન્તે વૃત્તયોઽખિલાઃ ।
સર્વા અપિ વિલીયન્તે સુપ્તિમૂર્ચ્છાસમાધિષુ ॥ ૧૯॥

સન્ધયોઽખિલવૃત્તીનામભાવાશ્ચાવભાસિતાઃ ।
નિર્વિકારેણ યેનાસૌ કૂટસ્થ ઇતિ ગીયતે ॥ ૨૦॥

ઘટે દ્વિગુણચૈતન્યં યથા બાહ્યે તથાન્તરે ।
વૃત્તિષ્વપિ તતસ્તત્ર વૈશદ્યં સન્ધિતોઽધિકમ્ ॥ ૨૧॥

જ્ઞાતતાજ્ઞાતતે ન સ્તો ઘટવદ્વૃત્તિષુ ક્વચિત્ ।
સ્વસ્ય સ્વેનાગૃહીતત્વાત્તાભિશ્ચાજ્ઞાનનાશનાત્ ॥ ૨૨॥

દ્વિગુણીકૃતચૈતન્યે જન્મનાશાનુભૂતિતઃ ।

અકૂટસ્થં તદન્યત્તુ કૂટસ્થમવિકારિતઃ ॥ ૨૩॥

અન્તઃકરણતદ્વૃત્તિસાક્ષીત્યાદાવનેકધા ।
કૂટસ્થઃ એવ સર્વત્ર પૂર્વાચાર્યૈર્વિનિશ્ચિતઃ ॥ ૨૪॥

આત્માભાસાશ્રયશ્ચૈવં મુખાભાસાશ્રયા યથા ।
ગમ્યન્તે શાસ્ત્રયુક્તિભ્યામિત્યાભાસશ્ચ વર્ણિતઃ ॥ ૨૫॥

બુદ્ધ્યવચ્છિન્નકૂટસ્થો લોકાન્તરગમાગમૌ ।
કર્તું શક્તો ઘટાકાશ ઇવાભાસેન કિં વદ ॥ ૨૬॥

શ ૃણ્વસઙ્ગઃ પરિચ્છેદમાત્રાજ્જીવો ભવેન્ન હિ ।
અન્યથા ઘટકુડ્યાદ્યૈરવચ્છિન્નસ્ય જીવતા ॥ ૨૭॥

ન કુડ્યસાદૃશી બુદ્ધિઃ સ્વચ્છત્વાદિતિ ચેત્તથા ।
અસ્તુ નામ પરિચ્છેદે કિં સ્વાચ્છ્યેન ભવેત્તવ ॥ ૨૮॥

પ્રસ્થેન દારુજન્યેન કાંસ્યજન્યેન વા ન હિ ।
વિક્રેતુસ્તણ્ડુલાદિનાં પરિમાણં વિશિષ્યતે ॥ ૨૯॥

પરિમાણવિશેષેઽપિ પ્રતિબિમ્બો વિશિષ્યતે ।
કાંસ્યે યદિ તદા બુદ્ધાવપ્યાભાસો ભવેદ્બલાત્ ॥ ૩૦॥

ઈષદ્ભાસનમાભાસઃ પ્રતિબિમ્બસ્તથાવિધઃ ।
બિમ્બલક્ષણહીનઃ સન્બિમ્બવદ્ભાસતે સ હિ ॥ ૩૧॥

સસઙ્ગત્વવિકારાભ્યાં બિમ્બલક્ષણહીનતા ।
સ્ફૂર્તિરૂપત્વમેતસ્ય બિમ્બવદ્ભાસનં વિદુઃ ॥ ૩૨॥

ન હિ ધીભાવભાવિત્વાદાભાસોઽસ્તિ ધિયઃ પૃથક્ ।
ઇતિ ચેદલ્પમેવોક્તં ધીરપ્યેવં સ્વદેહતઃ ॥ ૩૩॥

દેહે મૃતેઽપિ બુદ્ધિશ્ચેચ્છાસ્ત્રાદસ્તિ તથા સતિ ।
બુદ્ધેરન્યશ્ચિદાભાસઃ પ્રવેશશ્રુતિષુ શ્રુતઃ ॥ ૩૪॥

ધીયુક્તસ્ય પ્રવેશશ્ચેન્નૈતરેયે ધિયઃ પૃથક્ ।
આત્મા પ્રવેશં સઙ્કલ્પ્ય પ્રવિષ્ટ ઇતિ ગીયતે ॥ ૩૫॥

કથં ન્વિદં સાક્ષદેહં મદૃતે સ્યાદિતીરણાત્ ।
વિદાર્ય મૂર્ધ્નઃ સીમાનં પ્રવિષ્ટઃ સંસરત્યયમ્ ॥ ૩૬॥

કથં પ્રવિષ્ટોઽસઙ્ગશ્ચેત્સૃષ્ટિર્વાસ્ય કથં વદ ।
માયિકત્વં તયોસ્તુલ્યં વિનાશશ્ચ સમસ્તયોઃ ॥ ૩૭॥

સમુત્થાયૈવ ભૂતેભ્યસ્તાન્યેવાનુવિનશ્યતિ ।
વિસ્પષ્ટમિતિ મૈત્રેય્યૈ યાજ્ઞવલ્ક્ય ઉવાચ હિ ॥ ૩૮॥

અવિનાશ્યયમાત્મેતિ કૂટસ્થઃ પ્રવિવેચિતઃ ।
માત્રાસંસર્ગ ઇત્યેવમસઙ્ગત્વસ્ય કીર્તનાત્ ॥ ૩૯॥

જીવાપેતં વાવ કિલ શરીરં મ્રિયતે ન સઃ ।
ઇત્યત્ર ન વિમોક્ષોઽર્થઃ કિન્તુ લોકાન્તરે ગતિઃ ॥ ૪૦॥

નાહં બ્રહ્મેતિ બુધ્યેત સ વિનાશીતિ ચેન્ન તત્ ।
સામાનાધિકરણ્યસ્ય બાધાયામપિ સમ્ભવાત્ ॥ ૪૧॥

યોઽયં સ્થાણુઃ પુમાનેષ પુંધિયા સ્થાણુધીરિવ ।
બ્રહ્માસ્મીતિ ધિયા શેષા હ્યહં બુદ્ધિર્નિવર્તતે ॥ ૪૨॥

નૈષ્કર્મ્યસિદ્ધાવપ્યેવમાચાર્યૈઃ સ્પષ્ટમીરિતમ્ ।
સામાનાધિકરણ્યસ્ય બાધાર્થત્વં તતોઽસ્તુ તત્ ॥ ૪૩॥

સર્વં બ્રહ્મેતિ જગતા સામાનાધિકરણ્યવત્ ।
અહં બ્રહ્મેતિ જીવેન સામાનાધિકૃતિર્ભવેત્ ॥ ૪૪॥

સામાનાધિકરણ્યસ્ય બાધાર્થત્વં નિરાકૃતમ્ ।
પ્રયત્નતો વિવરણે કૂટસ્થત્વવિવક્ષયા ॥ ૪૫॥

શોધિતસ્ત્વં પદાર્થો યઃ કૂટસ્થો બ્રહ્મરૂપતામ્ ।
તસ્ય વક્તું વિવરણે તથોક્તમિતરત્ર ચ ॥ ૪૬॥

દેહેન્દ્રિયાદિયુક્તસ્ય જીવાભાસભ્રમસ્ય યા ।
અધિષ્ઠાનચિતિઃ સૈષા કૂટસ્થાત્ર વિવક્ષિતા ॥ ૪૭॥

જગદ્ભ્રમસ્ય સર્વસ્ય યદધિષ્ઠાનમીરિતમ્ ।
ત્રય્યન્તેષુ તદત્ર સ્યાદ્બ્રહ્મશબ્દવિવક્ષિતમ્ ॥ ૪૮॥

એતસ્મિન્નેવ ચૈતન્યે જગદારોપ્યતે યદા ।
તદા તદેકદેશસ્ય જીવાભાસસ્ય કા કથા ॥ ૪૯॥

જગત્તદેકદેશાખ્યસમારોપ્યસ્ય ભેદતઃ ।
તત્ત્વંપદાર્થૌ ભિન્નૌ સ્તો વસ્તુતસ્ત્વેકતા ચિતઃ ॥ ૫૦॥

કર્તૃત્વાદીન્બુદ્ધિધર્માન્સ્ફૂર્ત્યાખ્યાં ચાત્મરૂપતામ્ ।
દધદ્વિભાતિ પુરત આભાસોઽતો ભ્રમો ભવેત્ ॥ ૫૧॥

કા બુદ્ધિઃ કોઽયમાભાસઃ કો વાત્રાત્મા જગત્કથમ્ ।
ઇત્યનિર્ણયતો મોહઃ સોઽયં સંસાર ઇષ્યતે ॥ ૫૨॥

બુદ્ધ્યાદીનાં સ્વરૂપં યો વિવિનક્તિ સ તત્ત્વવિત્ ।
સ એવ મુક્ત ઇત્યેવં વેદાન્તેષુ વિનિશ્ચયઃ ॥ ૫૩॥

એવં ચ સતિ બન્ધઃ સ્યાત્કસ્યેત્યાદિકુતર્કજાઃ ।
વિડમ્બનાદૃઢં ખણ્ડ્યાઃ ખણ્ડનોક્તિપ્રકારતઃ ॥ ૫૪॥

વૃત્તેઃ સાક્ષિતયા વૃત્તેઃ પ્રાગભાવસ્ય ચ સ્થિતઃ ।
બુભુત્સાયાં તથાજ્ઞોઽસ્મીત્યાભાસાજ્ઞાનવસ્તુનઃ ॥ ૫૫॥

અસત્યાલમ્બનત્વેન સત્યઃ સર્વજડસ્ય તુ ।
સાધકત્વેન ચિદ્રૂપઃ સદા પ્રેમાસ્પદત્વતઃ ॥ ૫૬॥

આનન્દરૂપઃ સર્વાર્થસાધકત્વેન હેતુના ।
સર્વ સમ્બન્ધવત્ત્વેન સમ્પૂર્ણઃ શિવસંજ્ઞિતઃ ॥ ૫૭॥

ઇતિ શૈવપુરાણેષુ કૂટસ્થઃ પ્રવિવેચિતઃ ।
જીવેશત્વાદિરહિતઃ કેવલઃ સ્વપ્રભઃ શિવઃ ॥ ૫૮॥

માયાભાસેન જીવેશૌ કરોતીતિ શ્રુતત્વતઃ ।
માયિકાવેવ જીવેશૌ સ્વચ્છૌ તૌ કાચકુમ્ભવત્ ॥ ૫૯॥

અન્નજન્યં મનોદેહાત્સ્વચ્છં યદ્વત્તથૈવ તૌ ।
માયિકાવપિ સર્વસ્માદન્યસ્માત્સ્વચ્છતાં ગતૌ ॥ ૬૦॥

ચિદ્રૂપત્વં ચ સમ્ભાવ્યં ચિત્ત્વેનૈવ પ્રકાશનાત્ ।
સર્વકલ્પનશક્તાયા માયાયા દુષ્કરં ન હિ ॥ ૬૧॥

અસ્મન્નિદ્રાપિ જીવેશૌ ચેતનૌ સ્વપ્નગૌ સૃજેત્ ।
મહામાયા સૃજત્યેતાવિત્યાશ્ચર્યં કિમત્ર તે ॥ ૬૨॥

સર્વજ્ઞત્વાદિકં ચેશે કલ્પયિત્વા પ્રદર્શયેત્ ।
ધર્મિણં કલ્પયેદ્યાસ્યાઃ કો ભારો ધર્મકલ્પને ॥ ૬૩॥

કૂટસ્થેઽપ્યતિશઙ્ક્ય સ્યાદિતિ ચેન્માતિશંક્યતામ્ ।

કૂટાસ્થમાયિકત્વે તુ પ્રમાણં ન હિ વર્તતે ॥ ૬૪॥

વસ્તુત્વં ઘોષયન્ત્યસ્ય વેદાન્તાઃ સકલા અપિ ।
સપત્નરૂપં વસ્ત્વન્યન્ન સહન્તેઽત્ર કિંચન ॥ ૬૫॥

શ્રુત્યર્થં વિશદીકુર્મો ન તર્કાન્વચ્મિ કિંચન ।
તેન તાર્કિકશંકાનામત્ર કોઽવસરો વદ ॥ ૬૬॥

તસ્માત્કુતર્કં સન્ત્યજ્ય મુમુક્ષુઃ શ્રુતિમાશ્રયેત્ ।
શ્રુતૌ તુ માયાજીવેશૌ કરોતીતિ પ્રદર્શિતમ્ ॥ ૬૭॥

ઈક્ષણાદિપ્રવેશાન્તા સૃષ્ટિરીશકૃતા ભવેત્ ।
જાગ્રદાદિવિમોક્ષન્તઃ સંસારો જીવકર્તૃકઃ ॥ ૬૮॥

અસઙ્ગ એવ કૂટસ્થઃ સર્વદા નાસ્ય કશ્ચન ।
ભવત્યતિશયસ્તેન મનસ્યેવં વિચાર્યતામ્ ॥ ૬૯॥

ન નિરોધો ન ચોત્પત્તિર્ન બદ્ધો ન ચ સાધકઃ ।
ન મુમુક્ષુર્ન વૈ મુક્ત ઇત્યેષા પરમાર્થતા ॥ ૭૦॥

અવાઙ્મનસગમ્યં તં શ્રુતિર્બોધયિતું સદા ।
જીવમીશં જગદ્વાપિ સમાશ્રિત્યાવબોધયેત્ ॥ ૭૧॥

યયા યયા ભવેત્પુંસાં વ્યુત્પત્તિઃ પ્રત્યગાત્મનિ ।
સા સૈવ પ્રક્રિયેહ સ્યાત્સાધ્વીત્યાચાર્યભાષિતમ્ ॥ ૭૨॥

શ્રુતિતાત્પર્યમખિલમબુધ્વા ભ્રામ્યતે જડઃ ।
વિવેકી ત્વખિલં બુધ્વા તિષ્ઠત્યાનન્દવારિધૌ ॥ ૭૩॥

માયામેઘો જગન્નીરં વર્ષત્વેષ યથા તથા ।
ચિદાકાશસ્ય નો હાનિર્ન વા લાભ ઇતિ સ્થિતિઃ ॥ ૭૪॥

ઇમં કૂટસ્થદીપં યોઽનુસન્ધત્તે નિરન્તરમ્ ।
સ્વયં કૂટસ્થરૂપેણ દીપ્યતેઽસૌ નિરન્તરમ્ ॥ ૭૬॥

ઇતિ કૂટસ્થદીપો નામ અષ્ટમઃ પરિચ્છેદઃ ॥ ૮।

# ૯. ધ્યાનદીપોનામ - નવમઃ પરિચ્છેદઃ ।

સંવાદિભ્રમવદ્બ્રહ્મતત્ત્વોપાસ્ત્યાપિ મુચ્યતે ।
ઉત્તરે તાપનિયેઽતઃ શ્રુતોપાસ્તિરનેકધા ॥ ૧॥

મણિપ્રદીપપ્રભયોર્મણિબુદ્ધ્યાભિધાવતોઃ ।
મિથ્યાજ્ઞાનાવિશેષેઽપિ વિશેષોઽર્થક્રિયાં પ્રતિ ॥ ૨॥

દીપોપવરકસ્યાન્તર્વર્તતે તત્પ્રભા બહિઃ ।
દૃશ્યતે દ્વાર્યથાન્યત્ર તદ્વદ્દૃષ્ટા મણેઃ પ્રભા ॥ ૩॥

દૂરે પ્રભાદ્વયં દૃષ્ટ્વા મણિબુદ્ધ્યાભિધાવતોઃ ।
પ્રભાયાં મણિબુદ્ધિસ્તુ મિથ્યાજ્ઞાનં દ્વયોરપિ ॥ ૪॥

ન લભ્યતે મણિર્દીપપ્રભાં પ્રત્યભિધાવતા ।
પ્રભાયાં ધાવતાવશ્યં લભ્યતૈવ મણિર્મણેઃ ॥ ૫॥

દીપપ્રભામણિભ્રાન્તિર્વિસંવાદિભ્રમઃ સ્મૃતઃ ।
મણિપ્રભામણિભ્રાન્તિઃ સંવાદિભ્રમ ઉચ્યતે ॥ ૬॥

બાષ્પં ધૂમતયા બુધ્વા તત્રાઙ્ગારાનુમાનતઃ ।
વહ્નિર્યદૃચ્છયા લબ્ધઃ સ સંવાદિભ્રમો મતઃ ॥ ૭॥

ગોદાવર્યુદકં ગઙ્ગોદકં મત્વા વિશુદ્ધયે ।
સમ્પ્રોક્ષ્ય શુદ્ધિમાપ્નોતિ સ સંવાદિભ્રમો મતઃ ॥ ૮॥

જ્વરેણાપ્તઃ સન્નિપાતં ભ્રાન્ત્યા નારાયણં સ્મરન્ ।
મૃતઃ સ્વર્ગમવાપ્નોતિ સ સંવાદિભ્રમો મતઃ ॥ ૯॥

પ્રત્યક્ષસ્યાનુમાનસ્ય તથા શાસ્ત્રસ્ય ગોચરે ।
ઉક્તન્યાયેન સંવાદિભ્રમાઃ સન્તીહ કોટિશઃ ॥ ૧૦॥

અન્યથા મૃત્તિકાદારુશિલાઃ સ્યુર્દેવતાઃ કથમ્ ।
અગ્નિત્વાદિધિયોપાસ્યાઃ કથં વા યોષિદાદયઃ ॥ ૧૧॥

અયથાવસ્તુવિજ્ઞાનાત્ફલં લભ્યત ઈપ્સિતમ્ ।
કાકતાલીયતઃ સોઽયં સંવાદિભ્રમ ઉચ્યતે ॥ ૧૨॥

સ્વયં ભ્રમોઽપિ સંવાદી યથા સમ્યક્ફલપ્રદઃ ।
બ્રહ્મતત્ત્વોપાસનાપિ તથા મુક્તિફલપ્રદા ॥ ૧૩॥

વેદાન્તેભ્યો બ્રહ્મતત્ત્વમખણ્ડૈકરસાત્મકમ્ ।
પરોક્ષમવગમ્યૈતદહમસ્મીત્યુપાસતે ॥ ૧૪॥

પ્રત્યગ્વ્યક્તિમનુલ્લિખ્ય શાસ્ત્રાદ્વિષ્ણ્વાદિમૂર્તિવત્ ।
અસ્તિ બ્રહ્મેતિ સામાન્યજ્ઞાનમત્રં પરોક્ષધીઃ ॥ ૧૫॥

ચતુર્ભુજાદ્યવગતાવપિ મૂર્તિમનુલ્લિખન્ ।
અક્ષૈઃ પરોક્ષજ્ઞાન્યેવ ન તદા વિષ્ણુમીક્ષતે ॥ ૧૬॥

પરોક્ષત્વાપરાધેન ભવેન્નાતત્ત્વવેદનમ્ ।
પ્રમાણેનૈવ શાસ્ત્રેણ સત્યમૂર્તેર્વિભાસનાત્ ॥ ૧૭॥

સચ્ચિદાનન્દરૂપસ્ય શાસ્ત્રાદ્ભાનેઽપ્યનુલ્લિખન્ ।
પ્રત્યંચં સાક્ષિણં તત્તુ બ્રહ્મ સાક્ષાન્ન વીક્ષતે ॥ ૧૮॥

શાસ્ત્રોક્તેનૈવ માર્ગેણ સચ્ચિદાનન્દનિર્ણયાત્ ।
પરોક્ષમપિ તજ્જ્ઞાનં તત્ત્વજ્ઞાનં ન તુ ભ્રમઃ ॥ ૧૯॥

બ્રહ્મ યદ્યપિ શાસ્ત્રેષુ પ્રત્યક્ત્વેનૈવ વર્ણિતમ્ ।
મહાવાક્યૈસ્તથાપ્યેતદ્દુર્બોધમવિચારિણઃ ॥ ૨૦॥

દેહાદ્યાત્મત્વવિભ્રાન્તૌ જાગૃત્યાં ન હઠાત્પુમાન્ ।
બ્રહ્માત્મત્વેન વિજ્ઞાતું ક્ષમતે મન્દધીત્વતઃ ॥ ૨૧॥

બ્રહ્મમાત્રં સુવિજ્ઞેયં શ્રદ્ધાલોઃ શાસ્ત્રદર્શિનઃ ।
અપરોક્ષદ્વૈતબુદ્ધિઃ પરોક્ષદ્વૈતબુદ્ધ્યનુત્ ॥ ૨૨॥

અપરોક્ષશિલાબુદ્ધિર્ન પરોક્ષેશતાં નુદેત્ ।
પ્રતિમાદિષુ વિષ્ણુત્વે કો વા વિપ્રતિપદ્યતે ॥ ૨૩॥

અશ્રદ્ધાલોરવિશ્વાસોઃ નોદાહરણમર્હતિ ।
શ્રદ્ધાલોરેવ સર્વત્ર વૈદિકેષ્વધિકારતઃ ॥ ૨૪॥

સકૃદાપ્તોપદેશેન પરોક્ષજ્ઞાનમુદ્ભવેત્ ।
વિષ્ણુમૂર્ત્યુપદેશો હિ ન મીમાંસામપેક્ષતે ॥ ૨૫॥

કર્મોપાસ્તી વિચાર્યેતેઽનુષ્ઠેયાવિનિર્ણયાત્ ।
બહુશાખાવિપ્રકીર્ણં નિર્ણેતું કઃ પ્રભુર્નરઃ ॥ ૨૬॥

નિર્ણીતોઽર્થઃ કલ્પસૂત્રૈર્ગ્રથિતસ્તાવતાસ્તિકઃ ।
વિચારમન્તરેણાપિ શક્તોઽનુષ્ઠાતુમઞ્જસા ॥ ૨૭॥

ઉપાસ્તીનામનુષ્ઠાનમાર્ષગ્રન્થેષુ વર્ણિતમ્ ।
વિચારાક્ષમમર્ત્યાશ્ચ તત્શ્રુત્વોપાસતે ગુરોઃ ॥ ૨૮॥

વેદવાક્યાનિ નિર્ણેતુમિચ્છન્મીમાંસતાં જનઃ ।
આપ્તોપદેશમન્ત્રેણ હ્યનુષ્ઠાનં તુ સમ્ભવેત્ ॥ ૨૯॥

બ્રહ્મસાક્ષાત્કૃતિસ્ત્વેવં વિચારેણ વિના નૃણામ્ ।
આપ્તોપદેશમાત્રેણ ન સમ્ભવતિ કુત્રચિત્ ॥ ૩૦॥

પરોક્ષજ્ઞાનમશ્રદ્ધા પ્રતિબધ્નાતિ નેતરત્ ।
અવિચારોઽપરોક્ષસ્ય જ્ઞાનસ્ય પ્રતિબન્ધકઃ ॥ ૩૧॥

વિચારાપ્યપરોક્ષેણ બ્રહ્માત્માનં ન વેત્તિ ચેત્ ।
આપરોક્ષ્યાવસાનત્વાદ્ભૂયોભૂયો વિચારયેત્ ॥ ૩૨॥

વિચારયન્નામરણં નૈવાત્માનં લભેત ચેત્ ।
જન્માન્તરે લભેતૈવ પ્રતિબન્ધક્ષયે સતિ ॥ ૩૩॥

ઇહ વામુત્ર વા વિદ્યેત્યેવં સૂત્રકૃતોદિતમ્ ।
શ‍ૃણ્વન્તોઽપ્યત્ર બહવો યન્ન વિદ્યુરિતિ શ્રુતિઃ ॥ ૩૪॥

ગર્ભ એવ શયાનઃ સન્વામદેવોઽવબુદ્ધવાન્ ।
પૂર્વાભ્યસ્તવિચારેણ યદ્વદધ્યયનાદિષુ ॥ ૩૫॥

બહુવારમધીતેઽપિ તદા નાયાતિ ચેત્પુનઃ ।
દિનાન્તરેઽનધીત્યૈવ પૂર્વાધીતં સ્મરેત્પુમાન્ ॥ ૩૬॥

કાલેન પરિપચ્યન્તે કૃષિદર્ભાદયો યથા ।
તદ્વદાત્મવિચારોઽપિ શનૈઃ કાલેન પચ્યતે ॥ ૩૭॥

પુનઃપુનર્વિચારોઽપિ ત્રિવિધપ્રતિબન્ધતઃ ।
ન વેત્તિ તત્ત્વમિત્યેતદ્વાર્તિકે સમ્યગીરિતમ્ ॥ ૩૮॥

કુતસ્તજ્જ્ઞાનમિતિ ચેત્તદ્ધિ બન્ધપરિક્ષયાત્ ।
અસાવપિ ચ ભૂતો વા ભાવી વા વર્તતે તથા ॥ ૩૯॥

અધીતવેદવેદાર્થોઽપ્યત એવ ન મુચ્યતે ।
હિરણ્યનિધિદૃષ્ટાન્તાદિદમેવ હિ દર્શિતમ્ ॥ ૪૦॥

અતીતેનાપિ મહિષીસ્નેહેન પ્રતિબન્ધતઃ ।

ભિક્ષુસ્તત્ત્વં ન વેદેતિ ગાથા લોકે પ્રગીયતે ॥ ૪૧॥

અનુસૃત્ય ગુરુઃ સ્નેહં મહિષ્યાં તત્ત્વમુક્તવાન્ ।
તતો યથાવદ્વેદૈષ પ્રતિબન્ધસ્ય સંક્ષયાત્ ॥ ૪૨॥

પ્રતિબન્ધો વર્તમાનો વિષયાસક્તિલક્ષણઃ ।
પ્રજ્ઞામાન્દ્યં કુતર્કશ્ચ વિપર્યયદુરાગ્રહઃ ॥ ૪૩॥

શમાદ્યૈઃ શ્રવણાદ્યૈશ્ચ તત્ર તત્રોચિતૈઃ ક્ષયમ્ ।
નીતેઽસ્મિન્પ્રતિબન્ધેઽતઃ સ્વસ્ય બ્રહ્મત્વમશ્નુતે ॥ ૪૪॥

આગામિપ્રતિબન્ધશ્ચ વામદેવે સમીરિતઃ ।
એકેન જન્મના ક્ષીણો ભરતસ્ય ત્રિજન્મભિઃ ॥ ૪૫॥

યોગભ્રષ્ટસ્ય ગીતાયામતીતે બહુજન્મનિ ।
પ્રતિબન્ધક્ષયઃ પ્રોક્તો ન વિચારોઽપ્યનર્થકઃ ॥ ૪૬॥

પ્રાપ્ય પુણ્યકૃતાં લોકાનાત્મતત્ત્વવિચારતઃ ।
શુચીનાં શ્રીમતાં ગેહે યોગભ્રષ્ટોઽભિજાયતે ॥ ૪૭॥

અથવા યોગિનામેવ કુલે ભવતિ ધીમતામ્ ।
નિસ્પૃહઃ બ્રહ્મતત્ત્વસ્ય વિચારાત્તદ્ધિ દુર્લભમ્ ॥ ૪૮॥

તત્ર તં બુદ્ધિસંયોગં લભતે પૌર્વદેહિકમ્ ।
યતતે ચ તતો ભૂયસ્તસ્માદેતદ્ધિ દુર્લભમ્ ॥ ૪૯॥

પૂર્વાભ્યાસેન તેનૈવ હ્રિયતે હ્યવશોઽપિ સઃ ।
અનેકજન્મસંસિદ્ધસ્તતો યાતિ પરાં ગતિમ્ ॥ ૫૦॥

બ્રહ્મલોકાભિવાઞ્છાયાં સમ્યક્સત્યાં નિરુધ્યતામ્ ।
વિચારયેદ્ય આત્માનં ન તુ સાક્ષાત્કરોત્યયમ્ ॥ ૫૧॥

વેદાન્તવિજ્ઞાનસુનિશ્ચિતાર્થાઃ ઇતિ શાસ્ત્રતઃ ।
બ્રહ્મલોકે સકલ્પાન્તે બ્રહ્મણા સહ મુચ્યતે ॥ ૫૨॥

કેષાંચિત્સ વિચારોઽપિ કર્મણા પ્રતિબદ્ધ્યતે ।
શ્રવણાયાપિ બહુભિર્યો ન લભ્ય ઇતિ શ્રુતેઃ ॥ ૫૩॥

અત્યન્તબુદ્ધિમાન્દ્યાદ્વા સામગ્ર્યા વાપ્યસમ્ભવાત્ ।
યો વિચારં ન લભતે બ્રહ્મોપાસીત સોઽનિશમ્ ॥ ૫૪॥

નિર્ગુણબ્રહ્મતત્ત્વસ્ય ન હ્યુપાસ્તેરસમ્ભવઃ ।
સગુણબ્રહ્મણીવાત્ર પ્રત્યયાવૃત્તિસમ્ભવાત્ ॥ ૫૫॥

અવાઙ્મનસગમ્યં તન્નોપાસ્યમિતિ ચેત્તદા ।
અવાઙ્મનસગમ્યસ્ય વેદનં ચ ન સમ્ભવેત્ ॥ ૫૬॥

વાગાદ્યગોચરાકારમિત્યેવં યદિ વેત્ત્યસૌ ।
વાગાદ્યગોચરાકારમિત્યુપાસિત નો કુતઃ ॥ ૫૭॥

સગુણત્વમુપાસ્યત્વાદ્યદિ વેદ્યત્વતોઽપિ તત્ ।
વેદ્યં ચેલ્લક્ષણાવૃત્ત્યા લક્ષિતં સમુપાસ્યતામ્ ॥ ૫૮॥

બ્રહ્મ વિદ્ધિ તદેવ ત્વં નત્વિદં યદુપાસતે ।
ઇતિ શ્રુતેરુપાસ્યત્વં નિષિદ્ધં બ્રહ્મણો યદિ ॥ ૫૯॥

વિદિતાદન્યદેવેતિ શ્રુતેર્વેદ્યત્વમસ્ય ન ।
યથા શ્રુત્યૈવ વેદ્યં તત્તથા શ્રુત્યાપ્યુપાસ્યતામ્ ॥ ૬૦॥

અવાસ્તવી વેદ્યતા ચેદુપાસ્યત્વં તથા ન કિમ્ ।
વૃત્તિવ્યાપ્તિર્વેદ્યતા ચેદુપાસ્યત્વેઽપિ તત્સમમ્ ॥ ૬૧॥

કા તે ભક્તિરુપાસ્તૌ ચેત્કસ્તે દ્વેષસ્તદીરય ।
માનાભાવો ન વાચ્યોઽસ્યાં બહુશ્રુતિષુ દર્શનાત્ ॥ ૬૨॥

ઉત્તરસ્મિંસ્તાપનીયે શૈબ્યપ્રશ્નેઽથ કાઠકે ।
માણ્ડુક્યાદૌ ચ સર્વત્ર નિર્ગુણોપાસ્તિરીરિતા ॥ ૬૩॥

અનુષ્ઠાનપ્રકારોઽસ્યાઃ પઞ્ચીકરણ ઈરિતઃ ।
જ્ઞાનસાધનમેતચ્ચેન્નેતિ કેનાત્ર વર્ણિતમ્ ॥ ૬૪॥

નાનુતિષ્ઠતિ કોઽપ્યેતદિતિ ચેન્નાનુતિષ્ઠતુ ।
પુરુષસ્યાપરાધેન કિમુપાસ્તિઃ પ્રદુષ્યતિ ॥ ૬૫॥

ઇતોઽપ્યતિશયં મત્વા મન્ત્રાન્વશ્યાદિકારિણઃ ।
મૂઢા જપન્તુ તેભ્યોઽતિમૂઢાઃ કૃષિમુપાસતામ્ ॥ ૬૬॥

તિષ્ઠન્તુ મૂઢાઃ પ્રકૃતા નિર્ગુણોપાસ્તિરીર્યતે ।
વિદ્યૈક્યાત્સર્વશાખાસ્થાન્ગુણાનત્રોપસંહરેત્ ॥ ૬૭॥

આનન્દાદેર્વિધેયસ્ય ગુણસઙ્ઘસ્ય સંહૃતિઃ ।
આનન્દાદય ઇત્યસ્મિન્સૂત્રે વ્યાસેન વર્ણિતા ॥ ૬૮॥

અસ્થૂલાદેર્નિષેધ્યસ્ય ગુણસઙ્ઘસ્ય સંહૃતિઃ ।
તથા વ્યાસેન સૂત્રેઽસ્મિનુક્તાક્ષરધિયાન્ત્વિતિ ॥ ૬૯॥

નિર્ગુણબ્રહ્મતત્ત્વસ્ય વિદ્યાયાં ગુણસંહૃતિઃ ।
ન યુજ્યેતેત્યુપાલમ્ભો વ્યાસં પ્રત્યેવ માં તુ ન ॥ ૭૦॥

હિરણ્યસ્મશ્રુસૂર્યાદિમૂર્તીનામનુદાહૃતેઃ ।
અવિરુદ્ધં નિર્ગુણત્વમિતિ ચેત્તુષ્યતાં ત્વયા ॥ ૭૧॥

ગુણાનાં લક્ષકત્વેન ન તત્ત્વેઽન્તઃપ્રવેશનમ્ ।
ઇતિ ચેદસ્ત્વેવમેવ બ્રહ્મતત્ત્વમુપાસ્યતામ્ ॥ ૭૨॥

આનન્દાદિભિરસ્થૂલાદિભિઃસ્વાત્માત્ર લક્ષિતઃ ।
અખણ્ડૈકરસઃ સોઽહમસ્મીત્યેવમુપાસતે ॥ ૭૩॥

બોધોપાસ્ત્યોર્વિશેષઃ ક ઇતિ ચેદુચ્યતે શ‌ૃણુ ।
વસ્તુતન્ત્રો ભવેદ્બોધઃ કર્તૃતન્ત્રમુપાસનમ્ ॥ ૭૪॥

વિચારાજ્જાયતે બોધોઽનિચ્છા યં ન નિવર્તયેત્ ।
સ્વોત્પત્તિમાત્રાત્સંસારે દહત્યખિલસત્યતામ્ ॥ ૭૫॥

તાવતા કૃતકૃત્યઃ સન્નિત્યતૃપ્તિમુપાગતઃ ।
જીવન્મુક્તિમનુપ્રાપ્ય પ્રારબ્ધક્ષયમીક્ષતે ॥ ૭૬॥

આપ્તોપદેશં વિશ્વસ્ય શ્રદ્ધાલુરવિચારયન્ ।
ચિન્તયેત્પ્રત્યયૈરન્યૈરનન્તરિતવૃત્તિભિઃ ॥ ૭૭॥

યાવચ્ચિન્ત્યસ્વરૂપત્વાભિમાનઃ સ્વસ્ય જાયતે ।
તાવદ્વિચિન્ત્ય પશ્ચાચ્ચ તથૈવામૃતિ ધારયેત્ ॥ ૭૮॥

બ્રહ્મચારી ભિક્ષમાણો યુતઃ સંવર્ગવિદ્યયા ।
સંવર્ગરૂપતાં ચિત્તે ધારયિત્વા હ્યભિક્ષતા ॥ ૭૯॥

પુરુષસ્વેચ્છયા કર્તુમકર્તું કર્તુમન્યથા ।
શક્યોપાસ્તિરતો નિત્યં કુર્યાત્પ્રત્યયસન્તતિમ્ ॥ ૮૦॥

વેદાધ્યાયી હ્યપ્રમત્તોઽધીતે સ્વપ્નેઽપિ વાસિતઃ ।
જપિતા તુ જપત્યેવ તથા ધ્યાતાપિ વાસયેત્ ॥ ૮૧॥

વિરોધિપ્રત્યયં ત્યક્ત્વા નૈરન્તર્યેણ ભાવયન્ ।

લભતે વાસનાવેશાત્સ્વપ્નાદાવપિ ભાવનામ્ ॥ ૮૨ ॥

ભુઞ્જાનોઽપિ નિજ આરબ્ધમાસ્થાતિશયતોઽનિશમ્ ।
ધ્યાતું શક્તો ન સન્દેહો વિષયવ્યસની યથા ॥ ૮૩ ॥

પરવ્યસનિની નારી વ્યગ્રાપિ ગૃહકર્મણિ ।
તદેવાસ્વાદયત્યન્તઃ પરસઙ્ગરસાયનમ્ ॥ ૮૪ ॥

પરસઙ્ગં સ્વાદયન્ત્યા અપિ નો ગૃહકર્મ તત્ ।
કુણ્ઠી ભવેદપિ ત્વેતદાપાતેનૈવ વર્તતે ॥ ૮૫ ॥

ગૃહકૃત્યવ્યસનિની યથા સમ્યક્કરોતિ તત્ ।
પરવ્યસનિની તદ્વન્ન કરોત્યેવ સર્વથા ॥ ૮૬ ॥

એવં ધ્યાનૈકનિષ્ઠોઽપિ લેશાલ્લૌકિકમાચરેત્ ।
તત્ત્વવિત્ત્વવિરોધિત્વાલ્લૌકિકં સમ્યગાચરેત્ ॥ ૮૭ ॥

માયામયઃ પ્રપઞ્ચોઽયમાત્મા ચૈતન્યરૂપધૃક્ ।
ઇતિ બોધે વિરોધઃ કો લૌકિકવ્યવહારિણઃ ॥ ૮૮ ॥

અપેક્ષતે વ્યવહૃતિર્ન પ્રપઞ્ચસ્ય વસ્તુતામ્ ।
નાપ્યાત્મજાડ્યં કિંત્વેષા સાધનાન્યેવ કાઙ્ક્ષતિ ॥ ૮૯ ॥

મનોવાક્કાયતદ્બાહ્યપદાર્થાઃ સાધનાનિ તાન્ ।
તત્ત્વવિન્નોપમૃદ્નાતિ વ્યવહારોઽસ્ય નો કુતઃ ॥ ૯૦ ॥

ઉપમૃદ્નાતિ ચિત્તં ચેદ્ધ્યાતાસૌ ન તુ તત્ત્વવિત્ ।
ન બુદ્ધિં મર્દયન્દૃષ્ટો ઘટતત્ત્વસ્ય વેદિતા ॥ ૯૧ ॥

સકૃત્પ્રત્યયમાત્રેણ ઘટશ્ચેદ્ભાસતે તદા ।
સ્વપ્રકાશોઽયમાત્મા કિં ઘટવચ્ચ ન ભાસતે ॥ ૯૨ ॥

સ્વપ્રકાશતયા કિં તે તદ્બુદ્ધિસ્તત્ત્વવેદનમ્ ।
બુદ્ધિશ્ચ ક્ષણનાશ્યેતિ ચોદ્યં તુલ્યં ઘટાદિષુ ॥ ૯૩ ॥

ઘટાદૌ નિશ્ચિતે બુદ્ધિર્નશ્યત્યેવ યદા ઘટઃ ।
ઇષ્ટો નેતું તદા શક્ય ઇતિ ચેત્સમમાત્મનિ ॥ ૯૪ ॥

નિશ્ચિત્ય સકૃદાત્માનં યદાપેક્ષા તદૈવ તત્ ।
વક્તું મન્તું તથા ધ્યાતું શક્નોત્યેવ હિ તત્ત્વવિત્ ॥ ૯૫ ॥

ઉપાસક ઇવ ધ્યાયં લૌકિકં વિસ્મરેત્ યદિ ।
વિસ્મરત્યેવ સા ધ્યાનાદ્વિસ્મૃતિર્ન તુ વેદનાત્ ॥ ૯૬॥

ધ્યાનં ત્વૈચ્છિકમેતસ્ય વેદનાન્મુક્તિસિદ્ધિતઃ ।
જ્ઞાનાદેવ તુ કૈવલ્યમિતિ શાસ્ત્રેષુ ડિણ્ડિમઃ ॥ ૯૭॥

તત્ત્વવિદ્યદિ ન ધ્યાયેત્પ્રવર્તેત તદા બહિઃ ।
પ્રવર્તતાં સુખેનાયં કો બાધોઽસ્ય પ્રવર્તને ॥ ૯૮॥

અતિપ્રસઙ્ગ ઇતિ ચેત્પ્રસઙ્ગં તાવદીરય ।
પ્રસઙ્ગો વિધિશાસ્ત્રં ચેન્ન તત્તત્ત્વવિદં પ્રતિ ॥ ૯૯॥

વર્ણાશ્રમવયોવસ્થાભિમાનો યસ્ય વિદ્યતે ।
તસ્યૈવ હિ નિષેધાશ્ચ વિધયઃ સકલા અપિ ॥ ૧૦૦॥

વર્ણાશ્રમાદયો દેહે માયયા પરિકલ્પિતાઃ ।
નાત્મનો બોધરૂપસ્યેત્યેવં તસ્ય વિનિશ્ચયઃ ॥ ૧૦૧॥

સમાધિમથ કર્માણિ મા કરોતુ કરોતુ વા ।
હૃદયેનાસ્તસર્વાસ્થો મુક્ત એવોત્તમાશયઃ ॥ ૧૦૨॥

નૈષ્કર્મ્યેણ ન તસ્યાર્થસ્તસ્યાર્થોઽસ્તિ ન કર્મભિઃ ।
ન સમાધાનજપ્યાભ્યાં યસ્ય નિર્વાસનં મનઃ ॥ ૧૦૩॥

આત્માસઙ્ગસ્તતોઽન્યત્સ્યાદિન્દ્રજાલં હિ માયિકમ્ ।
ઇત્યચઞ્ચલનિર્ણિતે કુતો મનસિ વાસના ॥ ૧૦૪॥

એવં નાસ્તિ પ્રસઙ્ગોઽપિ કુતોઽસ્યાતિપ્રસઞ્જનમ્ ।
પ્રસઙ્ગો યસ્ય તસ્યૈવ શઙ્ક્યેતાતિપ્રસઞ્જનમ્ ॥ ૧૦૫॥

વિધ્યભાવાન્ન બાલસ્ય દૃશ્યતેઽતિપ્રસઞ્જનમ્ ।
સ્યાત્કુતોઽતિપ્રસઙ્ગોઽસ્ય વિધ્યભાવે સમે સતિ ॥ ૧૦૬॥

ન કિંચિદ્વેત્તિ બાલશ્ચેત્સર્વં વેત્ત્યેવ તત્ત્વવિત્ ।
અલ્પજ્ઞસ્યૈવ વિધયઃ સર્વે સ્યુર્નાન્યયોર્દ્વયોઃ ॥ ૧૦૭॥

શાપાનુગ્રહસામર્થ્યં યસ્યાસૌ તત્ત્વવિદ્યદિ ।
ન તત્ શાપાદિસામર્થ્યં ફલં સ્યાત્તપસો યતઃ ॥ ૧૦૮॥

વ્યાસાદેરપિ સામર્થ્યં દૃશ્યતે તપસો બલાત્ ।
શાપાદિકારણાદન્યત્તપોજ્ઞાનસ્ય કારણમ્ ॥ । ૧૦૯॥

દ્વયં યસ્યાસ્તિ તસ્યૈવ સામર્થ્યજ્ઞાનયોર્જનિઃ ।
એકૈકં તુ તપઃ કુર્વન્નેકૈકં લભતે ફલમ્ ॥ ૧૧૦॥

સામર્થ્યહીનો નિન્દ્યશ્ચેદ્યતિભિર્વિધિવર્જિતઃ ।
નિન્દ્યન્તે યતયોઽપ્યન્યૈરનિશં ભોગલંપટૈઃ ॥ ૧૧૧॥

ભિક્ષાવસ્ત્રાદિ રક્ષેયુર્યદ્યેતે ભોગતુષ્ટયે ।
અહો યતિત્વમેતેષાં વૈરાગ્યભરમન્થરમ્ ॥ ૧૧૨॥

વર્ણાશ્રમપરાન્મૂર્ખા નિન્દન્ત્વિત્યુચ્યતે યદિ ।
દેહાત્મમતયો બુદ્ધં નિન્દન્ત્વાશ્રમમાનિનઃ ॥ ૧૧૩॥

તદિત્થં તત્ત્વવિજ્ઞાને સાધનાનુપમર્દનાત્ ।
જ્ઞાનિનાચરિતું શક્યં સમ્યગ્રાજ્યાદિ લૌકિકમ્ ॥ ૧૧૪॥

મિથ્યાત્વબુદ્ધ્યા તત્રેચ્છા નાસ્તિ ચેત્તર્હિ માસ્તુ તત્ ।
ધ્યાયન્વાથ વ્યવહરન્યથારબ્ધં વસત્વયમ્ ॥ ૧૧૫॥

ઉપાસકસ્તુ સતતં ધ્યાયન્નેવ વસેદિતિ ।
ધ્યાનેનૈવ કૃતં તસ્ય બ્રહ્મત્વં વિષ્ણુતાદિવત્ ॥ ૧૧૬॥

ધ્યાનોપાદાનકં યત્તદ્ધ્યાનાભાવે વિલીયતે ।
વાસ્તવી બ્રહ્મતા નૈવ જ્ઞાનાભાવે વિલીયતે ॥ ૧૧૭॥

તતોઽભિજ્ઞાપકં જ્ઞાનં ન નિત્યં જનયત્યદઃ ।
જ્ઞાપકાભાવમાત્રેણ ન હિ સત્યં વિલીયતે ॥ ૧૧૮॥

અસ્ત્યેવ ઉપાસકસ્યાપિ વાસ્તવી બ્રહ્મતેતિ ચેત્ ।
પામરાણાં તિરશ્ચાં ચ વાસ્તવી બ્રહ્મતા ન કિમ્ ॥ ૧૧૯॥

અજ્ઞાનાદપુમર્થત્વમુભયત્રાપિ તત્સમમ્ ।
ઉપવાસાદ્યથા ભિક્ષા વરં ધ્યાનં તથાન્યથઃ ॥ ૧૨૦॥

પામરાણાં વ્યવહૃતેર્વરં કર્માદ્યનુષ્ઠિતિઃ ।
તતોઽપિ સગુણોપાસ્તિર્નિર્ગુણોપાસનં તતઃ ॥ ૧૨૧॥

યાવદ્વિજ્ઞાનસામીપ્યં તાવચ્છ્રૈષ્ઠ્યં વિવર્ધતે ।
બ્રહ્મજ્ઞાનાય તે સાક્ષાન્નિર્ગુણોપાસનં શનૈઃ ॥ ૧૨૨॥

યથા સંવાદિવિભ્રાન્તિઃ ફલકાલે પ્રમાયતે ।

વિધાયતે તથોપાસ્તિર્મુક્તિકાલેઽતિપાકતઃ ॥ ૧૨૩॥

સંવાદિભ્રમતઃ પુંસઃ પ્રવૃત્તસ્યાન્યમાનતઃ ।
પ્રમેતિ ચેત્તથોપાસ્તિર્માન્તરે કારણાયતામ્ ॥ ૧૨૪॥

મૂર્તિધ્યાનસ્ય મન્ત્રાદેરપિ કારણતા યદિ ।
અસ્તુ નામ તથાપ્યત્ર પ્રત્યાસત્તિર્વિશિષ્યતે ॥ ૧૨૫॥

નિર્ગુણોપાસનં પક્વં સમાધિઃ સ્યાચ્છનૈસ્તતઃ ।
યઃ સમાધિર્નિરોધાખ્યઃ સોઽનાયાસેન લભ્યતે ॥ ૧૨૬॥

નિરોધલાભે પુંસોઽન્તરસઙ્ગં વસ્તુ શિષ્યતે ।
પુનઃ પુનર્વાસિતેઽસ્મિન્વાક્યાજ્જાયેત તત્ત્વધીઃ ॥ ૧૨૭॥

નિર્વિકારાસઙ્ગનિત્યસ્વપ્રકાશૈકપૂર્ણતાઃ ।
બુદ્ધૌ ઝટિતિ શાસ્ત્રોક્તા આરોહન્ત્યવિવાદતઃ ॥ ૧૨૮॥

યોગાભ્યાસસ્ત્વેતદર્થોઽમૃતબિન્દ્વાદિષુ શ્રુતઃ ।
એવં ચ દૃષ્ટદ્વારાપિ હેતુત્વાદન્યતો વરમ્ ॥ ૧૨૯॥

ઉપેક્ષ્ય તત્તીર્થયાત્રાં જપાદીનેવ કુર્વતામ્ ।
પિણ્ડં સમુત્સૃજ્ય કરં લેઢીતિ ન્યાય આપતેત્ ॥ ૧૩૦॥

ઉપાસકાનામપ્યેવં વિચારત્યાગતો યદિ ।
બાધં તસ્માદ્વિચારસ્યાસમ્ભવે યોગ ઈરિતઃ ॥ ૧૩૧॥

બહુવ્યાકુલચિત્તાનાં વિચારાત્તત્ત્વધીર્ન હિ ।
યોગો મુખ્યસ્તતસ્તેષાં ધીદર્પસ્તેન નશ્યતિ ॥ ૧૩૨॥

અવ્યાકુલધિયાં મોહમાત્રેણાચ્છાદિતાત્મનામ્ ।
સાઙ્ખ્યનામા વિચારાઃ સ્યાન્મુખ્યો ઝટિતિ સિદ્ધિતઃ ॥ ૧૩૩॥

યત્સાઙ્ખ્યૈઃ પ્રાપ્યતે સ્થાનં તદ્યોગૈરપિ ગમ્યતે ।
એકં સાઙ્ખ્યં ચ યોગં ચ યઃ પશ્યતિ સ પશ્યતિ ॥ ૧૩૪॥

તત્કારણં સાઙ્ખ્યયોગાધિગમ્યમિતિ હિ શ્રુતિઃ ।
યસ્તુ શ્રુતેર્વિરુદ્ધઃ સ આભાસઃ સાઙ્ખ્યયોગયોઃ ॥ ૧૩૫॥

ઉપાસનં નાતિપક્વમિહ યસ્ય પરત્ર સઃ ।
મરણે બ્રહ્મલોકે વા તત્ત્વં વિજ્ઞાય મુચ્યતે ॥ ૧૩૬॥

યં યં ચાપિ સ્મરન્ભાવં ત્યજત્યન્તે કલેવરમ્ ।
તં તેવૈતિ યચ્ચિત્તસ્તેન યાતીતિ શાસ્ત્રતઃ ॥ ૧૩૭॥

અન્ત્યપ્રત્યયતો નૂનં ભાવિજન્મ તથા સતિ ।
નિર્ગુણપ્રત્યયોઽપિ સ્યાત્સગુણોપાસને યથા ॥ ૧૩૮॥

નિત્યં નિર્ગુણરૂપં તન્નામમાત્રેણ ગીયતામ્ ।
અર્થતોમોક્ષ એવૈષ સંવાદિ ભ્રમવન્મતઃ ॥ ૧૩૯॥

તત્સામર્થ્યાજ્જાયતે ધીર્મૂલાવિદ્યાનિવર્તિકા ।
અવિમુક્તોપાસનેન તારકબ્રહ્મ બુદ્ધિવત્ ॥ ૧૪૦॥

સકામો નિષ્કામ ઇતિ હ્યશરીરો નિરિન્દ્રિયઃ ।
અભયં હીતિ મુક્તત્વં તાપનીયે ફલં શ્રુતમ્ ॥ ૧૪૧॥

ઉપાસનસ્ય સામર્થ્યાદ્વિદ્યોત્પત્તિર્ભવેત્તતઃ ।
નાન્યઃ પન્થા ઇતિ હ્યેતચ્છાસ્ત્રં નૈવ વિરુધ્યતે ॥ ૧૪૨॥

નિષ્કામોપાસનાન્મુક્તિસ્તાપનીયે સમીરિતા ।
બ્રહ્મલોકઃ સકામસ્ય શૈબ્યપ્રશ્ને સમીરિતઃ ॥ ૧૪૩॥

ય ઉપાસ્તે ત્રિમાત્રેણ બ્રહ્મલોકે સ નીયતે ।
સ એતસ્માજ્જીવઘનાત્પરં પુરુષમીક્ષતે ॥ ૧૪૪॥

અપ્રતીકાધિકરણે તત્ક્રતુર્ન્યાય ઈરિતઃ ।
બ્રહ્મલોકફલં તસ્માત્સકામસ્યેતિ વર્ણિતમ્ ॥ ૧૪૫॥

નિર્ગુણોપાસ્તિસામર્થ્યાત્તત્ર તત્ત્વમવેક્ષણત્ ।
પુનરાવર્તતે નાયં કલ્પાન્તે તુ વિમુચ્યતે ॥ ૧૪૬॥

પ્રણવોપાસ્તયઃ પ્રાયો નિર્ગુણા એવ વેદગાઃ ।
ક્વચિત્સગુણતા પ્રોક્તા પ્રણવોપાસનસ્ય હિ ॥ ૧૪૭॥

પરાપરબ્રહ્મરૂપ ઓઙ્કાર ઉપવર્ણિતઃ ।
પિપ્પલાદેન મુનિના સત્યકામાય પૃચ્છતે ॥ ૧૪૮॥

એતદાલમ્બનં જ્ઞાત્વા યો યદિચ્છતિ તસ્ય તત્ ।
ઇતિ પ્રોક્તં યમેનાપિ પૃચ્છતે નચિકેતસે ॥ ૧૪૯॥

ઇહ વા મરણે વાસ્ય બ્રહ્મલોકેઽથવા ભવેત્ ।
બ્રહ્મસાક્ષાત્કૃતિઃ સમ્યગુપાસીનસ્ય નિર્ગુણમ્ ॥ ૧૫૦॥

અર્થોઽયમાત્મગીતાયામપિ સ્પષ્ટમુદીરિતઃ ।
વિચારાક્ષમ આત્માનમુપાસીતેતિ સન્તતમ્ ॥ ૧૫૧॥

સાક્ષાત્કર્તુમશક્તોઽપિ ચિન્તયેન્મામશઙ્કિતઃ ।
કાલેનાનુભવારૂઢો ભવેયં ફલતો ધ્રુવમ્ ॥ ૧૫૨॥

યથાગાધનિધેઃલબ્ધૌ નોપાયઃ ખનનં વિના ।
મલ્લભેઽપિ તથા સ્વાત્મચિન્તાં મુક્ત્વા ન ચાપરઃ ॥ ૧૫૩॥

દેહોપલમપાકૃત્ય બુદ્ધિકુદ્દલકાત્પુનઃ ।
ખાત્વા મનોભુવં ભૂયો ગૃહ્ણીયાન્માં નિધિં પુમાન્ ॥ ૧૫૪॥

અનુભૂતેરભાવેઽપિ બ્રહ્માસ્મીત્યેવ ચિન્ત્યતામ્ ।
અપ્યસત્ પ્રાપ્યતે ધ્યાનાન્નિત્યાપ્તં બ્રહ્મ કિં પુનઃ ॥ ૧૫૫॥

અનાત્મબુદ્ધિશૈથિલ્યં ફલં ધ્યાનાદ્દિને દિને ।
પશ્યન્નપિ ન ચેદ્ધ્યાયેત્કોઽપરોઽસ્માત્ પશુર્વદ ॥ ૧૫૬॥

દેહાભિમાનં વિધ્વસ્ય ધ્યાનાદાત્માનમદ્વયમ્ ।
પશ્યન્મર્ત્યો મૃતો ભૂત્વા હ્યત્ર બ્રહ્મ સમશ્નુતે ॥ ૧૫૭॥

ધ્યાનદીપમિમં સમ્યક્પરામૃષતિ યો નરઃ ।
મુક્તસંશય એવાયં ધ્યાયતિ બ્રહ્મ સન્તતમ્ ॥ ૧૫૮॥

ઇતિ ધ્યાનદીપો નામ નવમઃ પરિચ્છેદઃ ॥ ૯॥

## ૧૦. નાટકદીપોનામ - દશમઃ પરિચ્છેદઃ ।

પરમાત્માદ્વયાનન્દપૂર્ણઃ પૂર્વં સ્વમાયયા ।
સ્વયમેવ જગદ્ભૂત્વા પ્રાવિશજ્જીવરૂપતઃ ॥ ૧॥

દેવાદ્યુત્તમદેહેષુ પ્રવિષ્ટો દેવતાભવત્ ।
મર્ત્યાદ્યધમદેહેષુ સ્થિતો ભજતિ દેવતામ્ ॥ ૨॥

અનેકજન્મભજનાત્સ્વવિચારં ચિકીર્ષતિ ।
વિચારેણ વિનષ્ટાયાં માયાયાં શિષ્યતે સ્વયમ્ ॥ ૩॥

અદ્વયાનન્દરૂપસ્ય સદ્વયત્વં ચ દુઃખિતા ।
બન્ધઃ પ્રોક્તઃ સ્વરૂપેણ સ્થિતિર્મુક્તિરિતીર્યતે ॥ ૪॥

અવિચારકૃતો બન્ધો વિચારેણ નિવર્તતે ।
તસ્માજ્જીવપરાત્માનૌ સર્વદૈવ વિચારયેત્ ॥ ૫॥

અહમિત્યભિમન્તા યઃ કર્તાસૌ તસ્ય સાધનમ્ ।
મનસ્તસ્ય ક્રિયે અન્તર્બહિર્વૃત્તિ ક્રમોત્થિતે ॥ ૬॥

અન્તર્મુખાહમિત્યેષા વૃત્તિઃ કર્તારમુલ્લિખેત્ ।
બહિર્મુખેદમિત્યેષા બાહ્યં વસ્ત્વિદમુલ્લિખેત્ ॥ ૭॥

ઇદમો યે વિશેષાઃ સ્યુર્ગન્ધરૂપરસાદયઃ ।
અસાઙ્કર્યેણ તાન્ભિન્દ્યાદ્ઘ્રાણાદીન્દ્રિયપઞ્ચકમ્ ॥ ૮॥

કર્તારં ચ ક્રિયાં તદ્વદ્વ્યાવૃત્તવિષયાનપિ ।
સ્ફોરયેદેકયત્નેન યોઽસૌ સાક્ષ્યત્ર ચિદ્વપુઃ ॥ ૯॥

ઈક્ષે શૃણોમિ જિઘ્રામિ સ્વાદયામિ સ્પૃશામ્યહમ્ ।
ઇતિ ભાસયતે સર્વં નૃત્યશાલાસ્થદીપવત્ ॥ ૧૦॥

નૃત્યશાલાસ્થિતો દીપઃ પ્રભું સભ્યાંશ્ચ નર્તકીમ્ ।
દીપયેદવિશેષેણ તદભાવેઽપિ દીપ્યતે ॥ ૧૧॥

અહઙ્કારં ધિયં સાક્ષી વિષયાનપિ ભાસયેત્ ।
અહઙ્કારાદ્યભાવેઽપિ સ્વયં ભાત્યેવ પૂર્વવત્ ॥ ૧૨॥

નિરન્તરં ભાસમાને કૂટસ્થે જ્ઞપ્તિરૂપતઃ ।
તદ્ભાસા ભાસ્યમાનેયં બુદ્ધિર્નૃત્યત્યનેકધા ॥ ૧૩॥

અહઙ્કારઃ પ્રભુઃ સભ્યા વિષયા નર્તકી મતિઃ ।
તાલાદિધારિણ્યક્ષાણિ દીપઃ સાક્ષ્યવભાસકઃ ॥ ૧૪॥

સ્વસ્થાનસંસ્થિતો દીપઃ સર્વતો ભાસયેદ્યથા ।
સ્થિરસ્થાયી તથા સાક્ષી બહિરન્તઃ પ્રકાશયેત્ ॥ ૧૫॥

બહિરન્તર્વિભાગોઽયં દેહાપેક્ષો ન સાક્ષિણિ ।
વિષયા બાહ્યદેશસ્થા દેહસ્યાન્તરહઙ્કૃતિઃ ॥ ૧૬॥

અન્તસ્થા ધીઃ સહૈવાક્ષૈર્બહિર્યાતિ પુનઃ પુનઃ ।
ભાસ્યબુદ્ધિસ્થચાઞ્ચલ્યં સાક્ષિણ્યારોપ્યતે વૃથા ॥ ૧૭॥

ગૃહાન્તરગતઃ સ્વલ્પો ગવાક્ષાદાતપોઽચલઃ ।

તત્ર હસ્તે નર્ત્યમાને નૃત્યતીવાતપો યથા ॥ ૧૮॥

નિજસ્થાનસ્થિતઃ સાક્ષી બહિરન્તર્ગમાગમૌ ।
અકુર્વન્બુદ્ધિચાઞ્ચલ્યાત્કરોતીવ તથા તથા ॥ ૧૯॥

ન બાહ્યો નાન્તરઃ સાક્ષી બુદ્ધેર્દેશૌ હિ તાવુભૌ ।
બુદ્ધ્યાદ્યશેષસંશાન્તૌ યત્ર ભાત્યસ્તિ તત્ર સઃ ॥ ૨૦॥

દેશઃ કોઽપિ ન ભાસેત યદિ તર્હ્યસ્ત્વદેશભાક્ ।
સર્વદેશપ્રક્લૃપ્ત્યૈવ સર્વગત્વં ન તુ સ્વતઃ ॥ ૨૧॥

અન્તર્બહિર્વા સર્વં વા યં દેશં પરિકલ્પયેત્ ।
બુદ્ધિસ્તદ્દેશગઃ સાક્ષી તથા વસ્તુષુ યોજયેત્ ॥ ૨૨॥

યદ્યદ્રૂપ આદિ કલ્પ્યેત બુદ્ધ્યા તત્તત્પ્રકાશયન્ ।
તસ્ય તસ્ય ભવેત્સાક્ષી સ્વતો વાગ્બુદ્ધ્યગોચરઃ ॥ ૨૩॥

કથં તાદૃઙ્મયા ગ્રાહ્યમિતિ ચેન્મૈવ ગૃહ્યતામ્ ।
સર્વગ્રહોપસંશાન્તૌ સ્વયમેવાવશિષ્યતે ॥ ૨૪॥

ન તત્ર માનાપેક્ષાસ્તિ સ્વપ્રકાશસ્વરૂપતઃ ।
તાદૃગ્વ્યુત્પત્ત્યપેક્ષા ચેચ્છ્રુતિં પઠ ગુરોર્મુખાત્ ॥ ૨૫॥

યદિ સર્વગૃહત્યાગોઽશક્યસ્તર્હિ ધિયં વ્રજ ।
શરણં તદધીનોઽન્તર્બહિર્વૈષોઽનુભૂયતામ્ ॥ ૨૬॥

ઇતિ નાટકદીપોનામ દશમઃ પરિચ્છેદઃ ॥ ૧૦॥

## ૧૧. બ્રહ્માનન્દે યોગાનન્દોનામ - એકાદશઃ પરિચ્છેદઃ ।

બ્રહ્માનન્દં પ્રવક્ષ્યામિ જ્ઞાતે તસ્મિન્નશેષતઃ ।
ઐહિકામુષ્મિકાનર્થવ્રાતં હિત્વા સુખાયતે ॥ ૧॥

બ્રહ્મવિત્પરમાપ્નોતિ શોકં તરતિ ચાત્મવિત્ ।
રસો બ્રહ્મરસં લબ્ધ્વાનન્દી ભવતિ નાન્યથા ॥ ૨॥

પ્રતિષ્ઠાં વિન્દતે સ્વસ્મિન્યદા સ્યાદથ સોઽભયઃ ।
કુરુતેઽસ્મિન્નન્તરં ચેદથ તસ્ય ભયં ભવેત્ ॥ ૩॥

વાયુઃ સૂર્યો વહ્નિરિન્દ્રો મૃત્યુર્જન્માન્તરેઽન્તરમ્ ।

કૃત્વા ધર્મં વિજાનન્તોઽપ્યસ્માદ્ભીત્યા ચરન્તિ હિ ॥ ૪॥

આનન્દં બ્રહ્મણો વિદ્વાન્ન બિભેતિ કુતશ્ચન ।
એતમેવ તપેન્નૈષા ચિન્તા કર્માગ્નિસમ્ભૃતા ॥ ૫॥

એવં વિદ્વાન્કર્મણિ દ્વે હિત્વાત્માનં સ્મરેત્સદા ।
કૃતે ચ કર્મણિ સ્વાત્મરૂપેણૈવૈષ પશ્યતિ ॥ ૬॥

ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે ॥ ૭॥

તમેવ વિદ્વાનત્યેતિ મૃત્યું પન્થા ન ચેતરઃ ।
જ્ઞાત્વા દેવં પાશહાનિઃ ક્ષીણૈઃ ક્લેશૈર્ન જન્મભાક્ ॥ ૮॥

દેવં મત્વા હર્ષશોકૌ જહાત્યત્રૈવ ધૈર્યવાન્ ।
નૈનં કૃતાકૃતે પુણ્યપાપે તાપયતઃ ક્વચિત્ ॥ ૯॥

ઇત્યાદિશ્રુતયો બહ્વ્યઃ પુરાણૈઃ સ્મૃતિભિઃ સહ ।
બ્રહ્મજ્ઞાનેઽનર્થહાનિમાનન્દં ચાપ્યઘોષયન્ ॥ ૧૦॥

આનન્દસ્ત્રિવિધો બ્રહ્માનન્દો વિદ્યાસુખં તથા ।
વિષયાનન્દ ઇત્યાદૌ બ્રહ્માનન્દો વિવિચ્યતે ॥ ૧૧॥

ભૃગુઃ પુત્રઃ પિતુઃ શ્રુત્વા વરુણાદ્બ્રહ્મલક્ષણમ્ ।
અન્નપ્રાણમનોબુદ્ધિસ્ત્યક્ત્વાનન્દં વિજજ્ઞીવાન્ ॥ ૧૨॥

આનન્દાદેવ ભૂતાનિ જાયન્તે તેન જીવનમ્ ।
તેષાં લયશ્ચ તત્રાતો બ્રહ્માનન્દો ન સંશયઃ ॥ ૧૩॥

ભૂતોત્પત્તેઃ પુરા ભૂમા ત્રિપુટીદ્વૈતવર્જનાત્ ।
જ્ઞાતૃજ્ઞાનજ્ઞેયરૂપા ત્રિપુટી પ્રલયે હિ ન ॥ ૧૪॥

વિજ્ઞાનમય ઉત્પન્નો જ્ઞાતા જ્ઞાનં મનોમયઃ ।
જ્ઞેયાઃ શબ્દાદયો નૈતત્ત્રયમુત્પત્તિતઃ પુરા ॥ ૧૫॥

ત્રયાભાવે તુ નિર્દ્વૈતઃ પૂર્ણ એવાનુભૂયતે ।
સમાધિસુપ્તિમૂર્ચ્છાસુ પૂર્ણઃ સૃષ્ટેઃ પુરા તથા ॥ ૧૬॥

યો ભૂમા તત્સુખં નાલ્પે સુખં ત્રેધા વિભેદિનિ ।
સનત્કુમારઃ પ્રાહૈવં નારદાયાતિશોકિને ॥ ૧૭॥

સપુરાણાન્પઞ્ચ વેદાન્ શાસ્ત્રાણિ વિવિધાનિ ચ ।
જ્ઞાત્વાપ્યનાત્મવિત્ત્વેન નારદોઽતિશુશોચ હ ॥ ૧૮॥

વેદાભ્યાસાત્પુરા તાપત્રયમાત્રેણ શોકિતા ।
પશ્ચાત્ત્વભ્યાસવિસ્મારભઙ્ગગર્વૈશ્ચ શોકિતા ॥ ૧૯॥

સોઽહં વિદ્વાન્પ્રશોચામિ શોકપારં નયસ્વ મામ્ ।
ઇત્યુક્તઃ સુખમેવાસ્ય પારમિત્યભ્યધાદૃષિઃ ॥ ૨૦॥

સુખં વૈષયિકં શોકસહસ્રેણાવૃતત્વતઃ ।
દુઃખમેવેતિ મત્વાહ નાલ્પેઽસ્તિ સુખમિત્યસૌ ॥ ૨૧॥

નનુ દ્વૈતે સુખં માભૂદદ્વૈતેઽપ્યસ્તિ નો સુખમ્ ।
અસ્તિ ચેદુપલભ્યેત તથા ચ ત્રિપુટી ભવેત્ ॥ ૨૨॥

માસ્ત્વદ્વૈતે સુખં કિન્તુ સુખમદ્વૈતમેવ હિ ।
કિં માનમિતિ ચેન્નાસ્તિ માનાકાઙ્ક્ષા સ્વયં પ્રભે ॥ ૨૩॥

સ્વપ્રભત્વે ભવદ્વાક્યં માનં યસ્માદ્ભવાનિદમ્ ।
અદ્વૈતમભ્યુપેત્યાસ્મિન્સુખં નાસ્તીતિ ભાષતે ॥ ૨૪॥

નાભ્યુપૈમ્યહમદ્વૈતં ત્વદ્વચોઽનૂદ્ય દૂષણમ્ ।
વચ્મીતિ ચેત્તદા બ્રૂહિ કિમાસીદ્દ્વૈતતઃ પુરા ॥ ૨૫॥

કિમદ્વૈતમુત દ્વૈતમન્યો વા કોટિરન્તિમઃ ।
અપ્રસિદ્ધો ન દ્વિતીયોઽનુત્પત્તેઃ શિષ્યતેઽગ્રિમઃ ॥ ૨૬॥

અદ્વૈતસિદ્ધિર્યુક્ત્યૈવ નાનુભૂત્યેતિ ચેદ્વદ ।
નિર્દૃષ્ટાન્તા સદૃષ્ટાન્તા વા કોટ્યન્તરમત્ર નો ॥ ૨૭।
નાનુભૂતિઃર્ન દૃષ્ટાન્ત ઇતિ યુક્તિસ્તુ શોભતે ।
સદૃષ્ટાન્તત્વપક્ષે તુ દૃષ્ટાન્તં વદ મે મતમ્ ॥ ૨૮॥

અદ્વૈતઃ પ્રલયો દ્વૈતાનુપલમ્ભેન સુપ્તિવત્ ।
ઇતિ ચેત્સુપ્તિરદ્વૈતેત્યત્ર દૃષ્ટાન્તમીરય ॥ ૨૯॥

દૃષ્ટાન્તઃ પરસુપ્તિશ્ચેદહો તે કૌશલં મહત્ ।
યઃ સ્વસુપ્તિં ન વેત્ત્યસ્ય પરસુપ્તૌ તુ કા કથા ॥ ૩૦॥

નિશ્ચેષ્ટત્વાત્પરઃ સુપ્તો યથાહમિતિ ચેત્તદા ।
ઉદાહર્તુઃ સુષુપ્તેસ્તે સ્વપ્રભત્વં બલાદ્ભવેત્ ॥ ૩૧॥

નેન્દ્રિયાણિ ન દૃષ્ટાન્તસ્તથાપ્યઙ્ગીકરોષિ તામ્ ।
ઇદમેવ સ્વપ્રભત્વં યદ્ભાનં સાધનૈર્વિના ॥ ૩૨॥

સ્તામદ્વૈતસ્વપ્રભત્વે વદ સુપ્તૌ સુખં કથમ્ ।
શ઼ૃણુ દુઃખં તદા નાસ્તિ તતસ્તે શિષ્યતે સુખમ્ ॥ ૩૩॥

અન્ધઃ સન્નપ્યનન્ધઃ સ્યાદ્વિદ્ધોઽવિદ્ધોઽથ રોગ્યપિ ।
અરોગીતિ શ્રુતિઃ પ્રાહ તચ્ચ સર્વે જના વિદુઃ ॥ ૩૪॥

ન દુઃખાભાવમાત્રેણ સુખં લોષ્ટશિલાદિષુ ।
દ્વયાભાવસ્ય દૃષ્ટત્વાદિતિ ચેદ્વિષમં વચઃ ॥ ૩૫॥

મુખદૈન્યપ્રકાશાભ્યાં પરદુઃખસુખોહનમ્ ।
દૈન્યાદ્યભાવતો લોષ્ટે દુઃખાદ્યૂહો ન સમ્ભવેત્ ॥ ૩૬॥

સ્વકીયસુખદુઃખે તુ નોહનીયે તતસ્તયોઃ ।
ભાવો વેદ્યોઽનુભૂત્યૈવ તદભાવોઽપિ નાન્યતઃ ॥ ૩૭॥

તથા સતિ સુષુપ્તૌ ચ દુઃખાભાવોઽનુભૂતિતઃ ।
વિરોધિદુઃખરાહિત્યાત્સુખં નિર્વિઘ્નમિષ્યતામ્ ॥ ૩૮॥

મહત્તરપ્રયાસેન મૃદુશય્યાદિસાધનમ્ ।
કુતઃ સમ્પાદ્યતે સુપ્તૌ સુખં ચેત્તત્ર નો ભવેત્ ॥ ૩૯॥

દુઃખનાશાર્થમેવૈતદિતિ ચેદ્રોગિણસ્તથા ।
ભવત્વરોગિણસ્તે તત્સુખાયૈવેતિ નિશ્ચિનુ ॥ ૪૦॥

તર્હિ સાધનજન્યત્વાત્સુખં વૈષયિકં ભવેત્ ।
ભવત્યેવાત્ર નિદ્રાયાઃ પૂર્વં શય્યાસનાદિજમ્ ॥ ૪૧॥

નિદ્રાયાં તુ સુખં યત્તજ્જન્યતે કેન હેતુના ।
સુખાભિમુખધીરાદૌ પશ્ચાન્મજ્જેત્પરે સુખે ॥ ૪૨॥

જાગ્રદ્વ્યાપૃતિભિઃ શ્રાન્તો વિશ્રમ્યાથ વિરોધિનિ ।
અપનીતે સ્વસ્થચિતોઽનુભવેદ્વિષયે સુખમ્ ॥ ૪૩॥

આત્માભિમુખધીવૃત્તૌ સ્વાનન્દઃ પ્રતિબિમ્બતિ ।
અનુભૂયૈનમત્રાપિ ત્રિપુટ્યા શ્રાન્તિમાપ્નુયાત્ ॥ ૪૪॥

તચ્છ્રમસ્યાપનુત્યર્થં જીવો ધાવેત્પરાત્મનિ ।
તેનૈક્યં પ્રાપ્ય તત્રત્યો બ્રહ્માનન્દઃ સ્વયં ભવેત્ ॥ ૪૫॥

દૃષ્ટાન્તાઃ શકુનિઃ શ્યેનઃ કુમારશ્ચ મહાનૃપઃ ।
મહાબ્રાહ્મણ ઇત્યેતે સુપ્ત્યાનન્દે શ્રુતીરિતાઃ ॥ ૪૬॥

શકુનિઃ સૂત્રબદ્ધઃ સન્દિક્ષુ વ્યાપૃત્ય વિશ્રમમ્ ।
અલબ્ધ્વા બન્ધનસ્થાનં હસ્તસ્તમ્ભાદ્યુપાશ્રયેત્ ॥ ૪૭॥

જીવોપાધિર્મનસ્તદ્વદ્ધર્માધર્મફલાપ્તયે ।
સ્વપ્ને જાગ્રતિ ચ ભ્રાન્ત્વા ક્ષીણે કર્મણિ લીયતે ॥ ૪૮॥

શ્યેનો વેગેન નીડૈકલમ્પટઃ શયિતું વ્રજેત્ ।
જીવઃ સુપ્ત્યૈ તથા ધાવેદ્બ્રહ્માનન્દૈકલમ્પટઃ ॥ ૪૯॥

અતિબાલસ્તનં પીત્વા મૃદુશય્યાગતો હસન્ ।
રાગદ્વેષાદ્યનુત્પત્તેરાનન્દૈકસ્વભાવભાક્ ॥ ૫૦॥

મહારાજઃ સાર્વભૌમઃ સુતૃપ્તઃ સર્વભોગતઃ ।
માનુષાનન્દસીમાનં પ્રાપ્યાનન્દૈકમૂર્તિભાક્ ॥ ૫૧॥

મહાવિપ્રો બ્રહ્મવેદી કૃતકૃત્યત્વલક્ષણામ્ ।
વિદ્યાનન્દસ્ય પરમાં કાષ્ઠાં પ્રાપ્યાવતિષ્ઠતે ॥ ૫૨॥

મુગ્ધબુદ્ધાતિબુદ્ધાનાં લોકે સિદ્ધા સુખાત્મતા ।
ઉદાહૃતાનામન્યે તુ દુઃખિનો ન સુખાત્મકાઃ ॥ ૫૩॥

કુમારાદિવદેવાયં બ્રહ્માનન્દૈકતત્પરઃ ।
સ્ત્રીપરિષ્વક્તવદ્વેદ ન બાહ્યં નાપિ ચાન્તરમ્ ॥ ૫૪॥

બાહ્યં રથ્યાદિકં વૃત્તં ગૃહકૃત્યં યથાન્તરમ્ ।
તથા જાગરણં બાહ્યં નાડીસ્થઃ સ્વપ્ન આન્તરઃ ॥ ૫૫॥

પિતાપિ સુપ્તાવપિતેત્યાદૌ જીવત્વવારણાત્ ।
સુપ્તૌ બ્રહ્મૈવ નો જીવ સંસારિત્વાસમીક્ષણાત્ ॥ ૫૬॥

પિતૃત્વાદ્યભિમાનો યઃ સુખદુઃખાકરઃ સ હિ ।
તસ્મિન્નપગતે તીર્ણઃ સર્વાન્ શોકાન્ભવત્યયમ્ ॥ ૫૭॥

સુષુપ્તિકાલે સકલે વિલીને તમસાવૃતઃ ।
સુખરૂપમુપૈતીતિ બ્રૂતે હ્યાથર્વણી શ્રુતિઃ ॥ ૫૮॥

સુખમસ્વાપ્સમત્રાહં નૈવ કિંચિદવેદિષમ્ ।

ઇતિ દ્વે તુ સુખાજ્ઞાને પરામૃશતિ ચોત્તિતઃ ॥ ૫૯ ॥

પરામર્શોઽનુભૂતેઽસ્તીત્યાસીદનુભવસ્તદા ।
ચિદાત્મત્વત્સ્વતો ભાતિ સુખમજ્ઞાનધીસ્તતઃ ॥ ૬૦ ॥

બ્રહ્મવિજ્ઞાનમાનન્દમિતિ વાજસનેયિનઃ ।
પઠન્ત્યતઃ સ્વપ્રકાશં સુખં બ્રહ્મૈવ નેતરત્ ॥ ૬૧ ॥

યદજ્ઞાનં તત્ર લીનૌ તૌ વિજ્ઞાનમનોમયૌ ।
તયોર્હિ વિલયાવસ્થા નિદ્રાજ્ઞાનં ચ સૈવ હિ ॥ ૬૨ ॥

વિલીનઘૃતવત્પશ્ચાત્સ્યાદ્વિજ્ઞાનમયો ઘનઃ ।
વિલીનાવસ્થ આનન્દમયશબ્દેન કથ્યતે ॥ ૬૩ ॥

સુપ્તિપૂર્વક્ષણે બુદ્ધિવૃત્તિર્યા સુખબિમ્બિતા ।
સૈવ તદ્બિમ્બસહિતા લીનાનન્દમયસ્તતઃ ॥ ૬૪ ॥

અન્તર્મુખોઽયમાનન્દમયો બ્રહ્મસુખં તદા ।
ભુઙ્ક્તે ચિદ્બિમ્બયુક્તાભિરજ્ઞાનોત્પન્નવૃત્તિભિઃ ॥ ૬૫ ॥

અજ્ઞાનવૃત્તયઃ સૂક્ષ્મા વિસ્પષ્ટા બુદ્ધિવૃત્તયઃ ।
ઇતિ વેદાન્તસિદ્ધાન્તપારગાઃ પ્રવદન્તિ હિ ॥ ૬૬ ॥

માણ્ડુક્યતાપનીયાદિશ્રુતિષ્વેતદતિસ્ફુટમ્ ।
આનન્દમયભોક્તૃત્વં બ્રહ્માનન્દે ચ ભોગ્યતા ॥ ૬૭ ॥

એકીભૂતઃ સુષુપ્તસ્થઃ પ્રજ્ઞાનઘનતાં ગતઃ ।
આનન્દમય આનન્દભુક્ચેતોમયવૃત્તિભિઃ ॥ ૬૮ ॥

વિજ્ઞાનમયમુખ્યૈર્યો રૂપૈર્યુક્તઃ પુરાધુના ।
સ લયેનૈકતાં પ્રાપ્તો બહુતણ્ડુલપિષ્ટવત્ ॥ ૬૯ ॥

પ્રજ્ઞાનાનિ પુરા બુદ્ધિવૃત્તયોઽથ ઘનોઽભવત્ ।
ઘનત્વં હિમબિન્દૂનામુદગ્દેશે યથા તથા ॥ ૭૦ ॥

તદ્ઘનત્વં સાક્ષિભાવં દુઃખાભાવં પ્રચક્ષતે ।
લૌકિકાસ્તાર્કિકા યાવદ્દુઃખવૃત્તિવિલોપનાત્ ॥ ૭૧ ॥

અજ્ઞાનબિમ્બિતા ચિત્સ્યાન્મુખમાનન્દભોજને ।
ભુક્તં બ્રહ્મસુખં ત્યક્ત્વા બહિર્યાત્યથ કર્મણા ॥ ૭૨ ॥

કર્મ જન્માન્તરેઽભૂદ્યત્તદ્યોગાદ્બુદ્ધ્યતે પુનઃ ।
ઇતિ કૈવલ્યશાખાયાં કર્મજો બોધ ઈરિતઃ ॥ ૭૩॥

કંચિત્કાલં પ્રબુદ્ધસ્ય બ્રહ્માનન્દસ્ય વાસના ।
અનુગચ્છેદ્યતસ્તૂષ્ણીમાસ્તે નિર્વિષયઃ સુખી ॥ ૭૪॥

કર્મભિઃ પ્રેરિતઃ પશ્ચાન્નાના દુઃખાનિ ભાવયન્ ।
શનૈર્વિસ્મરતિ બ્રહ્માનન્દમેષોઽખિલો જનઃ ॥ ૭૫॥

પ્રાગૂર્ધ્વમપિ નિદ્રાયાઃ પક્ષપાતો દિને દિને ।
બ્રહ્માનન્દે નૃણાં તેન પ્રાજ્ઞોઽસ્મિન્વિવદેત કઃ ॥ ૭૬॥

નનુ તૂષ્ણીં સ્થિતૌ બ્રહ્માનન્દશ્ચેદ્ભાતિ લૌકિકાઃ ।
અલસાશ્ચરિતાર્થાઃ સ્યુઃ શાસ્ત્રેણ ગુરુણાત્ર કિમ્ ॥ ૭૭॥

બાઢં બ્રહ્મેતિ વિદ્યુશ્ચેત્કૃતાર્થાસ્તાવતૈવ તે ।
ગુરુશાસ્ત્રે વિનાત્યન્તં ગમ્ભીરં બ્રહ્મ વેત્તિ કઃ ॥ ૭૮॥

જાનામ્યહં ત્વદુક્ત્યાદ્ય કુતો મે ન કૃતાર્થતા ।
શ ृણ્વત્ર ત્વાદૃશં વૃત્તં પ્રાજ્ઞં મન્યસ્ય કસ્યચિત્ ॥ ૭૯॥

ચતુર્વેદવિદે દેયમિતિ શ ृણ્વન્નવોચત ।
વેદાશ્ચત્વાર ઇત્યેવં વેદ્મિ મે દીયતાં ધનમ્ ॥ ૮૦॥

સાઙ્ખ્યમેવૈષ જાનાતિ ન તુ વેદાનશેષતઃ ।
યદિ તર્હિ તમપ્યેવં નાશેષં બ્રહ્મ વેત્સિ હિ ॥ ૮૧॥

અખણ્ડૈકરસાનન્દે માયાતત્કાર્યવર્જિતે ।
અશેષત્વસશેષત્વવાર્તાવસર એવ કઃ ॥ ૮૨॥

શબ્દાનેવ પઠસ્યાહો તેષામર્થં ચ પશ્યસિ ।
શબ્દપાઠેઽર્થબોધસ્તે સમ્પાદ્યત્વેન શિષ્યતે ॥ ૮૩॥

અર્થે વ્યાકરણાદ્બુદ્ધે સાક્ષાત્કારોઽવશિષ્યતે ।
સ્યાત્કૃતાર્થત્વધીર્યાવત્તાવદ્ગુરુમુપાસ્વ ભોઃ ॥ ૮૪॥

આસ્તામેતદ્યત્ર યત્ર સુખં સ્યાદ્વિષયૈર્વિના ।
તત્ર સર્વત્ર વિદ્ધ્યેતાં બ્રહ્માનન્દસ્ય વાસનામ્ ॥ ૮૫॥

વિષયેષ્વપિ લબ્ધેષુ તદિચ્છોપરમે સતિ ।
અન્તર્મુખમનોવૃત્તાવાનન્દઃ પ્રતિબિમ્બતિ ॥ ૮૬॥

બ્રહ્માનન્દો વાસના ચ પ્રતિબિમ્બ ઇતિ ત્રયમ્ ।
અન્તરેણ જગત્યસ્મિન્નાનન્દો નાસ્તિ કશ્ચન ॥ ૮૭॥

તથા ચ વિષયાનન્દો વાસનાનન્દ ઇત્યમૂ ।
આનન્દૌ જનયન્નાસ્તે બ્રહ્માનન્દઃ સ્વયંપ્રભઃ ॥ ૮૮॥

શ્રુતિયુક્ત્યનુભૂતિભ્યઃ સ્વપ્રકાશચિદાત્મકે ।
બ્રહ્માનન્દે સુપ્તિકાલે સિદ્ધે સત્યન્યદા શ‍ૃણુ ॥ ૮૯॥

ય આનન્દમયઃ સુપ્તૌ સ વિજ્ઞાનમયાત્મતામ્ ।
ગત્વા સ્વપ્નં પ્રબોધં વા પ્રાપ્નોતિ સ્થાનભેદતઃ ॥ ૯૦॥

નેત્રે જાગરણં કણ્ઠે સ્વપ્નઃ સુપ્તિર્હૃદમ્બુજે ।
આપાદમસ્તકં દેહં વ્યાપ્ય જાગર્તિ ચેતનઃ ॥ ૯૧॥

દેહતાદાત્મ્યમાપન્નસ્તપ્તાયઃ પિણ્ડવત્તતઃ ।
અહં મનુષ્ય ઇત્યેવં નિશ્ચિત્યૈવાવતિષ્ઠતે ॥ ૯૨॥

ઉદાસીનઃ સુખી દુઃખીત્યવસ્થાત્રયમેત્યસૌ ।
સુખદુઃખે કર્મકાર્યે ત્વૌદાસીન્યં સ્વભાવતઃ ॥ ૯૩॥

બાહ્યભોગાન્મનોરાજ્યાત્સુખદુઃખે દ્વિધા મતે ।
સુખદુઃખાન્તરાલેષુ ભવેત્તૂષ્ણીમવસ્થિતિઃ ॥ ૯૪॥

ન કાપિ ચિન્તા મેઽસ્ત્યદ્ય સુખમાસ ઇતિ બ્રુવન્ ।
ઔદાસીન્યે નિજાનન્દભાનં વક્ત્યખિલઃ જનઃ ॥ ૯૫॥

અહમસ્મીત્યહઙ્કારસામાન્યેનાવૃતત્વતઃ ।
નિજાનન્દો ન મુખ્યોઽયં કિન્ત્વસૌ તસ્ય વાસના ॥ ૯૬॥

નીરપૂરિતભાણ્ડસ્ય બાહ્યે શૈત્યં ન તજ્જલમ્ ।
કિન્તુ નીરગુણસ્તેન નીરસત્તાનુમીયતે ॥ ૯૭॥

યાવદ્યાવદહઙ્કારો વિસ્મૃતોઽભ્યાસયોગતઃ ।
તાવત્તાવત્સૂક્ષ્મદૃષ્ટેર્નિજાનન્દોઽનુમીયતે ॥ ૯૮॥

સર્વાત્મના વિસ્મૃતઃ સન્સૂક્ષ્મતાં પરમાં વ્રજેત્ ।
અલીનત્વાન્ન નિદ્રૈષા તતો દેહોઽપિ નો પતેત્ ॥ ૯૯॥

ન દ્વૈતં ભાસતે નાપિ નિદ્રા તત્રાસ્તિ યત્સુખમ્ ।

સ બ્રહ્માનન્દ ઇત્યાહ ભગવાનર્જુનં પ્રતિ ॥ ૧૦૦॥

શનૈઃ શનૈરુપરમેદ્બુદ્ધ્યા ધૃતિગૃહીતયા ।
આત્મસંસ્થં મનઃ કૃત્વા ન કિંચિદપિ ચિન્તયેત્ ॥ ૧૦૧॥

યતો યતો નિશ્ચરતિ મનશ્ચઞ્ચલમસ્થિરમ્ ।
તતસ્તતો નિયમ્યૈતદાત્મન્યેવ વશં નયેત્ ॥ ૧૦૨॥

પ્રશાન્તમનસં હ્યેનં યોગિનં સુખમુત્તમમ્ ।
ઉપૈતિ શાન્તરજસં બ્રહ્મભૂતમકલ્મષમ્ ॥ ૧૦૩॥

યત્રોપરમતે ચિત્તં નિરુદ્ધં યોગસેવયા ।
યત્ર ચૈવાત્મનાત્માનં પશ્યન્નાત્મનિ તુષ્યતિ ॥ ૧૦૪॥

સુખમાત્યન્તિકં યત્તદ્બુદ્ધિગ્રાહ્યમતીન્દ્રિયમ્ ।
વેત્તિ યત્ર ન ચૈવાયં સ્થિતશ્ચલતિ તત્ત્વતઃ ॥ ૧૦૫॥

યં લબ્ધ્વા ચાપરં લાભં મન્યતે નાધિકં તતઃ ।
યસ્મિન્ સ્થિતો ન દુઃખેન ગુરુણાપિ વિચાલ્યતે ॥ ૧૦૬॥

તં વિદ્યાદ્દુઃખસંયોગવિયોગં યોગસંજ્ઞિતમ્ ।
સ નિશ્ચયેન યોક્તવ્યો યોગોઽનિર્વિણ્ણચેતસા ॥ ૧૦૭॥

યુઞ્જન્નેવં સદાત્માનં યોગિ વિગતકલ્મષઃ ।
સુખેન બ્રહ્મસંસ્પર્શમત્યન્તં સુખમશ્નુતે ॥ ૧૦૮॥

ઉત્સેક ઉદધેર્યદ્વત્કુશાગ્રેણૈકબિન્દુના ।
મનસો નિગ્રહસ્તદ્વદ્ભવેદપરિખેદતઃ ॥ ૧૦૯॥

બૃહદ્રથસ્ય રાજર્ષેઃ શાકાયન્યો મુનિઃ સુખમ્ ।
પ્રાહ મૈત્રાખ્યશાખાયાં સમાધ્યુક્તિપુરઃસરમ્ ॥ ૧૧૦॥

યથા નિરિન્ધનો વહ્નિઃ સ્વયોનાવુપશામ્યતિ ।
તથા વૃત્તિક્ષયાચ્ચિત્તં સ્વયોનાવુપશામ્યતિ ॥ ૧૧૧॥

સ્વયોનાવુપશાન્તસ્ય મનસઃ સત્યકામિનઃ ।
ઇન્દ્રિયાર્થવિમૂઢસ્યાનૃતાઃ કર્મવશાનુગાઃ ॥ ૧૧૨॥

ચિત્તમેવ હિ સંસારસ્તત્પ્રયત્નેન શોધયેત્ ।
યચ્ચિત્તસ્તન્મયો મર્ત્યો ગુહ્યમેતત્સનાતનમ્ ॥ ૧૧૩॥

ચિત્તસ્ય હિ પ્રસાદેન હન્તિ કર્મ શુભાશુભમ્ ।
પ્રસન્નાત્માત્મનિ સ્થિત્વા સુખમક્ષયમશ્નુતે ॥ ૧૧૪॥

સમાસક્તં યથા ચિત્તં જન્તોર્વિષયગોચરે ।
યદ્યેવં બ્રહ્મણિ સ્યાત્તત્કો ન મુચ્યેત બન્ધનાત્ ॥ ૧૧૫॥

મનો હિ દ્વિવિધં પ્રોક્તં શુદ્ધં ચાશુદ્ધમેવ ચ ।
અશુદ્ધં કામસમ્પર્કાચ્છુદ્ધં કામવિવર્જિતમ્ ॥ ૧૧૬॥

મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ ।
બન્ધાય વિષયાસક્તં મુક્ત્યૈ નિર્વિષયં સ્મૃતમ્ ॥ ૧૧૭॥

સમાધિનિર્ધૂતમલસ્ય ચેતસો
નિવેશિતસ્યાત્મનિ યત્સુખં ભવેત્ ।
ન શક્યતે વર્ણયિતું ગિરા તદા
સ્વયં તદન્તઃકરણેન ગૃહ્યતે ॥ ૧૧૮॥

યદ્યપ્યસૌ ચિરં કાલં સમાધિર્દુર્લભો નૃણામ્ ।
તથાપિ ક્ષણિકો બ્રહ્માનન્દં નિશ્ચાયયત્યસૌ ॥ ૧૧૯॥

શ્રદ્ધાલુર્વ્યસની યોઽત્ર નિશ્ચિનોત્યેવ સર્વથા ।
નિશ્ચિતે તુ સકૃત્તસ્મિન્વિશ્વસિત્યન્યદાપ્યયમ્ ॥ ૧૨૦॥

તાદૃક્પુમાનુદાસીનકાલેઽપ્યાનન્દવાસનામ્ ।
ઉપેક્ષ્ય મુખ્યમાનન્દં ભાવયત્યેવ તત્પરઃ ॥ ૧૨૧॥

પરવ્યસનિની નારી વ્યગ્રાપિ ગૃહકર્મણિ ।
તદેવાસ્વાદયત્યન્તઃ પરસઙ્ગરસાયનમ્ ॥ ૧૨૨॥

એવં તત્ત્વે પરે શુદ્ધે ધીરો વિશ્રાન્તિમાગતઃ ।
તદેવાસ્વાદયત્યન્તર્બહિર્વ્યવહરન્નપિ ॥ ૧૨૩॥

ધીરત્વમક્ષપ્રાબલ્યેઽપ્યાનન્દાસ્વાદવાઞ્છયા ।
તિરસ્કૃત્યાખિલાક્ષાણિ તચ્ચિન્તાયાં પ્રવર્તનમ્ ॥ ૧૨૪॥

ભારવાહી શિરોભારં મુક્ત્વાસ્તે વિશ્રમં ગતઃ ।
સંસારવ્યાપૃતિત્યાગે તાદૃગ્બુદ્ધિસ્તુ વિશ્રમઃ ॥ ૧૨૫॥

વિશ્રાન્તિમ્ પરમાં પ્રાપ્તસ્ત્વૌદાસીન્યે યથા તથા ।
સુખદુઃખદશાયાં ચ તદાનન્દૈકતત્પરઃ ॥ ૧૨૬॥

અગ્નિપ્રવેશહેતૌ ધીઃ શ‍ૃઙ્ગારે યાદૃશી તથા ।
ધીરસ્યોદેતિ વિષયેઽનુસન્ધાનવિરોધિની ॥ ૧૨૭॥

અવિરોધિસુખે બુદ્ધિઃ સ્વાનન્દે ચ ગમાગમૌ ।
કુર્વન્ત્યાસ્તે ક્રમાદેષા કાકાક્ષિવદિતસ્તતઃ ॥ ૧૨૮॥

એકૈવ દૃષ્ટિઃ કાકસ્ય વામદક્ષિણનેત્રયોઃ ।
યાત્યાયાત્યેવમાનન્દદ્વયે તત્ત્વવિદો મતિઃ ॥ ૧૨૯॥

ભુઞ્જાનો વિષયાનન્દં બ્રહ્માનન્દં ચ તત્ત્વવિત્ ।
દ્વિભાષાભિજ્ઞવદ્વિદ્યાદુભૌ લૌકિકવૈદિકૌ ॥ ૧૩૦॥

દુઃખપ્રાપ્તૌ ન ચોદ્વેગો યથા પૂર્વં યતો દ્વિદૃક્ ।
ગઙ્ગામગ્નાર્ધકાયસ્ય પુંસઃ શીતોષ્ણધીર્યથા ॥ ૧૩૧॥

ઇત્થં જાગરણે તત્ત્વવિદો બ્રહ્મસુખં સદા ।
ભાતિ તદ્વાસનાજન્યે સ્વપ્ને તદ્ભાસતે તથા ॥ ૧૩૨॥

અવિદ્યાવાસનાપ્યસ્તીત્યતસ્તદ્વાસનોત્થિતે ।
સ્વપ્ને પૂર્વવદેવૈષ સુખં દુઃખં ચ વીક્ષતે ॥ ૧૩૩॥

બ્રહ્માનન્દાભિધે ગ્રન્થે બ્રહ્માનન્દપ્રકાશકમ્ ।
યોગિપ્રત્યક્ષમધ્યાયે પ્રથમેઽસ્મિન્નુદીરિતમ્ ॥ ૧૩૪॥

ઇતિ બ્રહ્માનન્દે યોગાનન્દઃ સમાપ્તઃ ॥ ૧૧॥

## ૧૨. બ્રહ્માનન્દે આત્માનન્દોનામ - દ્વાદશઃ પરિચ્છેદઃ ।

નન્વેવં વાસનાનન્દાદ્બ્રહ્માનન્દાદપીતરમ્ ।
વેત્તુ યોગી નિજાનન્દં મૂઢસ્યાત્રાસ્તિ કા ગતિઃ ॥ ૧॥

ધર્માધર્મવશાદેષ જાયતાં મ્રિયતામપિ ।
પુનઃ પુનર્દેહલક્ષૈઃ કિં નો દાક્ષિણ્યતો વદ ॥ ૨॥

અસ્તિ વોઽનુજિઘૃક્ષુત્વાદ્દાક્ષિણ્યેન પ્રયોજનમ્ ।
તર્હિ બ્રૂહિ સ મૂઢઃ કિં જિજ્ઞાસુર્વા પરાઙ્મુખઃ ॥ ૩॥

ઉપાસ્તિં કર્મ વા બ્રૂયાદ્વિમુખાય યથોચિતમ્ ।
મન્દપ્રજ્ઞં તુ જિજ્ઞાસુમાત્માનન્દેન બોધયેત્ ॥ ૪॥

બોધયામાસ મૈત્રેયીં યાજ્ઞવલ્ક્યો નિજપ્રિયામ્ ।
ન વા અરે પત્યુરર્થે પતિઃ પ્રિય ઇતીરયન્ ॥ ૫॥

પતિર્જાયા પુત્રવિત્તે પશુબ્રાહ્મણબાહુજાઃ ।
લોકા દેવા વેદભૂતે સર્વં ચાત્માર્થતઃ પ્રિયમ્ ॥ ૬॥

પત્યાવિચ્છા યદા પત્ન્યાસ્તદા પ્રીતિં કરોતિ સા ।
ક્ષુદનુષ્ઠાનરોગાદ્યૈસ્તદા નેચ્છતિ તત્પતિઃ ॥ ૭॥

ન પત્યુરર્થે સા પ્રીતિઃ સ્વાર્થ એવ કરોતિ તામ્ ।
પતિશ્ચાત્મન એવાર્થે ન જાયાર્થે કદાચન ।
અન્યોઽન્યપ્રેરણેઽપ્યેવં સ્વેચ્છયૈવ પ્રવર્તનમ્ ॥ ૮॥

શ્મશ્રુકણ્ટકવેધેન બાલો રુદતિ તત્પિતા ।
ચુમ્બત્યેવ ન સા પ્રીતિર્બાલાર્થે સ્વાર્થ એવ સા ॥ ૯॥

નિરિચ્છમપિ રત્નાદિ વિત્તં યત્નેન પાલયન્ ।
પ્રીતિં કરોતિ સા સ્વાર્થે વિત્તાર્થત્વં  ન શઙ્કિતમ્ ॥ ૧૦॥

અનિચ્છતિ બલીવર્દે વિવાહયિષતે બલાત્ ।
પ્રીતિઃ સા વણિગર્થૈવ બલીવર્દાર્થતા કુતઃ ॥ ૧૧॥

બ્રાહ્મણ્યં મેઽસ્તિ પૂજ્યોઽહમિતિ તુષ્યતિ પૂજયા ।
અચેતનાયા જાતેર્નો સન્તુષ્ટિઃ પુંસ એવ સા ॥ ૧૨॥

ક્ષત્રિયોઽહં તેન રાજ્યં કરોમીત્યત્ર રાજતા ।
ન જાતેર્વૈશ્યજાત્યાદૌ યોજનાયેદમીરિતમ્ ॥ ૧૩॥

સ્વર્ગલોકબ્રહ્મલોકૌ સ્તાં મમેત્યભિવાઞ્છનમ્ ।
લોકયોર્નોપકારાય સ્વભોગાયૈવ કેવલમ્ ॥ ૧૪॥

ઈશવિષ્ણ્વાદયો દેવાઃ પૂજ્યન્તે પાપનષ્ટયે ।
ન તન્નિષ્પાપદેવાર્થં સ્વાર્થં તત્તૂપયુજ્યતે ॥ ૧૫॥

ઋગાદયો હ્યધીયન્તે દુર્બ્રાહ્મણ્યાનવાપ્તયે ।
ન તત્ પ્રસક્તં વેદેષુ મનુષ્યેષુ પ્રસજ્યતે ॥ ૧૬॥

ભૂમ્યાદિપઞ્ચભૂતાનિ સ્થાનતૃટ્પાકશોષણૈઃ ।
હેતુભિશ્ચાવકાશેન વાઞ્છન્ત્યેષાં ન હેતવે ॥ ૧૭॥

સ્વામિભૃત્યાદિકં સર્વં સ્વોપકારાયા વાઞ્છતિ ।

તત્તત્કૃતોપકારસ્તુ તસ્ય તસ્ય ન વિદ્યતે ॥ ૧૮॥

સર્વવ્યવહૃતિષ્વેવમનુસન્ધાતુમીદૃશમ્ ।
ઉદાહરણબાહુલ્યં તેન સ્વાં વાસયેન્મતિમ્ ॥ ૧૯॥

અથ કેયં ભવેત્પ્રીતિઃ શ્રૂયતે યા નિજાત્મનિ ।
રાગો વધ્વાદિ વિષયે શ્રદ્ધા યાગાદિ કર્મણિ ।
ભક્તિઃ સ્યાદ્ગુરુદેવાદાવિચ્છા ત્વપ્રાપ્તવસ્તુનિ ॥ ૨૦॥

તર્હ્યસ્તુ સાત્વિકી વૃત્તિઃ સુખમાત્રાનુવર્તિની ।
પ્રાપ્તે નષ્ટેઽપિ સદ્ભાવાદિચ્છતો વ્યતિરિચ્યતે ॥ ૨૧॥

સુખસાધનતોપાધેરન્નપાનાદયઃ પ્રિયાઃ ।
આત્માનુકુલ્યાદન્નાદિસમશ્ચેદમુનાત્ર કઃ ।
અનુકુલયિતવ્યઃ સ્યાન્નૈકસ્મિન્કર્મકર્તૃતા ॥ ૨૨॥

સુખે વૈષયિકે પ્રીતિમાત્રમાત્મા ત્વતિપ્રિયઃ ।
સુખે વ્યભિચરત્યેષા નાત્મનિ વ્યભિચારિણી ॥ ૨૩॥

એકં ત્યક્ત્વાન્યદાદત્તે સુખં વૈષયિકં સદા ।
નાત્મા ત્યાજ્યો ન ચાદેયસ્તસ્મિન્વ્યભિચરેત્કથમ્ ॥ ૨૪॥

હાનાદાનવિહીનોઽસ્મિન્નુપેક્ષા ચેત્તૃણાદિવત્ ।
ઉપેક્ષિતુઃ સ્વરૂપત્વાન્નોપેક્ષ્યત્વં નિજાત્મનઃ ॥ ૨૫॥

રોગક્રોધાભિભૂતાનાં મુમૂર્ષા વીક્ષ્યતે ક્વચિત્ ।
તતો દ્વેષાદ્ભવેત્ત્યાજ્ય આત્મેતિ યદિ તન્ન હિ ।
ત્યક્તું યોગ્યસ્ય દેહસ્ય નાત્મતા ત્યક્તુરેવ સા ।
ન ત્યક્તર્યસ્તિ સ દ્વેષસ્ત્યાજ્યે દ્વેષે તુ કા ક્ષતિઃ ॥ ૨૬॥

આત્માર્થત્વેન સર્વસ્ય પ્રીતેશ્ચાત્મા હ્યતિપ્રિયઃ ।
યથા પિતુઃ પુત્રમિત્રાત્પુત્રઃ પ્રિયતરસ્તથા ॥ ૨૭॥

મા ન ભૂવમહં કિન્તુ ભૂયાસં સર્વદેત્યસૌ ।
આશીઃ સર્વસ્ય દૃસ્તેતિ પ્રત્યક્ષા પ્રીતિરાત્મનિ ॥ ૨૮॥

ઇત્યાદિભિસ્ત્રિભિઃ પ્રીતૌ સિદ્ધાયામેવમાત્મનિ ।
પુત્રભાર્યાદિશેષત્વમાત્મનઃ કૈશ્ચિદિર્રિતમ્ ॥ ૨૯॥

એતદ્વિવક્ષયા પુત્રે મુખ્યાત્મત્વં શ્રુતીરિતમ્ ।

આત્મા વૈ પુત્રનામેતિ તચ્ચોપનિષદિ સ્ફુટમ્ ॥ ૩૦॥

સોઽસ્યાયમાત્મા પુણ્યેભ્યઃ કર્મભ્યઃ પ્રતિધીયતે ।
અથાસ્યેતર આત્માયં કૃતકૃત્યઃ પ્રમીયતે ॥ ૩૧॥

સત્યપ્યાત્મનિ લોકોઽસ્તિ નાપુત્રસ્યાત એવ હિ ।
અનુશિષ્ટં પુત્રમેવ લોક્યમાહુર્મનીષિણઃ ॥ ૩૨॥

મનુષ્યલોકો જય્યઃ સ્યાત્પુત્રેણૈવેતરેણ નો ।
મુમૂર્ષુર્મન્ત્રયેત્પુત્રં ત્વં બ્રહ્મેત્યાદિમન્ત્રકૈઃ ॥ ૩૩॥

ઇત્યાદિશ્રુતયઃ પ્રાહુઃ પુત્રભાર્યાદિશેષતામ્ ।
લૌકિકા અપિ પુત્રસ્ય પ્રાધાન્યમનુમન્યતે ॥ ૩૪॥

સ્વસ્મિન્મૃતેઽપિ પુત્રાદિર્જીવેદ્વિત્તાદિના યથા ।
તથૈવ યત્નં કુરુતે મુખ્યાઃ પુત્રાદયસ્તતઃ ॥ ૩૫॥

બાધમેતાવતા નાત્મા શેષો ભવતિ કસ્ય ચિત્ ।
ગૌણમિથ્યામુખ્યભેદૈરાત્માયં ભવતિ ત્રિધા ॥ ૩૬॥

દેવદત્તસ્તુ સિંહોઽયમિત્યૈક્યં ગૌણમેતયોઃ ।
ભેદસ્ય ભાસમાનત્વાત્પુત્રાદેરાત્મતા તથા ॥ ૩૭॥

ભેદોઽસ્તિ પઞ્ચકોષેષુ સાક્ષિણો ન તુ ભાત્યસૌ ।
મિથ્યાત્મતાતઃ કોષાણાં સ્થાણોર્ચોરાત્મતા યથા ॥ ૩૮॥

ન ભાતિ ભેદો નાપ્યસ્તિ સાક્ષિણોઽપ્રતિયોગિનઃ ।
સર્વાન્તરત્વાત્ તસ્યૈવ મુખ્યમાત્મત્વમિષ્યતે ॥ ૩૯॥

સત્યેવં વ્યવહારેષુ યેષુ યસ્યાત્મતોચિતા ।
તેષુ તસ્યૈવ શેષિત્વં સર્વસ્યાન્યસ્ય શેષતા ॥ ૪૦॥

મુમૂર્ષોર્ગૃહરક્ષાદૌ ગૌણાત્મૈવોપયુજ્યતે ।
ન મુખ્યાત્મા ન મિથ્યાત્મા પુત્રઃ શેષી ભવત્યતઃ ॥ ૪૧॥

અધ્યેતા વહ્નિરિત્યત્ર સન્નપ્યગ્નિર્ન ગૃહ્યતે ।
અયોગ્યત્વેન યોગ્યત્વાદ્બટુરેવાત્ર ગૃહ્યતે ॥ ૪૨॥

કૃશોઽહં પુષ્ટિમાપ્સ્યામીત્યાદૌ દેહાત્મતોચિતા ।
ન પુત્રં વિનિયુઙ્ક્તેઽત્ર પુષ્ટિહેત્વન્નભક્ષણે ॥ ૪૩॥

તપસા સ્વર્ગમેષ્યામીત્યાદૌ કર્ત્રાત્મતોચિતા ।
અનપેક્ષ્ય વપુર્ભોગં ચરેત્કૃચ્છ્રાદિકં તતઃ ॥ ૪૪॥

મોક્ષ્યેઽહમિત્યત્ર યુક્તં ચિદાત્મત્વં તદા પુમાન્ ।
તદ્વેત્તિ ગુરુશાસ્ત્રાભ્યાં ન તુ કિંચિચ્ચિકીર્ષતિ ॥ ૪૫॥

વિપ્રક્ષત્રાદયો યદ્વદ્બૃહસ્પતિસવાદિષુ ।
વ્યવસ્થિતાસ્તથા ગૌણમિથ્યામુખ્યા યથોચિતમ્ ॥ ૪૬॥

તત્ર તત્રોચિતે પ્રીતિરાત્મન્યેવાતિશાયિની ।
અનાત્મનિ તુ તચ્છેષે પ્રીતિરન્યત્ર નોભયમ્ ॥ ૪૭॥

ઉપેક્ષ્યં દ્વેષ્યમિત્યન્યત્ દ્વેધા માર્ગતૃણાદિકમ્ ।
ઉપેક્ષ્યં વ્યાઘ્રસર્પાદિ દ્વેષ્યમેવં ચતુર્વિધમ્ ॥ ૪૮॥

આત્મા શેષ ઉપેક્ષ્યં ચ દ્વેષ્યં ચેતિ ચતુર્ષ્વપિ ।
ન વ્યક્તિનિયમઃ કિન્તુ તત્તત્કાર્યાત્તથા તથા ॥ ૪૯॥

સ્યાદ્વ્યાઘ્રઃ સંમુખો દ્વેષ્યો હ્યુપેક્ષ્યસ્તુ પરાઙ્મુખઃ ।
લાલનાદનુકૂલશ્ચેદ્વિનોદાયેતિ શેષતામ્ ॥ ૫૦॥

વ્યક્તીનાં નિયમો મા ભૂલ્લક્ષણાત્તુવ્યવસ્થિતિઃ ।
આનુકૂલ્યં પ્રાતિકૂલ્યં દ્વયાભાવશ્ચ લક્ષણમ્ ॥ ૫૧॥

આત્મા પ્રેયાન્પ્રિયઃ શેષો દ્વેષ્યોપેક્ષ્યે તદન્યયોઃ ।
ઇતિ વ્યવસ્થિતો લોકો યાજ્ઞવલ્ક્યમતં ચ તત્ ॥ ૫૨॥

અન્યત્રાપિ શ્રુતિઃ પ્રાહ પુત્રાદ્વિત્તાત્તથાન્યતઃ ।
સર્વસ્માદાન્તરં તત્ત્વં તદેતત્પ્રેય ઈક્ષતામ્ ॥ ૫૩॥

શ્રૌત્યા વિચારદૃષ્ટ્યાયં સાક્ષ્યેવાત્મા ન ચેતરઃ ।
કોષાન્પઞ્ચ વિવિચ્યાન્તર્વસ્તુદૃષ્ટિર્વિચારણા ॥ ૫૪॥

જાગરસ્વપ્નસુપ્તીનામાગમાપાયભાસનમ્ ।
યતો ભવત્યસાવાત્મા સ્વપ્રકાશચિદાત્મકઃ ॥ ૫૫॥

શેષાઃ પ્રાણાદિવિત્તાન્તા આસન્નાસ્તારતમ્યતઃ ।
પ્રીતિસ્તથા તારતમ્યાત્તેષુ સર્વેષુ વીક્ષ્યતે ॥ ૫૬॥

વિત્તાત્પુત્રઃ પ્રિયઃ પુત્રાત્પિણ્ડઃ પિણ્ડાત્તથેન્દ્રિયમ્ ।
ઇન્દ્રિયાચ્ચ પ્રિયઃ પ્રાણઃ પ્રાણાદાત્મા પરઃ પ્રિયઃ ॥ ૫૭॥

એવં સ્થિતે વિવાદોઽત્ર પ્રતિબુદ્ધવિમૂઢયોઃ ।
શ્રુત્યોદાહારિ તત્રાત્મા પ્રેયાનિત્યેવ નિર્ણયઃ ॥ ૫૮॥

સાક્ષ્યેવ દૃશ્યાદન્યસ્માત્પ્રેયાનિત્યાહ તત્ત્વવિત્ ।
પ્રેયાન્પુત્રાદિરેવેમં ભોક્તું સાક્ષીતિ મૂઢધીઃ ॥ ૫૯॥

આત્મનોઽન્યં પ્રિયં બ્રૂતે શિષ્યશ્ચ પ્રતિવાદ્યપિ ।
તસ્યોત્તરં વાચો બોધશાપૌ કુર્યાત્તયોઃ ક્રમાત્ ॥ ૬૦॥

પ્રિયં ત્વાં રોત્સ્યતીત્યેવમુત્તરં વક્તિ તત્ત્વવિત્ ।
સ્વોક્તપ્રિયસ્ય દુષ્ટત્વં શિષ્યો વેત્તિ વિવેકતઃ ॥ ૬૧॥

અલભ્યમાનસ્તનયઃ પિતરૌ ક્લેશયેચ્ચિરમ્ ।
લબ્ધોઽપિ ગર્ભપાતેન પ્રસવેન ચ બાધતે ॥ ૬૨॥

જાતસ્ય ગ્રહરોગાદિ કુમારસ્ય ચ મૂકતા ।
ઉપનીતેઽપ્યવિદ્યત્વમનુદ્વાહશ્ચ પણ્ડિતે ॥ ૬૩॥

પુનશ્ચ પરદારાદિ દારિદ્ર્યં ચ કુટુમ્બિનઃ ।
પિત્રોઃ દુઃખસ્ય ન અસ્ત્યનતો ધની ચેન્મ્રિયતે તદા ॥ ૬૪॥

એવં વિવિચ્ય પુત્રાદૌ પ્રીતિં ત્યક્ત્વા નિજાત્મનિ ।
નિશ્ચિત્ય પરમાં પ્રીતિં વીક્ષતે તમહર્નિશમ્ ॥ ૬૫॥

આગ્રહાદ્બ્રહ્મવિદ્દ્વેષાદપિ પક્ષમમુઞ્ચતઃ ।
વાદિનો નરકઃ પ્રોક્તો દોષશ્ચ બહુયોનિષુ ॥ ૬૬॥

બ્રહ્મવિદ્બ્રહ્મરૂપત્વાદીશ્વરસ્તેન વર્ણિતમ્ ।
યદ્યત્તત્તત્તથૈવ સ્યાત્તચ્છિષ્યપ્રતિવાદિનોઃ ॥ ૬૭॥

યસ્તુ સાક્ષિણમાત્માનં સેવતે પ્રિયમુત્તમમ્ ।
તસ્ય પ્રેયાનસાવાત્મા ન નશ્યતિ કદાચન ॥ ૬૮॥

પરપ્રેમાસ્પદત્વેન પરમાનન્દરૂપતા ।
સુખવૃદ્ધિઃ પ્રીતિવૃદ્ધૌ સાર્વભૌમાદિષુ શ્રુતા ॥ ૬૯॥

ચૈતન્યવત્સુખં ચાસ્ય સ્વભાવશ્ચેચ્ચિદાત્મનઃ ।
ધીવૃત્તિષ્વનુવર્તેત સર્વાસ્વપિ ચિતિર્યથા ॥ ૭૦॥

મૈવમુષ્ણપ્રકાશાત્મા દીપસ્તસ્ય પ્રભા ગૃહે ।

વ્યાપ્નોતિ નોષ્ણતા તદ્વચ્ચિતેરેવાનુવર્તનમ્ ॥ ૭૧॥

ગન્ધરૂપરસસ્પર્શેષ્વપિ સત્સુ યથા પૃથક્ ।
એકાક્ષેણૈક એવાર્થો ગૃહ્યતે નેતરસ્તથા ॥ ૭૨॥

ચિદાનન્દૌ નૈવ ભિન્નૌ ગન્ધાદ્યાસ્તુ વિલક્ષણાઃ ।
ઇતિ ચેત્ તદભેદોઽપિ સાક્ષિણ્યન્યત્ર વા વદ ॥ ૭૩॥

આદ્યે ગન્ધાદયોઽપ્યેવમભિન્નાઃ પુષ્પવર્તિનઃ ।
અક્ષભેદેન તદ્ભેદે વૃત્તિભેદાત્તયોર્ભિદા ॥ ૭૪॥

સત્વવૃત્તૌ ચિત્સુખૈક્યં તદ્વૃત્તેર્નિર્મલત્વતઃ ।
રજોવૃત્તેસ્તુ માલિન્યાત્સુખાંશોઽત્ર તિરસ્કૃતઃ ॥ ૭૫॥

તિન્તિણીફલમત્યમ્લં લવણેન યુતં યદા ।
તદામ્લસ્ય તિરસ્કારાદીષદગ્રં યથા તથા ॥ ૭૬॥

નનુ પ્રિયતમત્વેન પરમાનન્દતાત્મનિ ।
વિવેક્તું શક્યતામેવં વિના યોગેન કિં ભવેત્ ॥ ૭૭॥

યદ્યોગેન તદેવૈતિ વદામો જ્ઞાનસિદ્ધયે ।
યોગઃ પ્રોક્તો વિવેકેન જ્ઞાનં કિં નોપજાયતે ॥ ૭૮॥

યત્ સાઙ્ખ્યૈઃ પ્રાપ્યતે સ્થાનં તદ્યોગૈરપિ ગમ્યતે ।
ઇતિ સ્મૃતં ફલૈકત્વં યોગિનાં ચ વિવેકિનામ્ ॥ ૭૯॥

અસાધ્યઃ કસ્યચિદ્યોગઃ કસ્યચિજ્જ્ઞાનનિશ્ચયઃ ।
ઇત્થં વિચાર્યમાર્ગૌ દ્વૌ જગાદ પરમેશ્વરઃ ॥ ૮૦॥

યોગે કોઽતિશયસ્તેઽત્ર જ્ઞાનમુક્તં સમં દ્વયોઃ ।
રાગદ્વેષાદ્યભાવશ્ચ તુલ્યો યોગિવિવેકિનોઃ ॥ ૮૧॥

ન પ્રીતિર્વિષયેષ્વસ્તિ પ્રેયાનાત્મેતિ જાનતઃ ।
કુતો રાગઃ કુતો દ્વેષઃ પ્રાતિકૂલ્યમપશ્યતઃ ॥ ૮૨॥

દેહાદેઃ પ્રતિકૂલેષુ દ્વેષસ્તુલ્યોદ્વયોરપિ ।
દ્વેષં કુર્વન્ન યોગી ચેદવિવેક્યપિ તાદૃશઃ ॥ ૮૩॥

દ્વૈતસ્ય પ્રતિભાનં તુ વ્યવહારે દ્વયોઃ સમમ્ ।
સમાધૌ નેતિ ચેત્તદ્વન્નાદ્વૈતત્વવિવેકિનઃ ॥ ૮૪॥

વિવક્ષ્યતે તદસ્માભિરદ્વૈતાનન્દનામકે ।
અધ્યાયે હિ તૃતીયે તત્સર્વમપ્યતિમઙ્ગલમ્ ॥ ૮૫॥

સદા પશ્યન્નિજાનન્દમપશ્યન્નખિલં જગત્ ।
અર્થાદ્યોગીતિ ચેત્તર્હિ સન્તુષ્ટો વર્ધતાં ભવાન્ ॥ ૮૬॥

બ્રહ્માનન્દભિધે ગ્રન્થે મન્દાનુગ્રહસિદ્ધયે ।
દ્વિતીયેઽધ્યાય એતસ્મિન્નાત્માનન્દો વિવેચિતઃ ॥ ૮૭॥

ઇતિ બ્રહ્માનન્દે આત્માનન્દઃ સમાપ્તઃ ॥ ૧૨॥

## ૧૩. બ્રહ્માનન્દેઽદ્વૈતાનન્દોનામ - ત્રયોદશઃ પરિચ્છેદઃ ।

યોગાનન્દઃ પુરોક્તો યઃ સ આત્માનન્દ ઇષ્યતામ્ ।
કથં બ્રહ્મત્વમેતસ્ય સદ્વયસ્યેતિ ચેચ્છૃણુ ॥ ૧॥

આકાશાદિ સ્વદેહાન્તં તૈત્તિરીયશ્રુતીરિતમ્ ।
જગન્નાસ્ત્યન્યદાનન્દાત્દદ્વૈતબ્રહ્મતા તતઃ ॥ ૨॥

આનન્દાદ્ધ્યેવ તજ્જાતં તિષ્ઠત્યાનન્દ એવ તત્ ।
આનન્દ એવ લીનં ચેત્યુક્તાનન્દાત્કથં પૃથક્ ॥ ૩॥

કુલાલાદ્ઘટ ઉત્પન્નો ભિન્નશ્ચેતિ ન શઙ્ક્યતામ્ ।
મૃદ્વદેષઃ ઉપાદાનં ન નિમિત્તં કુલાલવત્ ॥ ૪॥

સ્થિતિર્લયશ્ચ કુમ્ભસ્ય કુલાલે સ્તો ન હિ ક્વચિત્ ।
દૃષ્ટૌ તૌ મૃદિ તદ્વત્સ્યાદુપાદાનં તયોઃ શ્રુતેઃ ॥ ૫॥

ઉપાદાનં ત્રિધા ભિન્નં વિવર્તિ પરિણામિ ચ ।
આરમ્ભકં ચ તત્રાન્ત્યૌ ન નિરંશેઽવકાશિનૌ ॥ ૬॥

આરમ્ભવાદિનોઽન્યસ્માદન્યસ્યોત્પત્તિમૂચિરે ।
તન્તોઃ પટસ્ય નિષ્પત્તેર્ભિન્નૌ તન્તુપટૌ ખલુ ॥ ૭॥

અવસ્થાન્તરતાપત્તિરેકસ્ય પરિણામિતા ।
સ્યાત્ ક્ષીરં દધિ મૃત્કુમ્ભઃ સુવર્ણં કુણ્ડલં યથા ॥ ૮॥

અવસ્થાન્તરભાનં તુ વિવર્તો રજ્જુસર્પવત્ ।
નિરંશેઽપ્યસ્ત્યસૌ વ્યોમ્નિ તલમાલિન્યકલ્પનાત્ ॥ ૯॥

તતો નિરંશ આનન્દે વિવર્તો જગદિષ્યતામ્ ।
માયાશક્તિઃ કલ્પિકા સ્યાદૈન્દ્ર જાલિકશક્તિવત્ ॥ ૧૦॥

શક્તિઃ શક્તાત્પૃથઙ્નાસ્તિ તદ્વદ્દૃષ્ટેર્ન ચાભિદા ।
પ્રતિબન્ધસ્ય દૃષ્ટત્વાચ્છક્ત્યભાવે તુ કસ્ય સઃ ॥ ૧૧॥

શક્તેઃ કાર્યાનુમેયત્વાદકાર્યે પ્રતિબન્ધનમ્ ।
જ્વલતોઽગ્નેરદાહે સ્યાન્મન્ત્રાદિ પ્રતિબન્ધતા ॥ ૧૨॥

દેવાત્મશક્તિં સ્વગુણૈર્નિગૂઢાં મુનયોઽવિદન્ ।
પરાસ્ય શક્તિર્વિવિધા ક્રિયાજ્ઞાનબલાત્મિકા ॥ ૧૩॥

ઇતિ વેદવચઃ પ્રાહ વસિષ્ઠશ્ચ તથાબ્રવીત્ ।
સર્વશક્તિપરં બ્રહ્મ નિત્યમાપૂર્ણમદ્વયમ્ ॥ ૧૪॥

યથોલ્લસતિ શક્ત્યાસૌ પ્રકાશમધિગચ્છતિ ।
ચિચ્છક્તિર્બ્રહ્મણો રામ! શરીરેષૂપલભ્યતે ॥ ૧૫॥

સ્પન્દશક્તિશ્ચ વાતેષુ દાર્ઢ્યશક્તિસ્તથોપલે ।
દ્રવશક્તિસ્તથામ્ભઃસુ દાહશક્તિસ્તથાનલે ।
શૂન્યશક્તિસ્તથાકાશે નાશશક્તિર્વિનાશિનિ ॥ ૧૬॥

યથાણ્ડાન્તર્મહાસર્પો જગદસ્તિ તથાત્મનિ ।
ફલપત્રલતાપુષ્પશાખાવિટપમૂલવાન્ ।
વૃક્ષબીજે યથા વૃક્ષસ્તથેદં બ્રહ્મણિ સ્થિતમ્ ॥ ૧૭॥

ક્વચિત્કશ્ચિત્કદાચિચ્ચ તસ્માદુધન્તિ શક્તયઃ ।
દેશકાલવિચિત્રત્વાત્ક્ષ્માતલાદિવ શાલયઃ ॥ ૧૮॥

સ આત્મા સર્વગો રામ! નિત્યોદિતમહાવપુઃ ।
યન્મનાઙ્મનનીં શક્તિં ધત્તે તન્મન ઉચ્યતે ॥ ૧૯॥

આદૌ મનસ્તદનુબન્ધવિમોક્ષદૃષ્ટી
    પશ્ચાત્પ્રપઞ્ચરચના ભુવનાભિધાના ।
ઇત્યાદિકા સ્થિતિરિયં હિ ગતા પ્રતિષ્ઠા-
    માખ્યાયિકા સુભગબાલજનોદિતેવ ॥ ૨૦॥

બાલસ્ય હિ વિનોદાય ધાત્રી શક્તિ શુભાં કથામ્ ।
ક્વચિત્સન્તિ મહાબાહો! રાજપુત્રાસ્ત્રયઃ શુભાઃ ॥ ૨૧॥

દ્વૌ ન જાતૌ તથૈકસ્તુ ગર્ભ એવ હિ ન સ્થિતઃ ।
વસન્તિ તે ધર્મયુતા અત્યન્તાસતિ પત્તને ॥ ૨૨ ॥

સ્વકીયાચ્છૂન્યનગરાન્નિર્ગત્ય વિમલાશયાઃ ।
ગચ્છન્તો ગગને વૃક્ષાન્દદૃશુઃ ફલશાલિનઃ ॥ ૨૩ ॥

ભવિષ્યન્નગરે તત્ર રાજપુત્રાસ્ત્રયોઽપિ તે ।
સુખમદ્ય સ્થિતા પુત્ર! મૃગયાવ્યવહારિણઃ ॥ ૨૪ ॥

ધાત્ર્યૈવં કથિતા રામ! બાલકાખ્યાયિકા શુભા ।
નિશ્ચયં સ યયૌ બાલો નિર્વિચારણયા ધિયા ॥ ૨૫ ॥

ઇયં સંસાર રચના વિચારોજ્ઝિતચેતસામ્ ।
બાલકાખ્યાયિકેવેત્થમવસ્થિતિમુપાગતા ॥ ૨૬ ॥

ઇત્યાદિભિરુપાખ્યાનૈર્માયાશક્તેસ્તુ વિસ્તરમ્ ।
વસિષ્ઠઃ કથયામાસ સૈવ શક્તિર્નિરૂપ્યતે ॥ ૨૭ ॥

કાર્યાદાશ્રયતઃ સૈષા ભવેચ્છક્તિર્વિલક્ષણા ।
સ્ફોટાઙ્ગારૌ દૃશ્યમાનૌ શક્તિસ્તત્રાનુમીયતે ॥ ૨૮ ॥

પૃથુબુધ્નોદરાકારો ઘટઃ કાર્યોઽત્ર મૃત્તિકા ।
શબ્દાદિભિઃ પઞ્ચગુણૈર્યુક્તા શક્તિસ્ત્વતદ્વિધા ॥ ૨૯ ॥

ન પૃથ્વાદિર્ન શબ્દાદિઃ શક્તાવસ્તુ યથા તથા ।
અત એવ હ્યચિન્ત્યૈષા ન નિર્વચનમર્હતિ ॥ ૩૦ ॥

કાર્યોત્પત્તેઃ પુરા શક્તિર્નિગૂઢા મૃદ્યવસ્થિતા ।
કુલાલાદિસહાયેન વિકારાકારતાં વ્રજેત્ ॥ ૩૧ ॥

પૃથ્વ્યાદિ વિકારાન્તં સ્પર્શાદિગુણમૃત્તિકામ્ ।
એકીકૃત્ય ઘટં પ્રાહુર્વિચારવિકલા જનાઃ ॥ ૩૨ ॥

કુલાલવ્યાપૃતેઃ પૂર્વો યાવાનંશ સ નો ઘટઃ ।
પશ્ચાત્તુ પૃથુબુધ્નાદિમત્ત્વે યુક્તા હિ કુમ્ભતા ॥ ૩૩ ॥

સ ઘટો ન મૃદો ભિન્નો વિયોગે સત્યનીક્ષણાત્ ।
નાપ્યભિન્નઃ પુરા પિણ્ડદશાયામનવેક્ષણાત્ ॥ ૩૪ ॥

અતોઽનિર્વચનીયોઽયં શક્તિવત્તેન શક્તિજઃ ।
અવ્યક્તત્વે શક્તિરુક્તા વ્યક્તત્વે ઘટનામભૃત્ ॥ ૩૫ ॥

ઐન્દ્રજાલિકનિષ્ઠાપિ માયા ન વ્યજ્યતે પુરા ।
પશ્ચાદ્ગન્ધર્વસેનાદિરૂપેણ વ્યક્તિમાપ્નુયાત્ ॥ ૩૬॥

એવં માયામયત્વેન વિકારસ્યાનૃતાત્મતામ્ ।
વિકારાધારમૃદ્વસ્તુસત્યત્વં ચાબ્રવીચ્છ્રુતિઃ ॥ ૩૭॥

વાઙ્નિષ્પાદ્યં નામમાત્રં વિકારો નાસ્ય સત્યતા ।
સ્પર્શાદિ ગુણયુક્તા તુ સત્યા કેવલમૃત્તિકા ॥ ૩૮॥

વ્યક્તાવ્યક્તે તદાધાર ઇતિ ત્રિષ્વાદ્યયોર્દ્વયોઃ ।
પર્યાયઃ કાલભેદેન તૃતીયસ્ત્વનુગચ્છતિ ॥ ૩૯॥

નિસ્તત્ત્વં ભાસમાનં ચ વ્યક્તમુત્પત્તિનાશભાક્ ।
તદુત્પત્તૌ તસ્ય નામ વાચા નિષ્પાદ્યતે નૃભિઃ ॥ ૪૦॥

વ્યક્તે નષ્ટેઽપિ નામૈતન્નૃવક્ત્રેષ્વનુવર્તતે ।
તેન નામ્ના નિરૂપ્યત્વાદ્વ્યક્તં તદ્રૂપમુચ્યતે ॥ ૪૧॥

નિસ્તત્ત્વત્વાદ્વિનાશિત્વાદ્વાચારમ્ભણનામતઃ ।
વ્યક્તસ્ય ન તુ તદ્રૂપં સત્યં કિઞ્ચિન્મૃદાદિવત્ ॥ ૪૨॥

વ્યક્તકાલે તતઃ પૂર્વમૂર્ધ્વમપ્યેકરૂપભાક્ ।
સતત્ત્વમવિનાશં ચ સત્યં મૃદ્વસ્તુ કથ્યતે ॥ ૪૩॥

વ્યક્તં ઘટો વિકારશ્ચેત્યેતૈર્નામભિરીરિતઃ ।
અર્થશ્ચેદનૃતઃ કસ્માન્ન મૃદ્બોધે નિવર્તતે ॥ ૪૪॥

નિવૃત્ત એવ યસ્માત્તે તત્સત્યત્વમતિર્ગતા ।
ઈદૃઙ્નિવૃત્તિરેવાત્ર બોધજા ન ત્વભાસનમ્ ॥ ૪૫॥

પુમાનધોમુખઃ નીરે ભાતોઽપ્યસ્તિ ન વસ્તુતઃ ।
તટસ્થમર્ત્યવત્તસ્મિન્નૈવાસ્થા કસ્યચિત્ક્વચિત્ ।
ઈદૃગ્બોધે પુમર્થત્વં મતમદ્વૈતવાદિનામ્ ॥ ૪૬
મૃદ્રૂપસ્યાપરિત્યાગાદ્વિવર્તત્વં ઘટે સ્થિતમ્ ।
પરિણામે પૂર્વરૂપં ત્યજેત્તત્ક્ષીરરૂપવત્ ।
મૃત્સુવર્ણે નિવર્તેતે ઘટકુણ્ડલયોર્ન હિ ॥ ૪૭॥

ઘટે નષ્ટે ન મૃદ્ભાવઃ કપાલાનામવેક્ષણાત્ ।

મૈવં ચૂર્ણેઽસ્તિ મૃદ્રૂપં સ્વર્ણરૂપં ત્વતિસ્ફુટમ્ ॥ ૪૮॥

ક્ષીરાદૌ પરિણામોઽસ્તુ પુનસ્તદ્ભાવવર્જનાત્ ।
એતાવતા મૃદાદીનાં દૃષ્ટાન્તત્વં ન હીયતે ॥ ૪૯॥

આરમ્ભવાદિનઃ કાર્યે મૃદો દ્વૈગુણ્યમાપતેત્ ।
રૂપસ્પર્શાદયઃ પ્રોક્તાઃ કાર્ય કારણયોઃ પૃથક્ ॥ ૫૦॥

મૃત્સુવર્ણમયશ્ચેતિ દૃષ્ટાન્તત્રયમારુણિઃ ।
પ્રાહાતો વાસયેત્કાર્યાનૃતત્વં સર્વવસ્તુષુ ॥ ૫૧॥

કારણજ્ઞાનતઃ કાર્યવિજ્ઞાનં ચાપિ સોઽવદત્ ।
સત્યજ્ઞાનેઽનૃતજ્ઞાં કથમત્રોપપદ્યતે ॥ ૫૨॥

સમૃત્કસ્ય વિકારસ્ય કાર્યતા લોકદૃષ્ટિતઃ ।
વાસ્તવોઽત્ર મૃદંશોઽસ્ય બોધઃ કારણબોધતઃ ॥ ૫૩॥

અનૃતાંશો ન બોદ્ધવ્યસ્તદ્બોધાનુપયોગતઃ ।
તત્ત્વજ્ઞાનં પુમર્થં સ્યાન્નાનૃત અંશાવબોધનમ્ ॥ ૫૪॥

તર્હિ કારણવિજ્ઞાનાત્કર્યજ્ઞામિતીરિતે ।
મૃદ્બોધાન્મૃત્તિકા બુદ્ધેત્યુક્તં સ્યાત્કોઽત્ર વિસ્મયઃ ॥ ૫૫॥

સત્યં કાર્યેષુ વસ્ત્વંશઃ કારણાત્મેતિ જાનતઃ ।
વિસ્મયો માસ્ત્વિહાજ્ઞસ્ય વિસ્મયઃ કેન વાર્યતે ॥ ૫૬॥

આરમ્ભી પરિણામી ચ લૌકિકશ્ચૈકકારણે ।
જ્ઞાતે સર્વમતં શ્રુત્વા પ્રાપ્નુવન્ત્યેવ વિસ્મયમ્ ॥ ૫૭॥

અદ્વૈતેઽભિમુખીકર્તુમેવાત્રૈકસ્ય બોધતઃ ।
સર્વબોધઃ શ્રુતૌ નૈવ નાનાત્વસ્ય વિવક્ષયા ॥ ૫૮॥

એકમૃત્પિણ્ડવિજ્ઞાનાત્સર્વમૃણ્મયધીર્યથા ।
તથૈકબ્રહ્મબોધેન જગદ્બુદ્ધિર્વિભાવ્યતામ્ ॥ ૫૯॥

સચ્ચિત્સુખાત્મકં બ્રહ્મ નામરૂપાત્મકં જગત્ ।
તાપનીયે શ્રુતં બ્રહ્મ સચ્ચિદાનન્દલક્ષણમ્ ॥ ૬૦॥

સદ્રૂપમારુણિઃ પ્રાહ પ્રજ્ઞાનં બ્રહ્મ બહ્વૃચાઃ ।
સનત્કુમાર આનન્દમેવમન્યત્ર ગમ્યતામ્ ॥ ૬૧॥

વિચિન્ત્ય સર્વરૂપાણિ કૃત્વા નામાનિ તિષ્ઠતિ ।
અહં વ્યાકરવાણીમે નામરૂપે ઇતિ શ્રુતિઃ ॥ ૬૨॥

અવ્યાકૃતં પુરા સૃષ્ટેરૂર્ધ્વં વ્યાક્રીયતે દ્વિધા ।
અચિન્ત્યશક્તિર્માયૈષા બ્રહ્મણ્યવ્યાકૃતાભિધા ॥ ૬૩॥

અવિક્રિયબ્રહ્મનિષ્ઠા વિકારં યાત્યનેકધા ।
માયાં તુ પ્રકૃતિં વિદ્યાન્માયિનં તુ મહેશ્વરમ્ ॥ ૬૪॥

આદ્યો વિકાર આકાશઃ સોઽસ્તિ ભાત્યપિ ચ પ્રિયઃ ।
અવકાશસ્તસ્ય રૂપં તન્મિથ્યા ન તુ તત્ત્રયમ્ ॥ ૬૫॥

ન વ્યક્તેઃ પૂર્વમસ્ત્યેવ ન પશ્ચાચ્ચ વિનાશતઃ ।
આદાવન્તે ચ યન્નાસ્તિ વર્તમાનેઽપિ તત્તથા ॥ ૬૬॥

અવ્યક્તાદીનિ ભૂતાનિ વ્યક્તમધ્યાનિ ભારત ।
અવ્યક્તનિધનાનીવેત્યાહ કૃષ્ણોઽર્જુનં પ્રતિ ॥ ૬૭॥

મૃદ્વત્તે સચ્ચિદાનન્દા અનુગચ્છન્તિ સર્વદ ।
નિરાકાશે સદાદીનામનુભૂતિર્નિજાત્મનિ ॥ ૬૮॥

અવકાશે વિસ્મૃતેઽથ તત્ર કિં ભાતિ તે વદ ।
શૂન્યમેવેતિ ચેદસ્તુ નામ તાદૃગ્વિભાતિ હિ ॥ ૬૯॥

તાદૃક્ત્વાદેવ તત્સત્ત્વમૌદાસીન્યેન તત્સુખમ્ ।
આનુકૂલ્યપ્રાતિકૂલ્યહીનં યત્તન્નિજં સુખમ્ ॥ ૭૦॥

આનુકૂલ્યે હર્ષધીઃ સ્યાત્પ્રાતિકૂલ્યે તુ દુઃખધીઃ ।
દ્વયાભાવે નિજાનન્દો નિજં દુઃખં તુ ન ક્વચિત્ ॥ ૭૧॥

નિજાનન્દે સ્થિતે હર્ષશોકયોર્વ્યત્યયઃ ક્ષણાત્ ।
મનસઃ ક્ષણિકત્વેન તયોર્માનસતેષ્યતામ્ ॥ ૭૨॥

આકાશેઽપ્યેવમાનન્દઃ સત્તાભાને તુ સંમતે ।
વાય્વાદિદેહપર્યન્તવસ્તુષ્વેવં વિભાવ્યતામ્ ॥ ૭૩॥

ગતિસ્પર્શૌ વાયુરૂપં વહ્નેર્દાહપ્રકાશને ।
જલસ્ય દ્રવતા ભૂમેઃ કાઠિન્યં ચેતિ નિર્ણયઃ ॥ ૭૪॥

અસાધારણ આકાશે ઓષધ્યન્નવપુઃષ્વપિ ।
એવં વિભાવ્ય મનસા તત્તદ્રૂપં યથોચિતમ્ ॥ ૭૫॥

અનેકધા વિભિન્નેષુ નામરૂપેષુ ચૈકધા ।
તિષ્ઠન્તિ સચ્ચિદાનન્દાવિસંવાદઃ ન કસ્યચિત્ ॥ ૭૬॥

નિસ્તત્ત્વે નામરૂપે દ્વે જન્મનાશયુતે ચ તે ।
બુદ્ધ્યા બ્રહ્મણિ વીક્ષસ્વ સમુદ્રે બુદ્બુદાદિવત્ ॥ ૭૭॥

સચ્ચિદાનન્દરૂપેઽસ્મિન્ પૂર્ણે બ્રહ્મણિ વીક્ષિતે ।
સ્વયમેવાવજાનાતિ નામરૂપે શનૈઃ શનૈઃ ॥ ૭૮॥

યાવદ્યાવદવજ્ઞા સ્યાત્તાવત્તાવત્તદીક્ષણમ્ ।
યાવદ્યાવદ્વીક્ષ્યતે તત્તાવત્તાવદુભે ત્યજેત્ ॥ ૭૯॥

તદભ્યાસેન વિદ્યાયાં સુસ્થિતાયામયં પુમાન્ ।
જીવન્નેવ ભવેન્મુક્તો વપુરસ્તુ યથા તથા ॥ ૮૦॥

તચ્ચિન્તનં તત્કથનમન્યોન્યં તત્પ્રબોધનમ્ ।
એતદેકપરત્વં ચ તદભ્યાસં વિદુર્બુધાઃ ॥ ૮૧॥

વાસનાનેકકાલિના દીર્ઘકાલં નિરન્તરમ્ ।
સાદરં ચાભ્યસ્યમાને સર્વથૈવ નિવર્તતે ॥ ૮૨॥

મૃચ્છક્તિવદ્બ્રહ્મશક્તિરનેકાનનૃતાન્સૃજેત્ ।
યદ્વા જીવગતા નિદ્રા સ્વપ્નશ્ચાત્ર નિદર્શનમ્ ॥ ૮૩॥

નિદ્રાશક્તિર્યથા જીવે દુર્ઘટસ્વપ્નકારિણી ।
બ્રહ્મણ્યેષા તથા માયા સૃષ્ટિસ્થિત્યન્તકારિણી ॥ ૮૪॥

સ્વપ્ને વિયદ્ગતિં પશ્યેત્સ્વમૂર્ધચ્છેદનં યથા ।
મુહૂર્તે વત્સરૌઘં ચ મૃતં પુત્રાદિકં પુનઃ ॥ ૮૫॥

ઇદં યુક્તમિદં નેતિ વ્યવસ્થા તત્ર દુર્લભા ।
યથા યથેક્ષ્યતે યદ્યત્તત્તદ્યુક્તં તથા તથા ॥ ૮૬॥

ઈદૃશો મહિમા દૃષ્ટો નિદ્રાશક્તેર્યદા તદા ।
માયાશક્તેરચિન્ત્યોઽયં મહિમેતિ કિમદ્ભુતમ્ ॥ ૮૭॥

શયાને પુરુષે નિદ્રા સ્વપ્નં બહુવિધં સૃજેત્ ।
બ્રહ્મણ્યેવં નિર્વિકારે વિકારાન્કલ્પયત્યસૌ ॥ ૮૮॥

ખાનિલાગ્નિજલોર્વ્યણ્ડલોકપ્રાણિશિલાદિકાઃ ।

વિકારાઃ પ્રાણિધીષ્વન્તશ્ચિચ્છાયા પ્રતિબિમ્બતિ ॥ ૮૯॥

ચેતનાચેતનેષ્વેષુ સચ્ચિદાનન્દલક્ષણમ્ ।
સમાનં બ્રહ્મ ભિદ્યેતે નામરૂપે પૃથક્પૃથક્ ॥ ૯૦॥

બ્રહ્મણ્યેતે નામરૂપે પટે ચિત્રમિવ સ્થિતે ।
ઉપેક્ષ્ય નામરૂપે દ્વે સચ્ચિદાનન્દધીર્ભવેત્ ॥ ૯૧॥

જલસ્થેઽધોમુખે સ્વસ્ય દેહે દૃષ્ટેઽપ્યુપેક્ષ્ય તમ્ ।
તીરસ્થ એવ દેહે સ્વે તાત્પર્યં સ્યાદ્યથા તથા ॥ ૯૨॥

સહસ્રશો મનોરાજ્યે વર્તમાને સદૈવ તત્ ।
સર્વૈરુપેક્ષ્યતે તદ્વદુપેક્ષા નામરૂપયોઃ ॥ ૯૩॥

ક્ષણે ક્ષણે મનોરાજ્યં ભવત્યેવાન્યથાન્યથા ।
ગતં ગતં પુનર્નાસ્તિ વ્યવહારો બહિસ્તથા ॥ ૯૪॥

ન બાલ્યં યૌવને લભ્યં યૌવનં સ્થવિરે તથા ।
મૃતઃ પિતા પુનર્નાસ્તિ નાયાત્યેવ ગતં દિનમ્ ॥ ૯૫॥

મનોરાજ્યાદ્વિશેષઃ કઃ ક્ષણધ્વંસિનિ લૌકિકે ।
અતોઽસ્મિન્ભાસમાનેઽપિ તત્સત્યત્વધિયં ત્યજેત્ ॥ ૯૬॥

ઉપેક્ષિતે લૌકિકે ધીર્નિર્વિઘ્ના બ્રહ્મચિન્તને ।
નટવત્કૃત્રિમાસ્થાયાં નિર્વહત્યેવ લૌકિકમ્ ॥ ૯૭॥

પ્રવહત્યપિ નીરેઽધઃ સ્થિરા પ્રૌઢ શિલા યથા ।
નામરૂપાન્યથાત્વેઽપિ કૂટસ્થં બ્રહ્મ નાન્યથા ॥ ૯૮॥

નિષ્છિદ્રે દર્પણે ભાતિ વસ્તુગર્ભં બૃહદ્વિયત્ ।
સચ્ચિત્ઘને તથા નાનાજગદ્ગર્ભમિદં વિયત્ ॥ ૯૯॥

અદૃષ્ટ્વા દર્પણં નૈવ તદન્તસ્થે ક્ષણં યથા ।
અમત્વા સચ્ચિદાનન્દં નામરૂપમતિઃ કુતઃ ॥ ૧૦૦॥

પ્રથમં સચ્ચિદાનન્દે ભાસમાનેઽથ તાવતા ।
બુદ્ધિં નિયમ્ય નૈવોર્ધ્વં ધારયેન્નામરૂપયોઃ ॥ ૧૦૧॥

એવં ચ નિર્જગદ્બ્રહ્મ સચ્ચિદાનન્દલક્ષણમ્ ।
અદ્વૈતાનન્દ એતસ્મિન્વિશ્રામ્યન્તુ જનાશ્ચિરમ્ ॥ ૧૦૨॥

બ્રહ્માનન્દાભિધે ગ્રન્થે તૃતીયેઽધ્યાય ઈરિતઃ ।
અદ્વૈતાનન્દ એવ સ્યાજ્જગન્મિથ્યાત્વચિન્તયા ॥ ૧૦૩॥

ઇતિ બ્રહ્માનન્દેઽદ્વૈતાનન્દઃ સમાપ્તઃ ॥ ૧૩॥

## ૧૪. બ્રહ્માનન્દે વિદ્યાનન્દોનામ - ચતુર્દશઃ પરિચ્છેદઃ ।

યોગેનાત્મવિવેકેન દ્વૈતમિથ્યાત્વચિન્તયા ।
બ્રહ્માનન્દં પશ્યતોઽથ વિદ્યાનન્દો નિરૂપ્યતે ॥ ૧॥

વિષયાનન્દવદ્વિદ્યાનન્દોધીવૃત્તિરૂપકઃ ।
દુઃખાભાવાદિરૂપેણ પ્રોક્ત એષ ચતુર્વિધઃ ॥ ૨॥

દુઃખાભાવશ્ચ કામાપ્તિઃ કૃતકૃત્યોઽહમિત્યસૌ ।
પ્રાપ્તપ્રાપ્યોઽહમિત્યેવં ચાતુર્વિધ્યમુદાહૃતમ્ ॥ ૩॥

ઐહિકં ચ આમુષ્મિકં ચેત્યેવં દુઃખં દ્વિધેરિતમ્ ।
નિવૃત્તિમૈહિકસ્યાહ બૃહદારણ્યકં વચઃ ॥ ૪॥

આત્માનં ચેદ્વિજાનીયાદયમસ્મીતિ પૂરુષઃ ।
કિમિચ્છન્કસ્ય કામાય શરીરમનુસંજ્વરેત્ ॥ ૫॥

જીવાત્મા પરમાત્મા ચેત્યાત્મા દ્વિવિધ ઈરિતઃ ।
ચિત્તાદાત્મ્યાત્ત્રિભિર્દેહૈર્જીવઃ સન્ભોક્તૃતાં વ્રજેત્ ॥ ૬॥

પરમાત્મા સચ્ચિદાનન્દસ્તાદાત્મ્યં નામરૂપયોઃ ।
ગત્વા ભોગ્યત્વમાપન્નસ્તદ્વિવેકે તુ નોભયમ્ ॥ ૭॥

ભોગ્યમિચ્છન્ભોક્તુરર્થે શરીરમનુસંજ્વરેત્ ।
જ્વરાસ્ત્રિષુ શરીરેષુ સ્થિતા ન ત્વાત્મનો જ્વરાઃ ॥ ૮॥

વ્યાધયો ધાતુવૈષમ્યે સ્થૂલદેહે સ્થિતા જ્વરાઃ ।
કામક્રોધાદયઃ સૂક્ષ્મે દ્વયોર્બીજં તુ કારણે ॥ ૯॥

અદ્વૈતાનન્દમાર્ગેણ પરાત્મનિ વિવેચિતે ।
અપશ્યન્વાસ્તવં ભોગ્યં કિં નામેચ્છેત્પરાત્મવિત્ ॥ ૧૦॥

આત્માનન્દોક્તરીત્યાસ્મિન્જીવાત્મન્યવધારિતે ।
ભોક્તા નૈવાસ્તિ કોઽપ્યત્ર શરીરાનુજ્વરઃ કુતઃ ॥ ૧૧॥

પુણ્યપાપદ્વયે ચિન્તા દુઃખમામુષ્મિકં ભવેત્ ।
પ્રથમાધ્યાય એવોક્તં ચિન્તા નૈનં તપેદિતિ ॥ ૧૨॥

યથા પુષ્કરપર્ણેઽસ્મિન્નપામશ્લેષણં તથા ।
વેદનાદૂર્ધ્વમાગામિકર્મણોઽશ્લેષણં બુધે ॥ ૧૩॥

ઇષીકાતૃણતૂલસ્ય વહ્નિદાહઃ ક્ષણાદ્યથા ।
તથા સઞ્ચિતકર્માસ્ય દગ્ધં ભવતિ વેદનાત્ ॥ ૧૪॥

યથૈધાંસિ સમિદ્ધોઽગ્નિર્ભસ્મસાત્કુરુતેઽર્જુન ।
જ્ઞાનાગ્નિઃ સર્વકર્માણિ ભસ્મસાત્કુરુતે તથા ॥ ૧૫॥

યસ્ય નાહંકૃતો ભાવો બુદ્ધિર્યસ્ય ન લિપ્યતે ।
હત્વાપિ સ ઇમાં લોકાન્ન હન્તિ ન નિબધ્યતે ॥ ૧૬॥

માતાપિત્રોર્વધઃ સ્તેયં ભ્રૂણહત્યાન્યદીદૃશમ્ ।
ન મુક્તિં નાશયેત્પાપં મુખકાન્તિર્ન નશ્યતિ ॥ ૧૭॥

દુઃખાભાવવદેવાસ્ય સર્વકામાપ્તિરીરિતા ।
સર્વાન્કામાનસાવાપ્ય હ્યમૃતો ભવદિત્યતઃ ॥ ૧૮॥

જક્ષન્ક્રીડન્રતિં પ્રાપ્તઃ સ્ત્રીભિર્યાનૈસ્તથેતરૈઃ ।
શરીરં ન સ્મરેત્પ્રાણં કર્મણા જીવયેદમુમ્ ॥ ૧૯॥

સર્વાન્કામાન્સહાપ્નોતિ નાન્યવજ્જન્મકર્મભિઃ ।
વર્તન્તે શ્રોત્રિયે ભોગા યુગપત્ક્રમવર્જિતાઃ ॥ ૨૦॥

યુવા રૂપી ચ વિદ્યાવાન્નીરોગો દૃઢચિત્તવાન્ ।
સૈન્યોપેતઃ સર્વપૃથ્વીં વિત્તપૂર્ણાં પ્રપાલયન્ ॥ ૨૧॥

સર્વૈર્માનુષ્યકૈર્ભોગૈઃ સમ્પન્નસ્તૃપ્તભૂમિપઃ ।
યમાનન્દમવાપ્નોતિ બ્રહ્મવિચ્ચ તમશ્નુતે ॥ ૨૨॥

મર્ત્યભોગે દ્વયોર્નાસ્તિ કામસ્તૃપ્તિરતઃ સમા ।
ભોગાન્નિષ્કામતૈકસ્ય પરસ્યાપિ વિવેકતઃ ॥ ૨૩॥

શ્રોત્રિયત્વાદ્વેદશાસ્ત્રૈર્ભોગ્યદોષાનવેક્ષતે ।
રાજા બૃહદ્રથો દોષાંસ્તાન્ગાથાભિરુદાહરત્ ॥ ૨૪॥

દેહદોષાશ્ચિત્તદોષા ભોગ્યદોષા અનેકશઃ ।
શુના વાન્તે પાયસે નો કામસ્તદ્વદ્વિવેકિનઃ ॥ ૨૫॥

નિષ્કામત્વે સમેઽપ્યત્ર રાજ્ઞઃ સાધન સઞ્ચયે ।
દુઃખમાસીદ્ભાવિનાશાદિતિભીરનુવર્તતે ॥ ૨૬॥

નોભયં શ્રોત્રિયસ્યાતસ્તદાનન્દોઽધિકોઽન્યતઃ ।
ગન્ધર્વાનન્દ આશાસ્તિ રાજ્ઞો નાસ્તિ વિવેકિનઃ ॥ ૨૭॥

અસ્મિન્કલ્પે મનુષ્યઃ સન્પુણ્યપાપવિશેષતઃ ।
ગન્ધર્વત્વં સમાપન્નો મર્ત્યો ગન્ધર્વ ઉચ્યતે ॥ ૨૮॥

પૂર્વકલ્પે કૃતાત્પુણ્યાત્કલ્પાદાવેવ ચેદ્ભવેત્ ।
ગન્ધર્વત્વં તાદૃષોઽત્ર દેવગન્ધર્વ ઉચ્યતે ॥ ૨૯॥

અગ્નિષ્વાત્તાદયો લોકે પિતરશ્ચિરવાસિનઃ ।
કલ્પાદાવેવ દેવત્વં ગતા આજાનદેવતાઃ ॥ ૩૦॥

અસ્મિન્કલ્પેઽશ્વમેધાદિ કર્મ કૃત્વા મહત્પદમ્ ।
અવાપ્યાજાનદેવૈર્યાઃ પૂજ્યાસ્તાઃ કર્મદેવતાઃ ॥ ૩૧॥

યમાગ્નિમુખ્યાઃ દેવાઃ સ્યુર્જાતાવિન્દ્રબૃહસ્પતી ।
પ્રજાપતિર્વિરાટ્ પ્રોક્તો બ્રહ્મા સૂત્રાત્મનામકઃ ॥ ૩૨॥

સાર્વભૌમાદિસૂત્રાન્તા ઉત્તરોત્તરકામિનઃ ।
અવાઙ્મનસગમ્યોઽયમાત્માનન્દસ્તતઃ પરઃ ॥ ૩૩॥

તૈઃસ્તૈઃ કામ્યેષુ સર્વેષુ સુખેષુ શ્રોત્રિયો યતઃ ।
નિસ્પૃહસ્તેન સર્વેષામાનન્દાઃ સન્તિ તસ્ય તે ॥ ૩૪॥

સર્વકામાપ્તિરેષોક્તા યદ્વા સાક્ષિ ચિદાત્મતા ।
સ્વદેહવત્સર્વદેહેષ્વપિ ભોગાનવેક્ષતે ॥ ૩૫॥

અજ્ઞસ્યાપ્યેતદસ્ત્યેવ ન તુ તૃપ્તિરબોધતઃ ।
યો વેદ સોઽશ્નુતે સર્વાન્કામાનિતિયબ્રવીચ્છ્રુતિઃ ॥ ૩૬॥

યદ્વા સર્વાત્મતા સ્વસ્ય સામ્ના ગાયતિ સર્વદા ।
અહમન્નં તથાન્નાદશ્ચેતિ સામસ્વધીયતે ॥ ૩૭॥

દુઃખાભાવશ્ચ કામાપ્તિરુભે હ્યેવં નિરૂપિતે ।
કૃતકૃત્યત્વમન્યચ્ચ પ્રાપ્તપ્રાપ્યત્વમીક્ષ્યતામ્ ॥ ૩૮॥

ઉભયં તૃપ્તિદીપે હિ સમ્યગસ્માભિરીરિતમ્ ।

ત એવાત્રાનુસન્ધેયાઃ શ્લોકા બુદ્ધિવિશુદ્ધયે ॥ ૩૯॥

ઐહિકામુષ્મિકવ્રાતસિદ્ધ્યૈ મુક્તેશ્ચ સિદ્ધયે ।
બહુ કૃત્યં પુરાસ્યાભૂત્તત્સર્વમધુના કૃતમ્ ॥ ૪૦॥

તદેતત્કૃતકૃત્યત્વં પ્રતિયોગિપુરઃસરમ્ ।
અનુસન્દધદેવાયમેવં તૃપ્યતિ નિત્યશઃ ॥ ૪૧॥

દુઃખિનોઽજ્ઞાઃ સંસરન્તુ કામં પુત્રાદ્યપેક્ષયા ।
પરમાનન્દપૂર્ણોઽહં સંસરામિ કિમિચ્છયા ॥ ૪૨॥

અનુતિષ્ઠન્તુ કર્માણિ પરલોકયિયાસવઃ ।
સર્વલોકાત્મકઃ કસ્માદનુતિષ્ઠામિ કિં કથમ્ ॥ ૪૩॥

વ્યાચક્ષતાં તે શાસ્ત્રાણિ વેદાનધ્યાપયન્તુ વા ।
યેઽત્રાધિકારિણો મે તુ નાધિકારોઽક્રિયત્વતઃ ॥ ૪૪॥

નિદ્રાભિક્ષે સ્નાનશૌચે નેચ્છામિ ન કરોમિ ચ ।
દ્રષ્ટારશ્ચેત્કલ્પયન્તિ કિં મે સ્યાદન્યકલ્પનાત્ ॥ ૪૫॥

ગુઞ્જાપુઞ્જાદિ દહ્યેત નાન્યારોપિતવહ્નિના ।
નાન્યારોપિતસંસારધર્માનેવમહં ભજે ॥ ૪૬॥

શ૱ૃણ્વન્ત્વજ્ઞાતતત્ત્વાસ્તે જાનન્કસ્માચ્છૃણોમ્યહમ્ ।
મન્યન્તાં સંશયાપન્ના ન મન્યેઽહમસંશયઃ ॥ ૪૭॥

વિપર્યસ્તો નિદિધ્યાસેત્કિં ધ્યાનમવિપર્યયાત્ ।
દેહાત્મત્વવિપર્યાસં ન કદાચિદ્ભજામ્યહમ્ ॥ ૪૮॥

અહં મનુષ્ય ઇત્યાદિવ્યવહારો વિનાપ્યમુમ્ ।
વિપર્યાસં ચિરાભ્યસ્તવાસનાતોઽવકલ્પતે ॥ ૪૯॥

પ્રારબ્ધકર્મણિ ક્ષીણે વ્યવહારો નિવર્તતે ।
કર્માક્ષયે ત્વસૌ નૈવ શામ્યેદ્ધ્યાનસહસ્રતઃ ॥ ૫૦॥

વિરલત્વં વ્યવહૃતેરિષ્ટં ચેદ્ધ્યાનમસ્તુ તે ।
અબાધિકાં વ્યવહૃતિં પશ્યન્ધ્યાયામ્યહં કુતઃ ॥ ૫૧॥

વિક્ષેપો નાસ્તિ યસ્માન્મે ન સમાધિસ્તતો મમ ।
વિક્ષેપો વા સમાધિર્વા મનસઃ સ્યાદ્વિકારિણઃ ॥ ૫૨॥

નિત્યાનુભવરૂપસ્ય કો મે વાઽનુભવઃ પૃથક્ ।
કૃતં કૃત્યં પ્રાપણીયં પ્રાપ્તમિત્યેવ નિશ્ચયઃ ॥ ૫૩॥

વ્યવહારો લૌકિકો વા શાસ્ત્રીયો વાઽન્યથાઽપિ વા ।
મમાકર્તુરલેપસ્ય યથાઽઽરબ્ધં પ્રવર્તતામ્ ॥ ૫૪॥

અથવા કૃતકૃત્યોઽપિ લોકાનુગ્રહકામયા ।
શાસ્ત્રીયેણૈવ માર્ગેણ વર્તેઽહં કા મમ ક્ષતિઃ ॥ ૫૫॥

દેવાર્ચનસ્નાનશૌચભિક્ષાદૌ વર્તતાં વપુઃ ।
તારં જપતુ વાક્તદ્વત્પઠત્વામ્નાયમસ્તકમ્ ॥ ૫૬॥

વિષ્ણું ધ્યાયતુ ધીર્યદ્વા બ્રહ્માનન્દે વિલીયતામ્ ।
સાક્ષ્યહં કિઞ્ચિદપ્યત્ર ન કુર્વે નાપિ કારયે ॥ ૫૭॥

કૃતકૃત્યતયા તૃપ્તઃ પ્રાપ્તપ્રાપ્યતયા પુનઃ ।
તૃપ્યન્નેવં સ્વમનસા મન્યતેઽસૌ નિરન્તરમ્ ॥ ૫૮॥

ધન્યોઽહં ધન્યોઽહં નિત્યં સ્વાત્માનમઞ્જસા વેદ્મિ ।
ધન્યોઽહં ધન્યોઽહં બ્રહ્માનન્દો વિભાતિ મે સ્પષ્ટમ્ ॥ ૫૯॥

ધન્યોઽહં ધન્યોઽહં દુઃખં સાંસારિકં ન વીક્ષેઽદ્ય ।
ધન્યોઽહં ધન્યોઽહં સ્વસ્યાજ્ઞાનં પલાયિતં ક્વાપિ ॥ ૬૦॥

ધન્યોઽહં ધન્યોઽહં કર્તવ્યં મે ન વિદ્યતે કિઞ્ચિત્ ।
ધન્યોઽહં ધન્યોઽહં પ્રાપ્તવ્યં સર્વમદ્ય સમ્પન્નમ્ ॥ ૬૧॥

ધન્યોઽહં ધન્યોઽહં તૃપ્તેર્મે કોપમા ભવેલ્લોકે ।
ધન્યોઽહં ધન્યોઽહં ધન્યો ધન્યઃ પુનઃ પુનર્ધન્યઃ ॥ ૬૨॥

અહો પુણ્યમહો પુણ્યં ફલિતં ફલિતં દૃઢમ્ ।
અસ્ય પુણ્યસ્ય સમ્પત્તેરહો વયમહો વયમ્ ॥ ૬૩॥

અહો શાસ્ત્રમહો શાસ્ત્રમહો ગુરુરહો ગુરુઃ ।
અહો જ્ઞાનમહો જ્ઞાનમહો સુખમહો સુખમ્ ॥ ૬૪॥

બ્રહ્માનન્દાભિધે ગ્રન્થે ચતુર્થોઽધ્યાય ઈરિતઃ ।
વિદ્યાનન્દસ્તદુત્પત્તિપર્યન્તોઽભ્યાસ ઇષ્યતામ્ ॥ ૬૫॥

ઇતિ બ્રહ્માનન્દે વિદ્યાનન્દઃ સમાપ્તઃ ॥ ૧૪॥

## ૧૫. બ્રહ્માનન્દે વિષયાનન્દો નામ - પઞ્ચદશઃ પરિચ્છેદઃ ।

અથાત્ર વિષયાનન્દો બ્રહ્માનન્દાંશરૂપભાક્ ।
નિરૂપ્યતે દ્વારભૂતસ્તદંશત્વં શ્રુતિર્જગૌ ॥ ૧॥

એષોઽસ્ય પરમાનન્દો યોઽખણ્ડૈકરસાત્મકઃ ।
અન્યાનિ ભૂતાન્યેતસ્ય માત્રામેવોપભુઞ્જતે ॥ ૨॥

શાન્તા ઘોરાસ્તથા મૂઢા મનસો વૃત્તયસ્ત્રિધા ।
વૈરાગ્યં ક્ષાન્તિરૌદાર્યમિત્યાદ્યાઃ શાન્તવૃત્તયઃ ॥ ૩॥

તૃષ્ણા સ્નેહો રાગલોભાવિત્યાદ્યા ઘોરવૃત્તયઃ ।
સંમોહોભયમિત્યાદ્યાઃ કથિતા મૂઢવૃત્તયઃ ॥ ૪॥

વૃત્તિષ્વેતાસુ સર્વાસુ બ્રહ્મણશ્ચિત્સ્વભાવતા ।
પ્રતિબિમ્બતિ શાન્તાસુ સુખં ચ પ્રતિબિમ્બતિ ॥ ૫॥

રૂપં રૂપં બભૂવાસૌ પ્રતિરૂપ ઇતિ શ્રુતિઃ ।
ઉપમા સૂર્યકેત્વાદિ સૂત્રયામાસ સૂત્રકૃત્ ॥ ૬॥

એક એવ હિ ભૂતાત્મા ભૂતે ભૂતે વ્યવસ્થિતઃ ।
એકધા બહુધા ચૈવ દૃશ્યતે જલચન્દ્રવત્ ॥ ૭॥

જલે પ્રવિષ્ટશ્ચન્દ્રોઽયમસ્પષ્ટઃ કલુષે જલે ।
વિસ્પષ્ટો નિર્મલે તદ્વદ્દ્વેધા બ્રહ્માપિ વૃત્તિષુ ॥ ૮॥

ઘોરમૂઢાસુ માલિન્યાત્સુખાંશસ્ય તિરસ્કૃતિઃ ।
ઈષન્નૈર્મલ્યતસ્તત્ર ચિદંશપ્રતિબિમ્બનમ્ ॥ ૯॥

યદ્વાપિ નિર્મલે નીરે વહ્નેરૌષ્ણ્યસ્ય સંક્રમઃ ।
ન પ્રકાશસ્ય તદ્વત્સ્યાચ્ચિન્માત્રોદ્ભૂતિરત્ર ચ ॥ ૧૦॥

કાષ્ઠે ત્વૌષ્ણ્યપ્રકાશૌ દ્વાવુદ્ભવં ગચ્છતો યથા ।
શાન્તાસુ સુખચૈતન્યે તથૈવોદ્ભૂતિમાપ્નુતઃ ॥ ૧૧॥

વસ્તુસ્વરૂપમાશ્રિત્ય વ્યવસ્થા તૂભયોઃ સમા ।
અનુભૂત્યનુસારેણ કલ્પ્યતે હિ નિયામકમ્ ॥ ૧૨॥

ન ઘોરાસુ ન મૂઢાસુ સુખાનુભવ ઈક્ષ્યતે ।
શાન્તાસ્વપિ ક્વચિત્કશ્ચિત્સુખાતિશય ઈશ્યતામ્ ॥ ૧૩॥

ગૃહક્ષેત્રાદિવિષયે યદા કામો ભવેત્તદા ।
રાજસસ્યાસ્ય કામસ્ય ઘોરત્વાત્તત્ર નો સુખમ્ ॥ ૧૪॥

સિદ્ધ્યેન્ન વેત્યસ્તિ દુઃખમસિદ્ધૌ તદ્વિવર્ધતે ।
પ્રતિબન્ધે ભવેત્ક્રોધો દ્વેષો વા પ્રતિબન્ધકઃ ॥ ૧૫॥

અશક્યશ્ચેત્પ્રતીકારો વિષદઃ સ્યાત્સ તાનસઃ ।
ક્રોધાદિષુ મહાદુઃખં સુખશઙ્કાપિ દૂરતઃ ॥ ૧૬॥

કામ્યલાભે હર્ષવૃત્તિઃ શાન્તા તત્ર મહત્સુખમ્ ।
ભોગે મહત્તરં લાભપ્રસક્તાવીષદેવ હિ ॥ ૧૭॥

મહત્તમં વિરક્તૌ તુ વિદ્યાનન્દે તદીરિતમ્ ।
એવં ક્ષાન્તૌ તથૌદાર્યે ક્રોધલોભનિવારણાત્ ॥ ૧૮॥

યદ્યત્સુખં ભવેત્તત્તદ્બ્રહ્મૈવ પ્રતિબિમ્બનાત્ ।
વૃત્તિષ્વન્તર્મુખા સ્વસ્ય નિર્વિઘ્નં પ્રતિબિમ્બનમ્ ॥ ૧૯॥

સત્તા ચિતિઃ સુખં ચેતિ સ્વભાવા બ્રહ્મણસ્ત્રયઃ ।
મૃચ્છિલાદિષુ સત્તૈવ વ્યજ્યતે નેતરદ્દ્વયમ્ ॥ ૨૦॥

સત્તા ચિતિર્દ્વયં વ્યક્તં ધીવૃત્ત્યોર્ઘોરમૂઢયોઃ ।
શાન્તવૃત્તૌ ત્રયં વ્યક્તં મિશ્રં બ્રહ્મેત્થમીરિતમ્ ॥ ૨૧॥

અમિશ્રં જ્ઞાનયોગાભ્યાં તૌ ચ પૂર્વમુદીરિતૌ ।
આદ્યેઽધ્યાયે યોગચિન્તા જ્ઞાનમધ્યાયોર્દ્વયોઃ ॥ ૨૨॥

અસત્તા જાડ્યદુઃખે દ્વે માયારૂપં ત્રયં ત્વિદમ્ ।
અસત્તા નરશૃઙ્ગાદૌ જાડ્યં કાષ્ઠશિલાદિષુ ॥ ૨૩॥

ઘોરમૂઢધિયોર્દુઃખમેવં માયા વિજૃમ્ભિતા ।
શાન્તાદિ બુદ્ધિવૃત્ત્યૈક્યાન્મિશ્રં બ્રહ્મેતિ કીર્તિતમ્ ॥ ૨૪॥

એવં સ્થિતેઽત્ર યો બ્રહ્મ ધ્યાતુમિચ્છેત્પુમાનસૌ ।
નૃશૃઙ્ગાદિમુપેક્ષેત શિષ્ટં ધ્યાયેદ્યથાયથમ્ ॥ ૨૫॥

શિલાદૌ નામરૂપે દ્વે ત્યક્ત્વા સન્માત્રચિન્તનમ્ ।
ત્યક્ત્વા દુઃખં ઘોરમૂઢધિયોઃ સચ્ચિદ્વિચિન્તનમ્ ॥ ૨૬॥

શાન્તાસુ સચ્ચિદાનન્દાંસ્ત્રીનપ્યેવં વિચિન્તયેત્ ।

કનિષ્ઠમધ્યમોત્કૃષ્ટાસ્તિસ્રશ્ચિન્તાઃ ક્રમાદિમાઃ ॥ ૨૭॥

મન્દસ્ય વ્યવહારેઽપિ મિશ્રબ્રહ્મણિ ચિન્તનમ્ ।
ઉત્કૃષ્ટં વ્યક્તુમેવાત્ર વિષયાનન્દ ઈરિતઃ ॥ ૨૮॥

ઔદાસીન્યે તુ ધીવૃત્તેઃ શૈથિલ્યાદુત્તમોત્તમમ્ ।
ચિન્તનં વાસનાનન્દે ધ્યાનમુક્તં ચતુર્વિધમ્ ॥ ૨૯॥

ન ધ્યાનં જ્ઞાનયોગાભ્યાં બ્રહ્મવિદ્યૈવ સા ખલુ ।
ધ્યાનેનૈકાગ્ર્યમાપન્ને ચિત્તે વિદ્યા સ્થિરીભવેત્ ॥ ૩૦॥

વિદ્યાયાં સચ્ચિદાનન્દા અખણ્ડૈકરસાત્મતામ્ ।
પ્રાપ્ય ભાન્તિ ન ભેદેન ભેદકોપાધિવર્જનાત્ ॥ ૩૧॥

શાન્તા ઘોરાઃ શિલાદ્યાશ્ચ ભેદકોપાધયો મતાઃ ।
યોગાદ્ વિવેકતો વૈષમુપાધીનામપાકૃતિઃ ॥ ૩૨॥

નિરુપાધિબ્રહ્મતત્ત્વે ભાસમાને સ્વયંપ્રભે ।
અદ્વૈતે ત્રિપુટી નાસ્તિ ભૂમાનન્દોઽત ઉચ્યતે ॥ ૩૩॥

બ્રહ્માનન્દ અભિધે ગ્રન્થે પઞ્ચમોઽધ્યાય ઈરિતઃ ।
વિષયાનન્દ એતેન દ્વારેણાન્તઃ પ્રવેશ્યતામ્ ॥ ૩૪॥

પ્રીયાદ્ધરિહરોઽનેન બ્રહ્માનન્દેન સર્વદા ।
પાયાચ્ચ પ્રાણિનઃ સર્વાન્સ્વાશ્રિતાં શુદ્ધમાનસાન્ ॥ ૩૫॥

ઇતિ બ્રહ્માનન્દે વિષયાનન્દઃ સમાપ્તઃ ॥ ૧૫॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્ય
શ્રી વિદ્યારણ્યમુનિવિરચિતઃ પઞ્ચદશી ગ્રન્થઃ સમાપ્તઃ ।

Encoded and proofread by Sunder Hattangadi

*Panchadashi*
pdf was typeset on March 19, 2025

Please send corrections to *sanskrit@cheerful.com*